# रेणुविरचितगृह्यकारिकायाः सम्पादनम्

## ( AN EDITION OF GṚHYA KĀRIKĀ BY REṆU )




सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य

विद्यावारिधि-( पी-एच्० डी० )-शोधोपाधिकृते

प्रस्तुतः शोधप्रबन्धः

निर्देशकः—
डा० युगल किशोर मिश्रः
वेदाचार्यः, एम० ए०, पी-एच० डी०
आचार्योऽध्यक्षश्च-वेदविभागस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः
वाराणसी

प्रस्तुतकर्त्ता—
राजेन्द्र प्रसाद मिश्रः
वेदाचार्यः
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः
वाराणसी
पंजीयन संख्या ३०६/६०७

अक्टूबर १९८२


DHRUVA BOOK BINDER
BHU GATE LANKA VARANASI 5

306

TiQ
51

# रेणुविरचितगृह्यकारिकायाः सम्पादनम्

## ( AN EDITION OF GṚHYA KĀRIKĀ BY REṆU )




सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य


विद्यावारिधि-( पी-एच्० डी० )-शोधोपाधिकृते

प्रस्तुतः शोधप्रबन्धः

*निर्देशकः—*
**डा० युगल किशोर मिश्रः**
वेदाचार्यः, एम० ए०, पी-एच० डी०
आचार्योऽध्यक्षश्च-वेदविभागस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः
वाराणसी

*प्रस्तुतकर्त्ता—*
**राजेन्द्र प्रसाद मिश्रः**
वेदाचार्यः
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः
वाराणसी
पंजीयन संख्या ३०६/६०७

अक्टूबर १९८२



# मङ्गलम्

वेदोऽसि येन त्वं देव वेद,
देवेभ्यो वेदोऽभवस्तेन मह्यं वेदो भूयाः ।
देवा गातुविदो गातुं वित्त्वा गातुमित ।
मनसस्पत इमं देव यज्ञं स्वाहा वाते धाः ।।

यजुर्वेदः

वेदात्मन्, त्वं सर्वस्य ज्ञातासि, देवैरपि ज्ञातव्योऽसि, मम ज्ञापको भव । वैदिकशब्दराशेः ज्ञातारो देवाः शब्दब्रह्माभिधं त्वां ज्ञात्वा शब्दब्रह्मसाक्षात्कारं प्राप्नुवन्ति । मनसः प्रवर्तक, वेदपुरुष, इमं शाश्वतं यज्ञं त्वदर्थे ददामि । अनेनास्मान् प्रतिष्ठापय ।

## प्रमाण

श्रीराजेन्द्रप्रसादमिश्रेण वेदाचार्येण यथानियमं सम्पूर्णानन्दसंस्कृत-विश्वविद्यालये १९७८ वत्सरे ३०५।६०७ संख्यया पंजीकरणमवाप्य रेणुविरचित गृह्यकारिकायाः सम्पादनम् इति विषयमधिकृत्य मम निर्देशने कार्यजातं सविधि कृतम्। तस्य परिणामोऽयं शोधप्रबन्धः। श्रीरेणुविरचितगृह्यकारिकायाः मातृका (पाण्डुलिपिः) सम्पूर्णानन्दसंस्कृतविश्वविद्यालयीये सरस्वतीभवन ग्रन्थागारे समधिगता। विश्वविद्यालयस्याप्य एवंविधः समुद्देश आसीद् येन अप्रकाशितानां महत्त्वपूर्णानां ग्रन्थागारे संरक्षितानां मातृकाणामनुसन्धानव्याजेन समुद्धारः प्रकाशनं च भवेत्। अतश्च श्रीमिश्रेण समुपलब्धां मातृकां विशोध्य सुबहु परिश्रमं कृत्वा सम्पादनं कृतम्, भूमिकादिभिश्च समलङ्कृत्य विद्यावारिधि शोधोपाधये प्रस्तुतम्। सोऽयं प्रबन्धः सहृदयानां विद्वत्सल्लजानां मानसं भृशं प्रसादयिष्यतीति मन्वानोऽग्रेसारयति,

युगल किशोर मिश्र
(डा० युगलकिशोरमिश्रः)
निर्देशकः
आचार्य एवं अध्यक्ष
वेद विभाग
सम्पूर्णानन्द संस्कृत विश्वविद्यालय
वाराणसी।

## प्राङ्मुखरितम्

न च वक्तव्यमस्ति किमपि स्वस्य विषये परस्य विषये चास्य प्रबन्धस्य विषये च परिचायनाय । अहं हि कश्यपगोत्रोत्पन्नः कश्यपासित देवलेति त्रिप्रवरः सामवेदस्य कौथुमशाखाध्यायी लाट्यायनसूत्रानुयायी चास्मीति शाखीयः परिचयः स्वस्य । संस्कृतस्याध्ययनायैव मध्यप्रदेशादहं भारतस्य ज्ञानराजधान्यां वाराणस्यां समागत्य सम्पूर्णानन्दसंस्कृतविश्वविद्यालये छात्रत्वेन प्राविशम् । तत्र च शुक्लयजुर्वेदविषयमवलम्ब्य वेदाचार्यपरीक्षा १९७६ वर्षे समुत्तीर्णा । प्राङ्गणेऽस्मिन्निदमपि सौभाग्यं गणनीयमेव यन्मया करुणैकपराणां प्रातःस्मरणीयानां गुरुवर्याणां वेदविद्याविद्योतितहृदां श्रीमतां विविधोपाध्यलङ्कृतानां गोपालचन्द्रमिश्राणां सकाशादधीतमिति । वेदाङ्गपारावारीणानां गुरुचरणानामन्तेवासित्वेन कियन्तो ज्ञानबिन्दवः मया संरक्षिताः, नैतच्चिन्तनीयम्। सागरतटे स्थितस्तु नैकमपि धाराभिराप्लावितो भवत्येव । यद्येतत् न सिञ्चितो वा स्यात् विरलो वा स्यात्, पाठका एवात्र प्रमाणम् । अहं तु तद्वद् गुरुवराणां प्रातःस्मरणीयानां मिश्रपादानामहैतुकस्य स्नेहस्य सहेतुकस्य च रोषस्य कृपयैव भाजनमभवमित्यनेनैव स्वस्य धन्यत्वमुद्घोषयामि ।

तैरेव चाचार्यपादैराज्ञप्तोऽनन्तरं शोधकार्यार्थं प्रेरितोऽहमनुसन्धित्सुरनुसन्धेयविषयस्यानुसन्धानेऽप्रवृत्तम् । अत्रापि गुरुभिरेव ऋजुः पन्थाः दर्शितः । आधुनिकशोधकार्ये तेषामभिप्राय आसीद् यत् किमनेन विषयस्यान्तर्निपत्य विचारेण विना केवलं वस्तुपाठेन, ज्ञानगरिमाधारेण विना पल्लवग्रहणमात्रेण, साधुनोऽपि स्वमतस्य प्रतिष्ठापनसामर्थ्येन विनासाधुनोऽपि परमतस्य प्रत्याख्यापनकौशलेन, निष्कर्षप्रतिपादनप्रतिभया विना नानाग्रन्थोद्धरणविवरणेन वा । साम्प्रतिकप्रचलितानुसन्धानकार्येषु सर्वमेतत् क्रियते । अतो नूतनप्रबन्धप्रणयनेनालं भवतु । प्राचीनं यज्ज्ञानजातं ग्रन्थालयेषु विराजते तस्यैव समुद्धारायास्माभिः भवान् प्रयत्नो विधेयः । तदिदमनुज्ञानमधिगत्याहं वाराणसेये सरस्वतीभवनग्रन्थालये स्थितानां रेणुरचितानां गुह्यकारिकाणां प्रकाशनायामुं विषयमुररीकृत्य शोधकार्ये प्रवृत्तः ।

मूलेऽपि सिक्तः पयसा घृतेन च निम्बवृक्षो मधुरत्वमेतीत्युक्तिः
कस्यापि प्रतिकलं शतेन सत्या । ऋग्भिरर्चितेन यजुर्भिर्यजितेन सामभिरभिष्टुतेना
थर्वमन्त्रैस्समानितेनापि देवेन वेदव्याख्यायामेव गुरुचरणानां स्मरणोऽस्माभिः
प्रदर्शितम् । १९८० वत्सरेऽसमयेनैव पूज्यपादानां विरहेण वयं भृशं संतापिताः ।
तथापि तेषामाशीर्भिरनुदिनमभिवर्धिता वयं कार्यं परायणेन । तेषां स्मरणेनैव
सर्वमिदं कार्यं पूर्णतामगात् ।

अथ पुनः परमपि किमपि निवेदनीयम् । परात्परतरो वेदपुरुषो
मया नतिभिराराध्यते । ततो वेदव्याख्यातारः वैदिकवाङ्मयप्रणेतार आचार्याः
वेदैकशरणाश्रितिनो विद्वांसः वैदिककर्मकाण्डज्ञा महान्तो जनाः मया सादरं स्मर्यन्ते ।
गुरुचरणानां पण्डितप्रवराणां परमादरणीयानां प्रो० डा० गोपालचन्द्रमिश्रमहोदयानां
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये पूर्ववेदविभागाध्यक्षाणां कृते किं वाचां वैचित्र्येण ।
सर्वमेतत् तेषां तेभ्य एवार्प्यते मया ।

मम शोधमार्गनिर्देशकाः कृपयैव गुरुरूपेण प्राप्ताः ... च मह्यं
वितरन्तो वैदिकप्रवराः प्रो० डा० युगलकिशोरमिश्रमहोदयाः सम्पूर्णानन्दसंस्कृत
विश्वविद्यालये वेदविभागाध्यक्षाः श्रियामारपुण्येन यथा समाकलिता उत नतीनां
पात्रमिति नाहं वक्तुं शक्नोमि । स्नेहपरम्परायामस्यां विद्यावारिधयः श्रीमन्तः
श्रीकिशोरमिश्रमहोदया अपि बहुमानपात्रभूता बोभूयन्ते ।

अस्मिन्नवसरे पुस्तकानां पाण्डुलिपीनाञ्चोपलब्धौ दैशिकाधिकाध्यक्षाना
माशिष्यत्वे च सातानुग्रहार्थम् उदयपुरस्थप्राच्यविद्याप्रतिष्ठाने वरिष्ठशोधाधि
कारिणः डा० कृष्णमोहनाचार्यमहाभागाः नूनमाभारभाजः । शोधप्रबन्धटंकणे
शीघ्रतया श्रीमान् मनोहरमिश्रमहोदयोऽपि धन्यवादार्हः ।

अथापि प्राचीनग्रन्थसम्पादनेऽस्मिन् मातृकाणां पाण्डुलिपीनाञ्च
त्रुटितभ्रष्टपाठानां संशोधनम्, पाठभेदनिर्धारणम् , गूढकारिकार्थानामाकरग्रन्थानां
पारस्करगृह्यादिग्रन्थानामुद्धरणप्रदर्शनम् , विप्रतिपत्तिस्थलेषु स्थलेषु टिप्पणीकरणम् ,
कारिकार्थविषयाणां स्फुटीकरणम् , विस्तृतेन भूमिकाभागेनालंकरणम् , अन्यासां

डे०वादीनामाचार्याणां वाचस्पत्यादिभिरभिहितस्य प्रमाणादीनामन्वेषणम् ,
पाण्डुलिपीनामुपलब्ध्यै विश्वेश्वरानन्दशोधसंस्थानादिषु निष्फलं पत्राचरणम् ,
इत्यादिषु महान् श्रमो मया विहितः । तथापि ज्ञानपरितोषाद् विदुषां न साधु मन्ये प्रयोगविज्ञानमित्यापर्यवसानेन प्रबन्धेऽस्मिन् किमस्ति रुचिरं किमनुचितमित्यत्र गुणैकपक्षपातिनः सहृदया विद्वांस एव प्रमाणम् ।

शोधप्रबन्धटंकोऽनुपलब्धेभ्यः सन्धिविरहितेभ्यस्त्रुटितेभ्यश्चापरेभ्यो मौखो वा प्रबन्धान्तर्वर्तिनीनां ज्ञाताज्ञातानां त्रुटीनां कृते क्षमां प्रार्थयामि, यत्

गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः ।
हसन्ति दुर्जनास्तत्र समादधति सज्जनाः ।।
दुराग्रहं निर्मुच्य कृपां कृत्वा ममोपरि ।
विलोक्यो मत्प्रबन्धोऽयं बुद्धिमद्भिर्विचारकैः ।।

इत्यावेदयति,
राजेन्द्र-प्रसाद मिश्रः
( राजेन्द्रप्रसादमिश्रः )

## विषय-सूची (संहिता)

| विषयः | पृष्ठांकः |
|---|---|

पृष्ठांकाः

गृह्यकारिका (उत्तरार्धभागः)

-0-

# विषयानुक्रमणिका

विषय-विवरणम् | पृष्ठांकाः

पृष्ठाङ्काः

पृष्ठाङ्काः



उत्तरार्धः भागः

पृष्ठाङ्काः

पृष्ठांका:

पृष्ठांका:

पृष्ठांका:

पृष्ठांका:

पृष्ठाङ्काः

पृष्ठाङ्काः

-0-

# भूमिका

# भूमिका

परमं [illegible] भारतवर्षं [illegible] समस्तानां ज्ञान-विज्ञानानां प्रसूतिः प्राक्तनं [illegible] परमार्थदर्शिनां [illegible] शास्त्राणां बहुगुणानामाकरो बभूव । तत्रत्यभूमिभागेषु उपदिष्टाः ग्रन्थविधाः लिखिताः अलिखिताश्च अद्यापि राष्ट्रभित्तौ वर्तन्ते । अत्र भारतीयभाषाणामपि [illegible] प्रसूतानां सर्वासां भाषाणां जननीत्वं धारयन्ती संस्कृतभाषा सर्वैरपि [illegible] अभिराधिता: प्राची-नैर्विद्वद्भिः [illegible] साधारणजनैरपि [illegible] विलक्षणतां बिभर्ति [illegible] । [illegible] सूत्रेषु [illegible] च सर्वविधासु [illegible] श्रुति-स्मृत्यादिः [illegible] च [illegible] किमपि वा पूर्वं आचार्यैः तत्तत्त्वं प्रादर्शयन् । [illegible] मानवाभिधानस्य विभिन्न [illegible] दर्शनं [illegible] अपि [illegible] । [illegible] न हि केवलं [illegible] वा [illegible] । [illegible] भारतीया [illegible] वर्णनीयाः [illegible] । [illegible] अपि [illegible] साधारणजनोपकाराय, [illegible] प्रादर्शयन् ।

[illegible] वैदिकेषु [illegible] । [illegible] वाङ्मये [illegible] विविध-[illegible]

पारस्करगृह्यसूत्रं नाम ग्रन्थरत्नम् । तैरतु वेदपुराणाद्यनेकग्रन्थनिबोधकसाति संदीपनी वेदपरिचायिनी ग्रन्थरत्नमाला: क्रमश: उपस्थाप्यते ।

वेदस्य महत्त्वम्

सर्वधर्मविद्याया प्राचीनस्य आधाराधारस्य सकल-शिक्षा-प्राणस्य समस्त-दीर्घ-विज्ञानस्य सनातन-धर्मस्य प्राचीन-भारतस्य च कल्पनापि वेदं विना न शक्यते । यथा लोचन-विहीनो जनः कदापि पदार्थस्य दर्शने सामर्थ्यरहितो भवति, तथैव वेदविहीनो ऽपि जनः आध्यात्मिक-पदार्थविज्ञाने सर्वथा अन्धतमिव भवति । प्रत्यक्षादिभि: प्रमाणैरनधिगतस्य तत्त्वस्य बोधनादेव वेदस्य वेदत्वमिति सुस्पष्टमुक्तं सायणेन तैत्तिरीयभाष्यभूमिकायाम् -

प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते ।
तं वै विदन्ति वेदेन तस्माद् वेदस्य वेदता ।। तै०भा०भू०पृ० ३।।

भारतीय-परम्परानुसारं नायं वेदस्य केनापि रचितः कृतो वा, किन्तु विश्व-सृष्ट्यादि ब्रह्मणा नित्यवाणिभि: संस्कृत विश्वस्य रचना कृता । अत एव श्रुतिः इति नाम्नेयमस्याः स्वतः प्रामाण्यरूपं गौरवं ख्यापयति ।

शंकराचार्यप्रमुखाः दार्शनिकाः, यास्काचार्यप्रमुखाः वैयाकरणाः, कुमारिलप्रमुखाः मीमांसाशास्त्रिणो ऽपि श्रुतेः स्वतःप्रामाण्यमभ्युपगच्छन्तीति विदन्त्येव विज्ञाः । वेद-खण्डनपरा अपि जैन-सांख्य-बौद्धादयः खण्डनार्थं वेदस्य प्रामाण्यं समुपस्थापयन्तीति प्रत्यक्षमिव वेदस्य महत्त्वम् ।

सर्वप्राचीनता, विविध-विषयता, दार्शनिकभावपूर्णता, छन्दो-ऽलंकार-प्रचुरता, सर्वलोकाभिमता, सर्वदेशलभ्यता इत्यादयः विविधा गुणा अस्य गौरवं दर्शयन्ति ।

## भूमिका

विविध-वेद-विचारपूर्णं सर्वज्ञानुभूतिनिकेतनं दर्शनम्, नैकाङ्ग-राजकृतं रत्नपूर्णं भाष्यमञ्जु साहित्यं, संस्कृत-वेदार्थं पश्चिम-भारतीयं धर्मनीति प्रवृत्तिं, भारतीयं प्राचीनं वेद-भूमौ सत्-प्रकारादि-बोधिका सामाजिक-व्यवस्थां यदि विदुः कश्चिद् भवेत् तर्हि स वैदिक साहित्यं पठेत् ।

अत्र वर्णितक्रम पश्चिमानि विराजते भीरुतासि च महिम्ना फलकर्णाणि भवति । इन्द्र-वरुण-रुद्र-पूषा प्रभृतीन् विविधान् देवान् स्तुवन्तो वैदिकं सम्पन्नं बोधयन्त्यपि भक्तेः श्रुतिः स्वदेवोपासनामपि निर्दिशति । एवं विविध दिशा विशिष्टप्रकाशिन्याः श्रुतेरेव भाषा-विज्ञानं दृष्ट्वा नि पति, यतः प्राचीनानां भारोपीय-परिवार-भाषाणां अध्ययनं वैदिक-साहित्यमधीत्य भवितुं कदापि कथमपि न शक्नोति । पाश्चात्य-धर्मग्रन्थस्य जेन्दावेस्तानामकस्य भाषा ऋग्वेदभाषामनुहरति । एवं वेदस्य महत्त्वं स्वीकृतमपि विदित्वा भारतीयानां जनानां तत्र श्रद्धा स्वाभाविकी विद्यत एव ।

केवलं वेदपाठ-पारायणादिना तत्र तत्त्वज्ञो नरः भवतीति यास्काचार्येण स्वनिरुक्ते वर्णितम् -

स्थाणुरयं भारहारः किलाभूत्, अधीत्य वेदं न विजानाति योऽर्थम् ।
योऽर्थज्ञ इत् सकलं भद्रमश्नुते, नाकमेति ज्ञानविधूतपाप्मा ॥

किञ्च समग्र भारतीय-संस्कृतिरस्मत् वाङ्मयं वेदमेव समुपाश्रित्य संस्थिता । अत एवं निःसंकोचं कथयितुं शक्यते यत् वेद एव च ज्ञानाधिराजो, यस्मात् निःसृता विविधा ज्ञानविज्ञानधारा अपि च भारतीय-ऋषि-मुनिभिः संवर्धयन्तो येषां स्वीयार्थं समुपागतानाम् अन्येषामपि जनानां कल्याणं विदधति । एतस्य अस्तित्वमङ्गीकर्तुम्नापि यो नास्तिक पदाभिधेयो न भवति, किन्तु वेदस्य निन्दामपि कुर्वन् स नास्तिको वेदनिन्दकः इति दिशा नास्तिकपदाभिधेयः कथ्यते इति भारतीया रीतिः परम्परापि विदापापि वेदस्य महत्त्वं दर्शयति

## भूमिका

भारतीयमान्यतानुसारं वेदः सृष्टिप्रक्रियायाः प्राथमिकी वाणी वर्तते।[1] समग्रस्य सृष्टिक्रमस्य मूलं कारणं वेद एव।[2] किं बहुना स्थावरजंगमात्मकस्यास्य जगतो धारणं पोषणं चापि आ सर्गेण वेदशब्द-राशिभिरेव भवति।[3] साम्प्रतिकैः वैज्ञानिकैरपि भुवि समग्रस्य भूमण्डलस्य प्राचीनतमो ग्रन्थः वेद एव मन्यते। मानवस्य मानवतायाश्च प्राचीनतमरूपस्य परिज्ञानाय संस्कृतिक्रमानुसन्धानाय च वेदानुशीलनमत्यावश्यकमेव भवति। विश्वस्य प्राचीनतमग्रन्थत्वेन, समस्तानां संस्कृतीनां मूलस्थानत्वेन च वेद एव विशिष्टं जयति। अतो मानवजातिसंस्कृति-मूलस्य संस्कृतेः भाषावैज्ञानिकविवेचनाय च ज्ञानाय वेदाध्ययनमपरिहार्यम्। भारतीयानामास्थायाश्च मूलभूतो वेदः अनादिनिधनः ततः कालान्तरे ऽपि रहस्यगर्भः स्वीयया ज्ञानगरिमया आदरणीयो चापि विराजते। भारतीयाः आस्तिकाः स्वीयस्य सिद्धान्तस्य वेदमूलकत्वं साधयन्तो वेदं प्रति स्वीयां श्रद्धां सप्रामाणिकतां च सुदृढं प्रदर्शयन्ति। पाश्चात्याः यवना म्लेच्छा अपि वेदवाङ्मयानुशीलने कृतयत्नाः सन्तः निष्कर्षं जानन्ति वेदो विश्वस्य अपि प्राचीनतमग्रन्थं साम्प्रतिके परिवेशे ऽपि नूनं परिघोषयन्ति।

भारतीय-संस्कृत-साहित्ये वेदानामनुपमं महत्त्वं प्रथितम्। भारतीयतत्त्वविद्भिः वेदा एव वन्दनीयाः, वेदानामेव आराधनं विहितम्, वेदा एव अध्येतव्याः मननीयाश्च, यस्मात् नास्ति कश्चन सन्देहावकाशः। प्राचीना भारतीया संस्कृतिः वेदभावनया परितः पोषिता। अस्माकं पूर्वजाः

---

१. यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै (श्वे०उ० ६, १८)
वाणीयं वेदसंज्ञिता मयादौ ब्रह्मणे प्रोक्ता (भा० ११. १४. ३)

२. सर्वं वेदात् प्रसिध्यति, मनुस्मृ० १२.९७.

३. बिभर्ति सर्वभूतानि वेदशास्त्रं सनातनम्, मनुस्मृ० १२.९९.

कीदृशा आसन्? तेषां कीदृशी धार्मिकी भावना आसीत्? तेषां देवानां के: पूजा क्रियते स्म? कीदृशः तेषां समाजः? का च राजनीतिरेषाम्? एतानि सर्वाणि प्रश्नजातानि वेदस्य अध्ययनेन एव उत्तरयितुं शक्यानि। अत एव मनुना स्फुटमेव समुद्घोषितम् -

> यो नधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम्।
> स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः॥ मनु०स्मृ० २.१६८.

त्रिभिः च ब्राह्मण-क्षत्रिय-वैश्यवर्णैः वेदानामवश्यमेव अभ्यासः कर्तव्यः, वेदानामध्ययनेन एव द्विजस्य द्विजत्वं वर्तते, अन्यथा द्विजशूद्रयोः न कश्चन भेदः वर्तते। अन्येषां वर्णानां कृते वेदस्य स्वल्पमपि अध्ययनं पर्याप्तमभिमतम्, परं ब्राह्मणेन वेदानां साङ्गोपाङ्गमध्ययनं विहितम्। यतो हि - तस्य तु कर्तव्यमिदम्

> अध्यापनमध्ययनं यजनं याजनं तथा।
> दानं प्रतिग्रहश्चैव ब्राह्मणानामकल्पयत्॥ मनु० १.८८.

वेद-शब्दार्थः

प्रथमं तावत् कोऽयं वेदः? किमर्थमिदं नामकरणम्? उपर्युक्तेषु प्रश्नेषु समुपस्थितेषु प्राक्तन-वेद-वेदाङ्ग-पारगाणां, तद् व्याख्यातॄणां च वेद-शब्द-प्रतिपादक-विचाराणां समालोचनं प्रासङ्गिकं भवति। अत्र क्रमेण विचारिते येन वेदशब्दस्य कालान्तरे कस्मिन् कस्मिन् अर्थे प्रयोगः संवृत्तः तत् सुस्पष्टं भविष्यति। तैत्तिरीयसंहितायामुक्तम् -

> वेदेन वै देवा असुराणां वित्तं वेद्यमविन्दत, तद् वेदस्य वेदत्वम्।
> तै०सं० १.४.२०.

वेद-माश्रित्य देवैः असुराणां वित्तं, वेद्यं चाधिगतम्, अत एव वेदानां वेद नामत्वं सार्थकम् । इति तैत्तिरीय संहितायाः मतम् ।

वेदिः देवेभ्यो निलायत, तां वेदेन अन्वविन्दन, वेदेन वेदिविविदुः पृथिवीम् (तैत्तिब्रा० ३, ३.९, ९)

वेदिः पृथिवी देवेभ्यो अन्तर्हिता आसीत्, देवाः तां वेदेन अधिगतवन्तः वेदेन च तां वेदिं विविदुः इति वेदस्य वेदत्वं तैत्तिरीयब्राह्मणे वर्णितम् । सुश्रुत-संहितायां सुश्रुताचार्येण आयुर्वेद-शब्दस्य व्याख्यां प्रसङ्गे वेदशब्दस्यापि अर्थो विहितः - यथा - आयुरस्मिन् विद्यते, अनेन वा आयुर्विन्दति इति आयुर्वेदः (सुश्रुतसंहिता) ।

एतस्य व्याख्यायां व्याख्याकारो डल्हणो पि प्रोवाच वचनम् -

आयुः अस्मिन् आयुर्वेदे विद्यते = अस्ति,
विद्यते = ज्ञायते अनेन, विन्दते = विचार्यते येन वा
आयुरनेन विन्दति प्राप्नोति इति वा आयुर्वेदः (सुश्रुतसंहिता)

अत आयुः शब्दे समानतया वेदशब्दस्य अर्थं सुश्रुताचार्येण विहितम्, टीकाकारेण डल्हणेन चास्य त्रयो र्थाः विहिताः । प्रथमः ज्ञानार्थक - विद् धातोः द्वितीयः विचारणार्थक विद् धातोः, तृतीयश्च प्राप्त्यर्थक विद् धातोः निष्पादितः । एवं सुश्रुत-मते वेदशब्दस्य अर्थं डल्हणमते च अर्थत्रयमिति स्फुटम् ।

भरतनाट्यशास्त्रे नाट्यवेद शब्दं व्याचिख्यासुः अभिनवगुप्ताः प्राह -

नाट्यशास्त्रस्य वेदनं यत्र तस्मिन् विचारस्य यत्र तन्नाट्यवेद शब्देन उच्यते (भरतनाट्यम्, अभिनव० अ० १, १) । आपस्तम्बपरिभाषाभाष्यकारेण कपर्दि-स्वामिना तु - मन्त्रब्राह्मणानि अभिधीयन्ते वेदाः इति प्रोक्तम् ।

(आपस्तम्ब सू०पा० १, ३)

मानवकोषेऽत्र व्याख्या कृता वेदविदा -

चतुष्पाशे च वेदशब्दः । विद्वज्जनस्य प्रमाणविषं भौक्तागण्याभो-भ्यासादिति वेदः (मान० कण्ड०भा० १.१) ।

सायणाचार्येण ऋग्वेदभाष्यभूमिकायां इष्टप्राप्त्यनिष्ट-परिहारयोः अलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः इति निगदितम् ।

प्रसिद्धेनाचार्येण हेमचन्द्रेण च अभिधानचिन्तामणौ विदन्ति वेत्ति धर्मं वेद इति विदुर् धातोः वेदशब्दः निष्पादितः (अभि०चिन्ता०पृ० ७८)

व्याकरणेन पाणिनिना वेद-शब्दः उञ्छादिगणे वृषादिगणे च पठितः । उञ्छादिगणे वेद वेष्टा-यथाः कर्णौ (अष्टा०६.१.१६०) इति वार्तिकस्य व्याख्या प्रसंगे व्याख्याकारेण वामनेन प्रोक्तम् घञन्ताः ये कर्णौ अन्तोदात्ताः भवन्ति, यदि आद्युदात्ता स्थ (अष्टाध्यायी ६.१.२०३) तेन निष्पद्यते यदा वेदि वेन स वेदः वेदनं वा वेदः । इति भाष्यकारस्य अयं वेद शब्दस्य सम्पादि इति ।

वेदस्य भागद्वयम्

सामान्यतया मन्त्र-ब्राह्मणभेदेन द्विधा वेदस्य विभाजनं प्राचीनाचार्याः कुर्वन्ति ।[1] मन्त्रात्मकस्य वैदिक-शब्द-राशेः पुनः संकलनं संहितेति नाम्ना प्राचीनकालाद् व्यवहृतं भवति । संहिता एक-वैदिकशब्द-राशिमाधृत्य पद-क्रम-विकृतिपाठाः भवन्ति । यद्यपि प्रायशः संहितैव मन्त्राणामेव प्रयोगो भवति ।[2] अपारवेद्य भट्ट-भास्करस्य मतानुसारं कर्मणां कोपि

---

१. मन्त्रब्राह्मणयोर्वेदनामधेयम्, प्राप०सू० १.२ आप०प०सू० ३१.
२. अपि च पदक्रमेण संहितेव विज्ञायन्ते मन्त्राः ।
नि० १.१७ दुर्गाचार्य.

विनियुक्तानां मन्त्राणां च व्याख्यानग्रन्थाः ब्राह्मणशब्देन व्यवह्रियन्ते ।[1]

वेदविभाजनम्

प्राचीन-भारतीय-वाङ्मयस्य निर्देशानुसारं सर्वत्र सृष्टेः प्रारम्भकाले स्वयम्भुवा ब्रह्मणा एक एव वेदः प्रकटितः आसीत् । सत्ययुगे त्रेतायुगे द्वापरयुगस्य च प्रायशः समाप्तिपर्यन्तमेकरूपेण वेदस्याध्ययनाध्यापनक्रमः प्रचलित आसीत् । द्वापरयुगस्य समाप्तेः कतिपयवर्षेभ्यः प्राक् महर्षिः व्यासः भाविनि कलियुगे जनानां बुद्धि-शक्त्यायुषां ह्रासं ध्यात्वा तदीयां दिव्यदृष्ट्या ज्ञात्वा ब्रह्मपरम्परया प्राप्तस्यैकस्यैव वेदस्य यज्ञप्रक्रियानुगुणं विभागचतुष्टयं चकार (श्री०भा० १.४.१९-२०) ।

तेषु चतुर्षु विभागेषु होतृकर्मोपयोगिनां मन्त्राणां संकलनं ऋग्वेद इति नाम्ना, उद्गातृकर्मोपयोगिनां मन्त्राणां संकलनं सामवेद इति नाम्ना, आध्वर्यवकर्मोपयोगिनां मन्त्राणां संकलनं यजुर्वेद इति नाम्ना, शान्तिकपौष्टिकाभिचारिकब्रह्मकर्मोपयोगिनां मन्त्राणां च संकलनमथर्ववेद इति नाम्ना व्यवह्रियते ।

सम्प्रति प्रवर्तमानस्य वेद-संकलनस्य वैवस्वतमन्वन्तरे कृष्णद्वैपायन महर्षिणा व्यासेन कृतमिदं अष्टाविंशं विभाजनमस्ति । अत्र पौराणिक-मान्यतानुसारमेकसप्ततियुगानामेकं मन्वन्तरं भवति । प्रत्येकस्य चतुर्युगस्य मध्ये द्वापरयुगसमाप्तिकाले विशिष्टतमः सम्पन्नः महर्षिभिः व्यासस्य वेदस्य चतुर्धा विभाजनं क्रियते (भा० १२.६.४६-५०) । विभाजनमिदं कलियुगार्धे-मेव प्रवर्तते कलिसमाप्तौ च समाप्यते । सम्प्रति मन्वन्तरेषु सप्तमस्य वैवस्वत नामकस्य मन्वन्तरस्य अष्टाविंशतितमः कलियुगः प्रवर्तते । अतः पूर्वं सप्तविंश-कलियुगाः तदनुसारं च सप्तविंशतिवेदविभागकर्तारो वेदव्यासाः विभिन्नाभिधाः

---

१. ब्राह्मणं नाम कर्मणस्तन्मन्त्राणां च व्याख्यानग्रन्थः । तै०सं० १.५.१ भाष्ये

बभूवुः ।[1] वेदस्यैतदुपलब्धं साम्प्रतिकं विभाजनं महर्षेः पराशरस्य पुत्रेण कृष्ण-द्वैपायनेन कृतमस्ति ।[2] वेदविभागकरणादेव च महर्षिर्वेदव्यासेत्युपाधिना विभूषितो भवति ।

## वेदशाखाः

कृष्णद्वैपायनो महर्षिर्वेदव्यासः वेदं चतुर्धा विभज्य तं चतुर्भ्यः शिष्येभ्यः समध्यापयत् । तेषु पैलाभिधे शिष्याय ऋग्वेदम्, वैशम्पायनाय यजुर्वेदम्, जैमिनये सामवेदम्, सुमन्तवे चाथर्ववेदमध्यापयत् ।[3] श्रीमद्भागवतानुसारं वेदस्यैतं चतुर्धाविभाजनमपि कालान्तरे मानवस्य धारणाशक्तिह्रासादानां प्राचीनपुरुषाणां दुर्ग्राह्यतामगात् । ततो व्यासशिष्याः पैलवैशम्पायनजैमिनि-सुमन्तवः स्वशिष्येभ्यः ते च स्वशिष्येभ्यः स्वीयं वेदं बहुधा शाखासु विभज्य अध्यापयामासुः ।[4] अनेन प्रत्येकं विभाजितानि प्रत्येकस्याः शाखायाः साम्प्रतिकीं मान्यतामुपलभमासत् । प्रत्येकमपि शाखा स्वतन्त्रैव पूर्णा वर्तते, न चान्यां शाखामपेक्षते । यथा महाभारतादि ग्रन्थेषु एकं पर्वकाण्डं वा परस्य सापेक्षत्वात् ग्रन्थस्यैकभागत्वं भजते । परं शाखा न वेदस्यैकभागत्वेना-भिधातुं शक्यन्ते । यतो हि प्रत्येकं शाखा निरपेक्षेण स्वोपदिष्टकर्मणां पूर्णं विधानमुपदिशति । अत एव एकशाखाध्ययनेन तद्वेदस्य पूर्णाध्ययन-माचार्या अभ्युपयन्ति ।[5]

---

१. द्रष्टव्यम्, ब्रह्मपु० २. ३५, ११९-२४ ; वायुपु० अ० २३.
२. द्रष्टव्यम्, भा० १२. ६ ४६-४९.
३. द्रष्टव्यम्, भा० १. ४. २१-२२, १२. ६ ५०-५३.
४. द्रष्टव्यम्, भा० १. ४. २३-२४.
५. एकशाखाध्ययनेन एकस्य वेदस्य सम्पूर्णाध्ययनम् , का०श्रौ०सू० १२.

महाभाष्यकृत् पतञ्जलिमतानुसारं चतुर्णां वेदानां सम्पूर्णाः शाखाः संख्या एकत्रिंशदधिकैकादशशतं सन्ति । तत्र ऋग्वेदस्य एकविंशतिः शाखाः, यजुर्वेदस्य[1] एकाधिकं शतं शाखाः, सामवेदस्य सहस्रं शाखाः, अथर्ववेदस्य च नवशाखाः सन्ति। अद्यत्वे न समस्ताः शाखाः उपलब्धाः भवन्ति । मुख्यतया सम्प्रति यासां शाखानां संहिता उपलभ्यन्ते ता इमाः सन्ति, यथा ऋग्वेदे शाकलबाष्कलेति द्वे, यजुर्वेदे(शुक्ले) काण्वमाध्यन्दिनीयेति द्वे(कृष्णे) तैत्तिरीयमैत्रायणीकठ-कपिष्ठलेति चतस्रः । सामवेदे-कौथुमजैमिनीयराणायनीयेति तिस्रः, अथर्ववेदे च शौनकपैप्पलादेति द्वे उपलभ्यन्ते ।

यजुर्वेदः

यज् देवपूजासङ्गतिकरणदानेषु इति धातुः पाणिनिना धातुपाठे पठितः । तस्मादेव उसि प्रत्यये कृते यजुष् शब्दः निष्पद्यते, येन धात्वादिना यजुः शब्देन त्रयोऽर्थाः प्रतीयन्ते -

१. देवपूजा
२. सङ्गतिकरणम्
३. दानम् ।

कोशकारेषु वाचस्पत्यम् कोशकारेण वृत्तगीतिवर्जितत्वेन प्रश्लिष्ट-पठिताः मन्त्राः यजूंषि(वाचस्पत्यम्, पृ० ७९८) इति उक्त्वा वृत्तगीतिवर्जितेषु प्रश्लिष्ट पठितेषु मन्त्रेषु यजुष् शब्दः रूढ इति भणितम् । निरुक्तकारेण यास्केन यजुर्भिः यजन्ति(नि० १३,७) यजुः यजतेः (नि० ७, १२) इति निर्वचनेन च यैः मन्त्रैः यज्ञो विधीयते ते यजूंषि प्रोच्यन्ते इति कथितम् । जैमिनीय मीमांसासूत्रे: अनियताक्षरावसानो यजुः

१. द्रष्टव्यम्, म०भा० पस्पशाह्निकम्.

गत्यर्थको यजुः इति व्याख्यानं यजुषां अभियोगपरायणत्वं गत्यर्थकत्वं च सूचयति । अतएव प्राणो यजुः शब्दः वायौ रूढः । अत्र यजुष् शब्दस्य व्याख्यायामित्थं वर्णितम् -

अयं वाव यजुः, यो यं पवते, एष हि यन्नेव सर्वं जनयति एतं इदं अनुप्रजायते तस्माद् वायुरेव यजुः, अयं एव आकाशो जूः, यदिदमन्तरिक्षं एतं हि आकाशं अनुजवति, तदेतद् यजुर्वायुः अन्तरिक्षं च, यच्च जूश्च तस्माद् यजुरिति (शत०ब्रा०का० ७ अध्या० ३) ।

एवं यज् धातोः जु धातोश्च अयं शब्दः व्युत्पद्यते इति सिद्धम् । पण्डितानां प्रयुज्यमानः यजुः शब्दः मीमांसा-सूत्रानुसारं एव किं वा निरुक्त-व्याकृत-आर्षशास्त्रैः समाधेयम् ।

साहित्यविकासस्य तथा च पुराणविज्ञानस्य दृष्ट्या यजुर्वेदस्य स्थानं ऋग्वेदानन्तरमायाति । यद्यपि यजुर्वेदः सामवेदस्य ऋग्वेदस्य परवर्ती ग्रन्थो मतः(तत्स्थानीयो ऋतो वेदो । कौषीतकि ब्रा० ६, २) । तथापि याज्ञिक-उपासनायाः क्रियाविधेः अपि प्राचीन-भारतीय-धर्म दृष्ट्या च ऋग्वेदा-पेक्षया यजुर्वेदस्य अधिकं महत्त्वं वर्तते । ऋग्वेदे यदि होतृ-प्रयोगार्थ-देवानां आवाहन-मन्त्राणां संग्रहः, सामवेदे च उद्गातृ-गानाय आर्चिकमन्त्राणां गेयोपनिबन्धनमस्ति, तर्हि यजुर्वेदे विविध-यागानां सम्पादनोपयोगाय अध्वर्युणां संकलनं विद्यते ।

यजुर्वेदस्य अध्वर्युः एव यज्ञस्य समस्त-महत्त्वपूर्ण कार्याणां सम्पादको भवति । ऋग्वेदानुसारं च एव यज्ञस्य स्वरूप निष्पादनं करोति (यज्ञस्य मात्रां विमिमीत उत्वः ऋ० १०,७१,११) ।

यजुर्वेद द्वारा निष्पन्ने सति यज्ञकार्ये तस्मिन् औपचारिकं स्तोत्र-शस्त्ररूपात्मकं आवश्यकम् साम-ऋग्वेदाभ्यां पूर्णतां याति । एतस्मादेव

कारणात् केन च व्याख्याता सायणाचार्यः सर्वप्रथमं यजुर्वेदस्य व्याख्यान-मकरोत् ।[1]

यजुर्वेदस्य वैशिष्ट्यं प्रतिपादयन् कथयति सायणः -

भित्तिस्थानीयो यजुर्वेदः चित्रस्थानीयावितरौ । तस्मात् कर्मसु यजुर्वेदस्य प्राधान्यम् (तै०भा०भू० पृ०७) ।

तथा च यथा अगाराणि भित्तयो काष्ठादि चित्रणानि धारयन्ति, तथा च तेषु चित्रणेषु मणि-मुक्तादि चाश्रितं भवति, तथैव यजूंष्यपि यज्ञानि स्वरूपेण यज्ञानां रूपितं भवति, तथा च तासु ऋक्सामांशका: प्रायः समाश्रयन्ते ।[2]

<u>यजुर्वेदस्य सम्प्रदायद्वयम्</u>

यजुर्वेदस्य सम्प्रदायद्वयं विद्यते, ब्रह्मसम्प्रदायः आदित्यसम्प्रदायश्चेति । ब्रह्मसम्प्रदायस्य प्रतिनिधिः कृष्णयजुर्वेदः, तथा चादित्य-सम्प्रदायस्य प्रतिनिधिः शुक्लयजुर्वेदः । यजुर्वेदस्य शुक्ल-कृष्ण-विषये प्राचीनग्रन्थानां विविधेषु स्थलेषु दृष्टिपथमायाति -

---

१. यजुर्षि निष्पन्नं यज्ञशरीरं तदपेक्षितौ होत्रौद्गात्रौ अपरौ अभ्यर्हितत्वेन पूर्वं तैत्तिरीयशाखीयस्य यजुर्वेदस्य प्रथमतो व्याख्यानं युक्तम् । तै०भा०भू०पृ० ७.

२. यथैव भवनस्य स्यात् घटादि चित्रणम् ।
आश्रितं मणिमुक्तादि घटादौ यथा तथा ॥
यजूंषि यज्ञे स्यादृग्भिर्भित्तिचित्रणम् ।
सामाख्या मणिमुक्ताश्च तासु समाश्रिताः ॥ तै०भा०भू०पृ० ८३

## भूमिका

व्यासशिष्यस्य वैशम्पायनस्य याज्ञवल्क्यादयो बहवः शिष्याः आसन् यजुर्वेदमधीयानाः । अध्ययन-काले केनापि कारणेन गुरोः पापं किंचित् समुत्पन्नम् । तन्निवारणार्थं गुरुर्वैशम्पायनः स्वशिष्यानादिष्टवान् - मदर्थं यूयं व्रतं चरतेति । तदा याज्ञवल्क्यो विनयेन प्राह - गुरो किमेभिर्बालैः, अहमेक एव भवदर्थं व्रतं चरिष्यामि, येन भवन्तः पापान्मुक्ता भवेयुरिति । तादृशं ब्राह्मणाधिक्षेपकमभिमानं वैशम्पायनेन क्रुद्धेन याज्ञवल्क्यो भर्त्सनामाप्तः । यत वीडकेन मच्छिष्याणामवमानं कृतवानसि, अतो मत्तो धीतं सर्वमपि उज्झेति । याज्ञवल्क्यस्तु तथेति स्वीकृत्य तदनन्तरमेव गुरूपदिष्टं सर्वमपि यजुर्वेदमुद्गीर्य भगवन्तमादित्यं तपसा परितोष्य ततो वाजिरूपधरेण तेनोपदिष्टान्यपि यातयामानि यजूंषि स यावत् केनाप्यविदितानि लब्धवान् । तच्छाखा च वाजसनेयनाम्ना ख्याता । तान्यपि शुक्लान्युच्यन्ते इति आदित्यानीमानि शुक्लानि यजूंषि वाजसनेयेन याज्ञवल्क्येनाख्यायन्ते (श० १४.९.५.३३) इति शतपथं ब्राह्मणमप्यमुमर्थं पुष्णाति ।

एवं स्थितः स भगवान् वाजिरूपधरो हरिः ।
यजूंष्ययातयामानि मुनयेऽदात् प्रसादितः ॥ भाग० २,६,२२,

इत्यादि भागवतवचनानि चात्रानुकूलानि । यानि च याज्ञवल्क्येन वान्तानि, कृष्णानि तान्यभूवन् इति । वस्तुतः कृष्णयजुषि मन्त्र ब्राह्मणयोः संकीर्णत्वात् विविच्य बोद्धुं दुःशकत्वमभिप्रेत्य तस्य कृष्णत्वं, शुक्लयजुषि च मन्त्र ब्राह्मणयोः पृथग्भावादिस्पष्टौ यजुषस्तस्य शुक्लत्वमित्यभिप्रयन्ति । अन्यथा याज्ञिक-विषय-प्रतिपादन-क्रमे विशेषो भेदः शुक्ल-कृष्ण-यजुषोः संदिग्धत्वान्नोपलभ्यते ।

## शुक्लयजुर्वेदस्य शाखाः

शुक्लयजुर्वेदस्य पञ्चदशशाखाः सन्ति । (१) काण्वा (२) माध्यन्दिनाख्या, (३) जाबाला (४) तापायनीया (५) कापाला (६) पौण्ड्रवत्सा (७) आवटिका (८) परमावटिका (९) पाराशर्या (१०) वैधेया (११) वैणेया (१२) औधेया (१३) गालवा (१४) बैजवा (१५) कात्यायनीया चेति ।

सम्प्रति समुपलब्धशाखाद्वयोः संक्षिप्तं विवरणमत्र प्रस्तूयते -

### १. काण्व-शाखा

महर्षि कण्व द्वारा यस्याः शाखायाः प्रचारः प्रसारश्च कृतः, सा काण्व-शाखा वर्तते । कण्वः महर्षेः याज्ञवल्क्यस्य प्रथमः शिष्यः आसीत् । अतः शाखेयं प्रथमा शाखा अपि उच्यते । अस्याः शाखायाः संहितायां (काण्व संहितायाम्) ४० अध्यायाः, ३२८ अनुवाकाः, तथा च मन्त्राणां संख्या २०८६ अस्ति । माध्यन्दिन-शाखा पेक्षया अस्यां १११ मन्त्राः अधिकाः विद्यन्ते । काण्वसंहितायाः चत्वारिंशत्तमो अध्यायः ईशोपनिषद् अस्ति । काण्व-शाखायाः शतपथ ब्राह्मणे १०४ अध्यायाः सन्ति । अस्य चतुर्दशतमः काण्डस्य एको भागः बृहदारण्यकोपनिषद् वर्तते । काण्वसंहितोपरि सायणाचार्यस्य वैदुष्यपूर्णं भाष्यमुपलभ्यते ।

हलायुधाचार्येणापि अस्यां संहितायां ब्राह्मणसर्वस्वम् नामकं भाष्यमलिखत् । साम्प्रतं काण्वशाखायाः प्रचारः महाराष्ट्रप्रदेशे एव दृश्यते, किन्तु प्राचीनकाले अस्याः शाखा उत्तर-भारते प्रचलति स्म ।

२. माध्यन्दिन-शाखा

महर्षि-माध्यन्दिन द्वारा यस्याः शाखायाः अध्ययनाध्यापन-क्रमेण प्रचारः प्रसारश्चाभवत्, सा माध्यन्दिनीया शाखा । अस्याः शाखायाः संहितायां (माध्यन्दिन - संहितायाम्) ४० अध्यायाः, ३०३ अनुवाकाः, मन्त्राणां संख्या च १९७५ अस्ति । माध्यन्दिन-शतपथ-ब्राह्मणे शतं (१००) अध्यायाः सन्ति । बृहदारण्यकोपनिषद् अस्य चतुर्दशकाण्डस्य षष्ठो भाग अस्ति । सम्प्रति भारते सर्वे अस्याः शाखायाः बहुसंख्यका अनुयायिनः समुपलभ्यन्ते । आचार्योव्वट-महीधराभ्यां अस्यां संहितायां च वैदुष्यं भाष्यं प्रणीतम् । अनयोः उव्वटः पूर्वकालिकः, महीधरः पश्चात्कालिक इति ।

वेदाङ्गानि

वेदा हि दुरूहाः । न सर्वसाधारणेनाभ्यर्थावगमः सामान्यतया कर्तुम् । अतस्तेषामर्थप्रत्यायनापेक्षितानां विषयाणां परिचय अत्यावश्यकः । कृते [illegible] स्वानुभूय आचार्यैः । तस्य वेदार्थावगमाय ग्रन्था आरब्धाः । एतानि वेदार्थोपकारकाणि ग्रन्थानि वेदाङ्गानीति व्यपदिश्यन्ते । मीमांसा दर्शनमपि उपकारकत्वेनाङ्गानामन्यतमं निर्दिष्टः । अज्यन्ते ज्ञायन्ते आभिरित्यङ्गानि इति व्युत्पत्त्या शास्त्रेण वस्तुस्वरूपाणि उपकारकाण्यङ्गानि भवन्तीति ज्ञायते । तानि च वेदार्थोपकारकाणि षट् सन्ति ।

शिक्षाकल्पौ व्याकरणं निरुक्तं छन्दो ज्योतिषमिति षडङ्गानि

इति षण्मुखीवर्त्यां[1] शिक्षा, कल्पः, व्याकरणम्, निरुक्तम् छन्दःशास्त्रम्, ज्योतिःशास्त्रम् च वेदाङ्गानीति । वैदिकमन्त्राणां शुद्धो-च्चारणोपकारकं शिक्षाशास्त्रमस्ति । वेदानां मुख्यं प्रयोजनं यज्ञक्रियानुष्ठा-नेनापूर्वप्राप्तिर्वर्तते इति ।

वेदा हि यज्ञार्थमभिप्रवृत्ताः[2]

यज्ञादिभिर्वेदोऽनुसृतः । यज्ञक्रियाणामेव यथास्थानं विनियोगं कल्पात्मकं वेदाङ्गमुपदिशति । शब्दस्वरूपे तत्साधुत्वासाधुत्वविवेचना-यास्ति व्याकरणमङ्गम् । निरुक्तेन वैदिकानां शब्दानां पदानामर्थप्रत्यायनं निर्वचन-प्रणाल्या क्रियते । छन्दःप्रभृतीनां वैदिक-मन्त्राणां यथाविधि पाठोच्चारणाय च छन्दःशास्त्रमावश्यकमस्ति । यज्ञानुष्ठानेषु तत्काल-परिज्ञानाय ज्योतिःशास्त्रस्योपयोगित्वं सुप्रथितमस्ति । अत एव वेदात्मकस्य पुरुषस्याङ्गान्यपि प्राचीनाचार्यैरित्थं कल्पितानि -

शिक्षा घ्राणं तु वेदस्य हस्तौ कल्पो च पठ्यते ।
ज्योतिषामयनं चक्षुः निरुक्तं श्रोत्रमुच्यते ॥
छन्दःपादौ तु वेदस्य मुखं व्याकरणं स्मृतम् ॥पा० शि०भाग-२.

कल्पः

स्वयमस्माभिरवगतं यत्कल्पाङ्गं वेदपुरुषस्य हस्तस्थानीयमुच्यते । हस्ताद्ृते हि न पुरुषः स्वीयक्रियानुष्ठानं सम्यक् सम्पादयति । एवमेव न

---

१. का०सू० पृ० सं० २.
२. आ०ज्यो०.

कल्पं विना यज्ञयागस्य वेदस्य क्रियानुष्ठानं सम्भवति । अतश्च वेदाङ्गेष्वपि कल्पशास्त्रस्य प्रामुख्यम् । यद्यपि यज्ञक्रियानुष्ठानस्य विविधं ब्राह्मणग्रन्थेष्वपि क्रियते । परं तेषां पाठक्लिष्टत्वात् परोक्षप्रियत्वाच्च कल्पाङ्गमिह यज्ञक्रियानुष्ठानविधानार्थं सुतरां समर्थमिति सर्वैरपि मन्यते ।

कल्पशब्दस्यार्थो निर्वचनेन एवं उच्यते - कल्प्यते समर्थ्यते यागप्रयोगो अत्र इति व्युत्पत्त्या याग प्रयोगाणां समर्थकं शास्त्रं कल्प उच्यते । अथवा (प्रयोगाणां) कल्पो वेदविहितानां कर्मणामानुपूर्व्येण कल्पनाशास्त्रम् व्युत्पत्त्या वेदोक्तकर्मणां सम्प्रयोगकल्पकं शास्त्रं कल्प इति । उभयथापि संस्कारस्य न कापि विप्रतिपत्तिर्दृश्यते । तदिदं कल्पशास्त्रं सूत्रेषूपनिबद्धम् ।

सूत्रसाहित्यम्

सूत्र-साहित्यं भारतीयवाङ्मयस्य विशिष्टं वैभवमस्ति । स्वीयया विशिष्टतया शैल्या सङ्क्षिप्तैः समासैः किं बहुना अक्षरे पि सम्पन्नमस्ति सूत्रसाहित्यमिदम् ।

वैदिकसाहित्ये सूत्राणां कालः अध्ययनचिन्तनपरम्परायाः परमोत्कर्षः प्रतीयते । वैदिक-साहित्यस्यावशिष्टांशेन सह सम्बन्धात्मकमिदं सूत्रसाहित्यं संस्कृतभाषायाः शृङ्खलात्वं धारयति । सूत्रं नाम तन्तुः । सूत्रेषु लघुतमानि अतिस्वल्पाक्षराणि, सारगर्भिताणि च पदानि एकेन तन्तुना नियोजितानि भवन्ति सूत्रमित्यन्वर्थनाम । वैदिकव्याकरणमितरयाः पद्धत्याः दर्शिष्यामः । पाश्चात्यविद्वद्भिः सूत्राणां रचनाकालोऽयं निर्धारितं वर्तते । यथा हि प्रख्यातिप्राप्तो विद्वान् मैक्समूलरमहोदयः[1] -

---

१. हिस्ट्री आफ् एंशेंट संस्कृत लिटरेचर, पृ० ३७.

## भूमिका

" Evry doctrine thus propounded, whether grammer, metre, law or philosoply, is reduced to a mere skelton. All the impostant points and jointe of a System are laid open with the greatest precision and clearness, but there is nothing in these works connection or develoment of ideas.

[illegible] सूत्र[illegible] वक्ति -

" Every apparent simplicity of design vanises in the perplexity of the structure. The endless pursuit of exceptions and limitations so disjoins general precepts, that the reader cannot keep in view their intended connection and mutual relation. He wonders in an intsicatemaze, and the clue to the labyrinth is continuelly slipping from his hands."

एवं [illegible] पाश्चात्याः सूत्राणां [illegible] न [illegible] । सूत्ररचनायां [illegible] विषयः [illegible] संक्षेपेण प्रस्तुते [illegible] । यथा हि विंटरनित्समहोदयः[1] -

" There is probably nothing like these sutras of the Indians in the entire literature of the world. It is the task of the auther of such a work to say as much as possible in as few words as possible, even at the expense of clearness and intelligibility."

विंटरनित्समहोदयस्य कथनमिदं [illegible] सूत्रं सर्वं मन्यन्ते वैयाकरणाः [illegible] पाणिनीयसूत्रे[2] [illegible] । तथापि [illegible] केवल सूत्रैस्या[3] [illegible] । [illegible] सूत्राणां [illegible], तथापि -

---

1. हिस्ट्री आफ इण्डियन लिटरेचर, पृ० २६५.
2. पाणिनि[illegible], १३८.
3. हिस्ट्री आफ एन्शिएंट संस्कृत लिटरेचर, पृ० ६५.

भूमिका

" There is no life and no spirit in these sutras, except what either a teacher or a running commentary, by which these works are usually accompanies, may import to them. "

पर्यालोचनेनापि च सूत्रग्रन्थस्य वैशिष्ट्यं किमपि न्यूनत्व-मभिधातुं युज्यते । यतो हि तात्कालिके परिवेशे न सूत्रग्रन्थैरन्तरा शास्त्राणां रक्षा कर्तुं शक्या आसीत् । लेखन-प्रणाल्याः अभावेन मौखिकमेव अध्ययनाध्यापनेन धारणं सम्भाव्यमासीत् । तत्र च दीर्घग्रन्थस्य विषयोपदेशः सूत्रग्रन्थैरेव कर्तुं शक्यमासीत् । एतत् सूत्रग्रन्थस्यैव माहात्म्यं यत् सहस्राब्दयोऽपि पूर्वं प्रणीतस्य भारतीयार्थशास्त्रस्योपलब्धिरधुनापि यथेष्टं भवति । सूत्र-ग्रन्थमिदं महर्षीणां तत्त्वज्ञानां मननचिन्तनानुभवचिन्तनपरिणामरूपं ज्ञानकल्पद्रुमत्वं ददाति ।

वेदं सूत्रग्रन्थस्याविच्छिन्ना परम्परा अत्यन्तं प्राचीना वर्तते । भारतीये साहित्ये मन्त्रब्राह्मणात्मको हि वेद-शब्दराशिः श्रुतिरित्यभिधीयते, तस्यापौरुषेयत्वं च विद्वद्भिः साध्यते । वेदा हि ऋषिभ्यो दृष्टाः न तु विरचिता इत्येषा मान्यता प्रचलिता । वेदाङ्गानि तु श्रुत्यनुकूलान्यपि श्रुतिभ्यो भिन्नानि, ततश्च पौरुषेयाणि । कल्पाङ्गीभूताः श्रौत-गृह्य-धर्मसूत्रादि ग्रन्थाः अपि पौरुषेयाः स्मृतिरूपत्वेन वैदिकवाङ्मये प्रमाणतया तिष्ठन्ति । अतः केचिदाचार्याः स्मृतीनामपि विशिष्टमपौरुषेयत्वं युक्ति-प्रमाणादिभिः साधयन्तः स्मृतीनां सूत्राणां श्रुतिवदविच्छिन्नसम्प्रदाय-प्रामाण्यं निर्दिशन्ति । अथापीदं निर्विवादं यत् पौरुषेयाण्यपि सूत्राणि प्रमाणान्येव । स्मृतीनां प्रामाण्यं श्रुत्यनुकूलतयैव भवितुमर्हतीति कुमारिल-भट्टेन साधितम् -

श्रुतिविज्ञानविषयज्ञानं स्मृतिरित्युच्यते ।
श्रुतिज्ञानाद् विना तस्याः प्रामाण्यं नावधार्यते ।।
।।कारिका ।।

वेदाङ्गानां स्मृतिसमाख्याप्रसिद्धत्वे ऽपि स्मृतित्वं तेनैव निर्दिष्टम्, यथा -

यद्यपि स्मृतिशब्देन षडङ्गानामभिधानता ।
तथाप्येषां न शास्त्रत्वप्रमाणत्वनिराक्रिया ।।

वस्तुतस्तु श्रौतगृह्यधर्मसूत्रात्मके कल्पे त्रेधा ये धर्माः श्रुतिभ्यः उपदिष्टास्त एव धर्माः स्मृतिषु लोकहितोपनिबद्धाः प्रायशो दृश्यन्ते । अतो न को ऽपि विरोध उभयोर्मध्ये ।

यज्ञानुष्ठानप्रतिपादकानि ब्राह्मणानि सन्ति । परं न कल्पसूत्राणां साहाय्येन विना यज्ञानुष्ठानसम्पादनं कर्तुं शक्यमिति कुमारिलभट्टेन कल्पसूत्राणां वैशिष्ट्यं प्रतिपादयतोक्तम् -

वेदादृते ऽपि कुर्वन्ति कल्पैः कर्माणि याज्ञिकाः ।
न तु कल्पैर्विना केचिन्मन्त्रब्राह्मणमात्रकात् ।। इति

अत एव स्मृतिरूपाण्यपि कल्पसूत्राणि श्रुतिवदेव प्रामाणिके ग्रन्थे स्वाध्याये पुरा समादृतान्यासन् । कल्पसूत्राणि क्वचिच्छाखाभेदेन भिन्नानि क्वचिच्चाभिन्नान्यपि समुपलभ्यन्ते । अतो नैकः पक्षो निर्णेतुं शक्यते यत् प्रतिशाखं भिन्नानि कल्पसूत्राण्यासन्, प्रतिवेदं वा भिन्नान्यासन्निति हिरण्यकेशिसूत्रटीकाकृता महादेवेनाप्यभिहितम् -

तत्र कल्पसूत्रं प्रतिशाखं भिन्नमभिन्नमपि क्वचित् शाखाभेदे अध्ययन-भेदाद् वा पुरुषभेदाद् वा । आश्वलायनीयं कात्यायनीयं च सूत्रं हि भिन्ना-

अध्ययनीयाश्चैषां शाखीयैर्विहित । तैत्तिरीयके च यथा मन्त्रे यजूंषि नानासूत्राणि । एतेन च सूत्रैः शाखाभिः शाखाभिः च सूत्रैः इति परम्परा-श्रय इति वाच्यम् ।

अतएव महादेवेनाचार्येण कल्पसूत्राणामविच्छिन्नपरम्परां बोधयता स्वीयग्रन्थोपोद्घाते स्पष्टतया श्रुतत्वं साधितं यथा -

न हि सूत्राणां कर्तृत्वाभिमानोऽपकर्षः, किन्तु नानाकल्पनासु तत्तन्नामक महर्षिभ्यः अपितु नित्या, तत्तच्छाखासूत्रेषु च नित्यां व्यवस्था-तथ्या तिष्ठति यथा पुरुषनामाङ्कितासु इति ।

एतानि हि कल्पसूत्राणि मुख्यतया चतुर्धा विभक्तुं शक्यन्ते - श्रौतसूत्राणि, गृह्यसूत्राणि, धर्मसूत्राणि, शुल्बसूत्राणि च । श्रौतसूत्रेषु श्रुतिषु प्रत्यक्षं प्रतिपादितानि श्रौताग्नि साध्यानि क्रियाबहुलानि यज्ञात्मकानि कर्माणि समुपदिष्टानि । गृह्यसूत्रेषु गृह्याग्नि-साध्यानि, संस्कार-पुष्ट्यादि प्रतिपादकानि, भावप्रधानानि च कर्माण्युपदिष्टानि । धर्मसूत्रेषु वर्णाश्रम-धर्माचाराणामुपदेशो स्ति । शुल्बसूत्रेषु च प्राचीनस्य भूमानशास्त्रस्य वेद्यादिनिर्माण प्रक्रिया निर्देशः ।

साम्प्रतिके हि काले श्रौताग्निविरहात् विधावतामृत्विजामनुपलम्भात् अनुष्ठेयक्रियाबाहुल्यात् पञ्चाग्निसाध्य प्रतिकूलपरिस्थिति-परिवेशाच्च श्रौतानि कर्माणि न प्रचलितानि सन्ति । तदाधारत्वेन विरचितानि शुल्बोक्तानि वेद्यादि कर्माण्यपि न प्रयोगेषु प्रचारं लभन्ते । वैदिकयज्ञानुष्ठानकर्मे धारावाहिक भारतीयेषु गृह्यकर्मणामादरः ।

भूमिका

<u>गृह्यसूत्रपरिचयम्</u>

श्रौतसूत्रेषु अग्निहोत्र-दर्शपूर्णमासचातुर्मास्यादि इष्टीनाम्, अग्निष्टोमादिसोमयागानां चोपदेशः । धर्मसूत्रेषु तु वर्णाश्रमाचारधर्माणामभिधानम् । परं गृह्यसूत्राणि हि गृहस्थं मनुष्यं प्रयुञ्जन्ति गार्हस्थ्यानि कर्माणि विशेषतः प्रतिपादयन्ति । गृह्यसूत्रेषु च विषयबाहुल्यमस्ति । यथा गर्भाधान-पुंसवन-सीमन्तोन्नयनादि विवाहाद्यन्त्यकर्मान्ताः मानवस्य जन्मनो पि प्रागपि क्रियमाणाः संस्काराः औपासन होमादयो दर्शपूर्णमास यज्ञाश्च विशिष्टेषु कालेषु प्रत्यहं च क्रियमाणाः पञ्चमहायज्ञास्तथा, नैमित्तिकानि च गृहनिर्माण-वास्तुसम्प्रवेशनादि कर्माणि, शान्तिकर्माणि, पुष्टिकराणि कर्माणि स्वार्थोपयोगीनि अभिचारकर्माणि, ये बहुना राजसमादराणि सद्गुणविशेषोपपादकानि, वापीकूपतडागाद्युत्सर्गादीनि, प्रतिष्ठाकरणानि, मानवस्य सर्वतोभावेन अभ्युन्नतिकराणि कर्माणि उपदिष्टानि सन्ति ।

गृह्यसूत्राणां विषयवस्तुविस्तृतमवलोक्य प्रसिद्धो विंटरनित्स-महाशयो ब्रवीति[1], यथा -

" The contents of the Ghryasutras are still more manifold, and in some respects more interesting, the contain directions for all usages, ceremonies and secrefices by virtue of which the life of the Indian receives a higher sanctity, what the Indians call Sanskara, from the moment when he is conceived in the womb, till the hour of his death and still further through the death ceremonies and cult of the soul."

---

१. हिस्ट्री आफ् इण्डियन लिटरेचर, पृ० ८८८.

सामवेदीयानि गोभिलखादिर-जैमिनीयगृह्याणि अथर्ववेदीयं च कौशिकगृह्यसूत्र-मित्यादीनि गृह्यसूत्राणि सम्प्रत्युपलभ्यन्ते । एतेषां परिचयः प्रस्तूयते -

१. आश्वलायनगृह्यसूत्रम्

ऋग्वेदेन सम्बद्धमिदं गृह्यसूत्रमध्यायचतुष्टयात्मकमस्ति । अध्यायेष्वपि खण्डशो विभागः । अस्य गार्ग्यनारायणहरदत्तयोः वृत्ती पूर्वं सम्प्रत्युपलब्धे स्तः । गृह्यसूत्रेऽस्मिन् प्राचीनाचार्याणामुक्तयः एतस्य पारम्पर्यं द्योतयन्ति ।

२. शांखायनगृह्यसूत्रम्

ऋग्वेदीयमपरं गृह्यसूत्रं सुप्रसिद्धं प्रमाणमस्ति । कौषीतकिब्राह्मणा-नुगतमिदं सूत्रं षडध्यायात्मकमस्ति । एतस्यापि भाष्यमुपलभ्यते ।

३. कौषीतकिगृह्यसूत्रम्

शाम्बव्यप्रणीतमिदं गृह्यसूत्रं शाम्बव्यगृह्यसूत्रनाम्नापि व्यपदिश्यते । ऋग्वेदस्य शांखायनकौषीतकिशाखे एकत्वेनैव यावत् विद्वद्भिः प्रतिष्ठापिते । परं सूत्रद्वयावलोकनेनेदं सुनिश्चितं भवति यदुभे अपि भिन्ने स्तः । शांखा-यनसूत्रादेतत् सूत्रं विषयदृष्ट्या समानमपि रचनादृष्ट्या विभिद्यते । सूत्रेऽस्मिन् पंच अध्यायाः सन्ति ।

४. बौधायनगृह्यसूत्रम्

कृष्णयजुर्वेदेन सम्बद्धेषु गृह्यसूत्रेष्वन्यतममिदं गृह्यसूत्रमस्ति । अस्य कर्ता बौधायनेति नाम्नैव ज्ञातुं शक्यते । सूत्रमिदं कृष्णयजुर्वेदीयगृह्यसूत्रेषु विस्तृततममस्ति ।

५. आपस्तम्बगृह्यसूत्रम्

इदमपि गृह्यसूत्रं कृष्णयजुर्वेदीयं वर्तते । गृह्यसूत्रेऽस्मिन् त्रयोविंशति खण्डाः सन्ति । अत्र सूत्रे वैदिकैर्विद्भिः भूरिपरिश्रमः कृतः । ओल्डेनबर्ग-महाशयेन सूत्रमिदमांग्लभाषायामनूदितम् । डा० विंटरनित्समहोदयेन सूत्रस्यास्य सम्पादनं कृतमस्ति ।

६. हिरण्यकेशिगृह्यसूत्रम्

सत्याषाढगृह्यसूत्रापराभिधं कृष्णयजुर्वेदीय तैत्तिरीयशाखानुसारि हिरण्यकेशिगृह्यसूत्रमस्ति । वियनाविद्यालयीय क्रिस्टेमहोदयेनास्य संस्करणं सर्वतः प्रथमं प्रकाशितम् । सूत्रस्यास्यापि आंग्लभाषानुवादो जातः । अत्र महादेव कृता वैजयन्ती व्याख्या प्रकाशिता वर्तते ।

७. भारद्वाजगृह्यसूत्रम्

इदमपि सूत्रं कृष्णयजुर्वेदीयं प्रकाशितं वर्तते । १९१३ ईस्वीये लाइडेन स्थानादिदं प्रकाशितमासीत् ।

८. मानवगृह्यसूत्रम्

कृष्णयजुर्वेदीयमिदं गृह्यसूत्रं मैत्रायणीशाखया सम्बद्धमस्ति । अस्य अष्टावक्रभाष्यमप्युपलभ्यते ।

९. काठकगृह्यसूत्रम्

इदमपि कृष्णयजुर्वेदीयं सूत्रं कठशाखया संबद्धं वर्तते । अस्यैवापरनाम लौगाक्षिगृह्यसूत्रमपि वर्तते । अत्र सूत्रे पंचस्वध्यायेषु सप्तत्रिंशत्कण्डिकाः सन्ति ।

अध्यायपंचकमात्रमिदं सूत्रं गृह्यपंचिकेति नाम्नापि व्यपदिश्यते । भाष्यत्रयोपेत-मिदं सूत्रं त्रावणेतः १९८१ वैक्रमाब्दे डा० कैलण्ड महोदयेन प्रकाशितं वर्तते ।

## १०. गोभिलगृह्यसूत्रम्

सामवेदीयगृह्यसूत्रेषु सर्वप्रथममिदं गोभिलगृह्यसूत्रम् । रचना वैशद्या अस्य प्राचीनत्वं महत्त्वं च स्पष्टं भाति । सामवेदीयमन्त्रब्राह्मणयोरप्यस्मिन् उद्धरणान्यत्र दृश्यन्ते ।

## ११. खादिरगृह्यसूत्रम्

सामवेदीयमिदं राणायनीयशाखीयं गृह्यसूत्रमस्ति । इदं हि गोभिलगृह्यसूत्रेण बहुशः संवदति ।

## १२. जैमिनीयगृह्यसूत्रम्

इदमपि गृह्यसूत्रं सामवेदीयमस्ति । सामवेदस्य जैमिनीयशाखा-संबन्धमिदं वर्तते । खण्डद्वये विभक्ते ऽस्मिन् सूत्रे सार्धशतं कण्डिकाः सन्ति ।

## १३. कौशिकगृह्यसूत्रम्

अथर्ववेदीयमिदमेकमात्रं कौशिकगृह्यसूत्रम् । अत्र सूत्रे चतुर्दश अध्यायाः सन्ति । अस्योपरि दारिल केशव ब्लूमफील्ड कैलण्डादयैः महत्त्वपूर्णाः व्याख्याः टिप्पण्यश्च विरचिताः । गृह्यसूत्रमिदं प्राचीनभारतीय-यातुविद्यायाः ज्ञापकं वर्तते । गृह्यसूत्रस्यास्य सर्वप्रथमं संस्करणं डा० ब्लूमफील्ड महोदयेन अमेरिका-देशात् १८९० ईसवीयाब्दे सम्पाद्य प्रकाशितमस्ति ।

भूमिका

पारस्करगृह्यसूत्रम्

शुक्लयजुर्वेदीय स्मार्तं गृह्यसूत्रमस्ति पारस्करगृह्यसूत्रम् । अस्य कर्ता कात्यायनाचार्यः पारस्करेति अपरनामधेयो वर्तते । अस्य त्रिषु काण्डेषु प्रथमकाण्डे - आवसथ्याधानम्, विवाहः, गर्भाधान-पुंसवन-सीमन्तोन्नयन-जातकर्म-नामकरण-निष्क्रमण-कर्णवेधन-अन्नप्राशनादि संस्कारकर्माणि वर्णितानि । द्वितीये काण्डे तु चूडाकरण-उपनयन-समावर्तन-पंचमहायज्ञ-श्रवणाकर्म-सीतायज्ञ-विवरणं च वर्तते । तृतीय-काण्डे श्राद्धानन्तरम्, अवकीर्णि प्रायश्चित्तादि विविधानुष्ठानानां विधेः प्रतिपादनम् ।

गृह्यसूत्रस्यास्य व्याख्यानपरम्परास्य लोकप्रसिद्धेः परिचायिका अस्ति । अस्य पंचव्याख्याकाराणां व्याख्याः गृह्यसूत्रस्यास्य अंशोत्र प्रकाशन्ते । अस्य पंच व्याख्यातारः कर्क-जयराम-हरिहर-गदाधर-विश्वनाथादयः सन्ति । हरिहरस्य पद्धतिः शुक्लयजुर्वेदिनां कर्मकाण्डस्य विवाह-प्रतिमादिका महत्त्वपूर्णा अस्ति । कात्यायन-श्राद्ध-सूत्रं श्राद्धविषयं विस्तार-पूर्वकं प्रतिपादयति । अस्मिन् नवकण्डिकाः सन्ति प्रत्येकासु कण्डिकासु सूत्राणि राजन्ते । अस्योपरि तिस्रः टीकाः प्रकाशिताः सन्ति, प्रथमा - कर्कस्य, द्वितीया - गदाधरस्य, तृतीया च कृष्णमिश्रस्य श्राद्धकाशिका नाम्नी (रचनाकाल विक्र० १७०५ - १७७८ ई०) एतासु अस्य व्याख्यायाः समुल्लेखः श्राद्धकाशिकायाः प्रारम्भे द्वितीये श्लोके मिलति ।

पारस्करगृह्यसूत्रस्य कर्ता

पारस्करगृह्यसूत्रस्य रचना केन कदा कृता न कोऽपि वेत्ति । तथापि विदुषां मतमिदं यत् पारस्कर शब्दः देशवाची वर्तते । अस्य शब्दस्य देशवाचित्वं पाणिनिना अपि स्वीकृतम् । अतः कात्यायनीय कात्यायनश्रौत-

सूत्रं विरच्य पारस्करगृह्यं प्रणीतम् । कात्यायन एव पारस्करापराभिध: न तु अन्य । यद्यपि संस्कृतसाहित्ये बहव: कात्यायनाभिधा: सन्ति, तेषु सर्वेष्वेव कात्यायनश्रौतसूत्रकार: प्राचीनतम: इति ।

कात्यायन:

प्राचीन-भारतीय-व्यवहार-दर्शन-शास्त्र-बृहस्पति-कात्यायना: निरन्तरमेव आयान्ति । कौटिल्य-याज्ञवल्क्य-पराशर-नारद: कात्यायनस्य धर्मसूत्रं स्वीकृतवन्त: । बौधायन-धर्मसूत्रेऽपि एष: कात्यायन: प्रमाणरूपेण धृत: । शुक्लयजुर्वेदस्य श्रौतसूत्रम्, गृह्यसूत्रम्, भाष्यं वाजसनेयिप्रातिशाख्यम्, सर्वानुक्रमणी च कात्यायनस्य एव कृतय: सन्ति । आचार्यस्यास्य काल निर्णये मतमतान्तराणि सन्ति । सुप्रसिद्धो विद्वान् डा० पाण्डुरङ्गवामन काणे महोदय: कात्यायनस्य कालं ४००-३०० ईसवीयपूर्वमध्ये स्वीकरोति । काशीहिन्दूविश्वविद्यालयस्य डा०वीरेन्द्रकुमारवर्ममहोदयै: आचार्यस्यास्य काल: ३०० ई०पू० स्वीकृत: ।

वस्तुत: कात्यायनस्य देशकाल विषये तु न स्फुटं किमपि विज्ञायते । ऐतिहासिकैरपि एतद्विषये स्फुटं निर्णेतुं न पारितम् । कात्यायन: वररुचि: इत्यादीनि नामान्यपि बहुदेशकालव्यवस्थितानामनेकासां व्यक्तीनां सम्भाव्यते इति तेषां देशकालनिर्णये मतमतान्तराणि । कात्यायनो हि यजु: श्रौतसूत्रकार: एक:, यस्य पारस्करगृह्यसूत्रम्, भाष्यं, वाजसनेयि-प्रातिशाख्यम्, सर्वानुक्रमणी च ग्रन्था: सन्ति । अयं कात्यायन: प्राचीनतम: प्रतिभाति । पाणिनि: सूत्र-वार्तिककारो पि कात्यायन:, स्वर्गारोहणकाव्यनिर्मातापि च कात्यायन उच्यते । अत्र सर्वे एक एव वा भिन्ना इति चिन्त्यो ऽयं प्रश्न: । एवं वररुचिरपि एक: कौटिल्येन स्मृतो ऽसौ राजनीतिराचार्यवर्ण स्मृत: । एकश्च विक्रमस्य सभायां नवसु रत्नेष्वपि स्मर्यते, वाररुचं काव्यं चापि अत्र तत्रोल्लिख्यते - इति सर्वाण्येतानि भिन्नानि वा इदं वक्तुं दुष्करम् । अतएव

भवति वक्तुम् - यत् व्याकरणशास्त्रे पाणिनि कात्यायनयोः समकालिकत्वं परम्परं विद्भिः कात्यायनादिकस्य यदुपन्यस्यते, तत्तु प्रायेण कात्यायनस्यैव प्रतीयते । उभयतोऽस्मात् पाणिनिकात्यायनयोर्बहुकालव्यवधानमनुमीयते । यच्च व्याकरणशास्त्रे कौशाम्बीनिवासित्वं कात्यायनस्योक्तम्, कौशाम्बी च प्राग्देशान्तर्गतेति सम्भावयन्त्यैतिहासिकाः, तदपि चिन्त्यमेव । भाष्यकारो हि प्रियतद्धिता दाक्षिणात्याः यथा लोके वेदे चेति प्रयोक्तव्ये यथा लौकिकवैदिकेष्विति प्रयुञ्जते इत्यादिना दाक्षिणात्यत्वेन वार्त्तिककार- मुक्तवान् । तेनानेन दृढेन प्रमाणेन कात्यायनस्य दाक्षिणात्यत्वं स्फुटी- भवति । ततश्च प्राग्देशान्तर्वासित्वं न तस्य सम्भवति । यदि तु कौशाम्बी दक्षिणप्रान्त एव क्वचित् कोऽपि सम्भवति कौशाम्बीवासित्वम् । भाष्य- कारसमये कुत आरभ्य दक्षिणदेशो गण्यते स्म, इत्यपि निर्णेतुं दुःशकम् । ततश्चाभिजननिर्णयोऽपि कात्यायनस्य न पूर्णतया विधातुं शक्यः । दाक्षि- णात्यः स आसीदित्येतावन्मात्रं भाष्यादस्य निश्चितं प्रतीयते ।

अथास्य कालविषये पाश्चात्त्यैः पूर्वं चतुर्थं शतकं तस्य काल इति कल्पयन्त्यैतिहासिकमनीषिणः । दृढं प्रमाणन्तु तत्र न किमप्युप- लभ्यते, केचित्तु पाण्डोर्ड्यण् इति वार्त्तिककरणात् पाण्ड्यराज्यपरिचयः कात्यायनस्यासीत्, पाणिनिस्तु तदर्थं सूत्राकरणात् पाण्ड्यराज्यपरिचय- स्तस्य नासीदिति संभावयन्ति । परं सर्वमिदमूहानुमानमात्रम् । पाणिनेः पश्चात्त्या एव शब्दाः कात्यायनेनोपसंख्याता इति कुत्सितः सिद्धान्त एव न तर्कयुक्तम् । पाण्ड्यराज्यस्य स्थापनकालोऽपि यावदद्य सम्यङ् न निश्चितः । तस्मात् कालस्य सम्यङ् निर्णयो नास्ति ।

पर्यालोचनेन प्रतिभाति यत् कौटिल्यीये ग्रन्थे ये राजनीत्याचार्याः परिगणिताः तेष्वन्यो वररुचिरपि स्यादिति विशेषेण सम्भाव्यते ।

पाणिनिप्रकरणोक्तस्तस्य कात्यायनापरनामधेय वररुचिः कौटिल्य-पूर्ववर्त्तमानासीत् । भाष्यकृतः पतञ्जलेः कात्यायनस्य च काले चतुश्शताब्दा-व्यवधानमावश्यं भवितव्यमिति सम्भाव्यते ।

तत्प्रकरणमभिलक्ष्योऽपि केवल साध्यति । इदमपि प्रमाणं देशीयमस्तु यत् वार्तिककृता 'आप्रत्ययविधान' यथा यदा त् क्रियमाणे प्रत्यय पदसम्बन्धात्तदनुपपत्तं स्यात्, तद् भाष्यकृता कथं नाम यथा त् नास्ति ख्यात् वक्तव्यता प्रत्याख्यातम् ।

तेषां समये सुमात्रं यद् कात्यायनकाले यथा [illegible] साधुत्वम् - आसीद् तदुत्तरदिना भाष्यकाले प्रयोगाभावात्, भाष्यकाले तु तन्निवृत्त-मिति । एवं विधं तामायिकं परिवर्तनं तावत्कालेन सम्भवता यन्नो चतुश्श-ताब्दाकाल-व्यवधानमावश्यं भाव्यम् । तस्मात् पाश्चात्त्याः [illegible] वा कल्पना अपि न सम्भवति कात्यायनकाल-सम्बन्धिनः ।

कथासरित्सागरे तु नन्दराजकाले स्थितः पाणिनिसमकालिक व्यापृत इति साधितम् । तत्र केचिदाविदूष्ट्या न प्रामाणिकत्वमित्यपि कौटिल्य-पूर्वम् । इदमपि स्मर्तव्यम् - कल्पसूत्र [illegible] व्याडिः इति व्याडिनाम कात्यायनः स्मरति । तेन व्याडिना पाणिनिसूत्र व्याख्यानः संग्रहो निर्मित इति यदि वयं मन्ये तस्मात् पश्चादेव कात्यायनेन भवितव्यम् । तस्मात् पाणिनिस्य च [illegible]-काल-व्यवधानमावश्यकमेव ।

वस्तुतः बहवः कात्यायनाभिधाः जना अभवन् येषां समुल्लेखो भिन्न-भिन्न काले भिन्नभिन्नैः लेखकैः स्व-स्वग्रन्थेषु कृतम् । तेषु सर्वेषु प्राचीनतमो विद्वान् कात्यायनः शुक्लयजुःप्रातिशाख्यकारः अस्ति । तस्य समयः अनुमानतः ६० ई०पू० सम्भावयितुं निर्णयः ।

## पारस्करगृह्यसूत्रस्य भाष्यकाराः

### कर्कः

कल्प-सूत्रेष्विव कर्कः प्राचीनतमः भाष्यटीकाकारश्च वर्तते । अनेन कात्यायनश्रौतसूत्र-पारस्करगृह्यसूत्रयोश्च टीका विरचिता । हेमाद्रि-महाशयेन स्वीये कालनिर्णये (१३ शताब्द्याः अन्तिमचरणे) त्रिकाण्डमण्डन-स्योल्लेखः कृतः । असौ स्वग्रन्थे आपस्तम्बाश्वलायनकात्यायनानां स्थले तत्सूत्राणां कर्काचार्यस्य स्मरणमकरोत् । हेमाद्रिः श्राद्धनिर्णयप्रकरणे कर्क-मतस्य चर्चां चकार । अतः हेमाद्रि-त्रिकाण्डमण्डनापेक्षया प्राचीनतरः कर्काचार्यः । आचार्यवर्यस्य व्याख्यानाम गृह्यसूत्रभाष्यम् अस्ति, यस्योपरि बहुभिः विद्वद्भिः नामस्तोमोऽपि टिप्पणिकाद्याः उल्लेखाः कृताः, यः खलु श्रीगुप्तभाण्डारकरैः अस्य मुद्रणम् वर्तते । प्राचीनभाष्यकाराणामपि व्याख्यातारोऽपि अनुकर्तृता च व्याख्यापद्धत्यां कर्काचार्यस्य वैशिष्ट्यं वर्तते ।

### जयरामः

असौ मेदपाट-देशस्य निवासी आसीत् । वृद्धकालेन काश्यां वसति स्म । भारद्वाजगोत्रीयस्य आचार्यबलभद्रस्य(दामोदरस्य) अयं पौत्र आसीत् । अस्य पितुर्नाम बलभद्र अभूत् । महोदयस्यास्य भाष्यनाम सज्जन-वल्लभः वर्तते । मन्त्र-व्याख्याभाष्यास्य विशिष्टता । ग्रन्थकारेण पाठशोधने महान् परिश्रमः कृतः, अनेन तत्कालीनां पाठान् वैदिकेभ्यः श्रुत्वा मन्त्राणां पाठनिर्धारणं सम्पादितम् । अन्यभाष्यकाराणां कोऽपि पाठविपर्ययः तथा च सूत्रार्थेषु दृश्यते, परन्तु जयरामेण गृह्यसूत्रे परिगृहीतानां मन्त्राणां व्याख्या प्रामाणिकरूपेण कृता । इदमेवास्य वैशिष्ट्यम् ।

## हरिहर:

हरिहराचार्य: स्वटीकायां (पृ० ३३०) विज्ञानेश्वरमतं चोद्धृतवान् । अत: हरिहरस्य समय: ११७० ई० प्रागेव निश्चीयते । श्रीदत्त: स्वकृते आचारादर्शे (१३०० ई०आसन्न:) तथा च हेमाद्रि: (१२७० ई०) श्राद्धकल्पे अस्य मतं लिलेख । फलत: अस्य समय: १२०० ई० समीपे अस्तु । अतो उत्तरकालीन:, विशेषत: कर्कोपाध्यायस्य निकटतर: प्रतिभाति । अस्य व्याख्याया: पद्धति शैल्या विशिष्टं महत्त्वं वर्तते । हरिहराचार्येण अस्यां पद्धतौ गृह्यकर्मकाण्डस्य वर्णनं सविस्तारं कृतम् । पारस्करगृह्यसूत्रस्य स्वपितामहस्य टीकाप्रिया व्याख्या वर्तते ।

हरिहर: श्रौतस्मार्त: सविशेषं परिचित:, येन प्राचीन-धर्मशास्त्रीय ग्रन्थकारेषु मनु-वृद्धशातातप-याज्ञवल्क्य-यम-अङ्गिरा-हारीत-सुमन्तु-जाबालि-मतानि (चूडाकरणविधि: पृ० ७७) उद्धृतानि । टीकाया: प्रारम्भे यन्न वासुदेवाङ्कितनामकाचार्यस्य सबहुमानं संस्मरणं कृतम्, तस्य मतानुसारं पद्धतिरेषा अस्तु । हरिहरस्य व्याख्यानाम गृह्यसूत्रव्याख्यानमस्ति । ग्रन्थकार: आत्मानं अग्निहोत्रीति स्वीकरोति ।

## गदाधर:

गदाधराचार्येण स्वव्याख्यायां प्राचीनाचार्याणां मतानि सादरं सविस्तरं चोल्लिखितानि । एषु आचार्येषु भर्तृयज्ञ-वासुदेव-गदाधर-रेणुदीक्षित हरिहरादयो मुख्या: सन्ति । अस्य व्याख्यायां यत्र तत्र हरिहरभाष्यस्य खण्डनमपि कृतमस्ति (अत्र हरिहरमिश्रस्यैव पाण्डित्यं कृतमस्ति पृ० ८७) दृढपुरुषस्य (पा०गृ०सू० १,८,७) व्याख्या-प्रसङ्गे अनेकाचार्याणां मतानि प्रदर्शितानि । दृढपुरुषस्य तात्पर्यं तु वत्साङ्गपुरुष: (हरिहर:) वितन्द्रप:(भर्तृयज्ञ:) जामाता(रेणुकार्याधरौ) प्रदर्शितम्, एषु गदाधरेण अन्तिमो ध: स्वीकृत: ।

अन्यत्र तु (पृ० १२७) श्री-पराशर-भट्टोत्पल-मतानि उद्धृत्य स्वमतं स्वीकृतम्, अस्य भाष्ये चोद्धृता: ग्रन्था ग्रन्थकाराश्च निम्नलिखिता: सन्ति - मनु-याज्ञवल्क्य-हारीत-आपस्तम्ब-व्यास-मिताक्षरा-पराशर-मदनरत्न-वृद्धशातातप-हेमाद्रि(१२७० ई०) प्रभृतय: सन्ति ।

आचार्यवर्यस्य अभिरुचि: विशेषत: ज्योतिष-विषये दृश्यते, अत: तेन संस्काराणां कालनिर्णयप्रसङ्गे ज्योतिष-ग्रन्थेभ्य: पर्याप्ता: श्लोका: समुद्धृता: । रत्नकोश: समुद्धृत: एष: प्रख्यातग्रन्थ: प्रतीयते(पृ० १९५) यत्र-तत्र ग्रन्थे गुप्तिरचितानां विषयाणामपि विवरणं दृश्यते, समवाया: कर्तव्य-वर्णनप्रसङ्गे उक्त विषयस्योदाहरणं गृहीतुं भवति(पृ० १२३) । गदाधर-स्य भाष्योपरि भट्टोत्पल-पराशरयो: भाष्याणां विशेष: प्रभाव आपतित: । गदाधर: प्राय: कस्यापि संस्कारस्य व्याख्यायां तद्विषयेषु विभिन्न-मतानां संग्रह: कृतवानसौ, इदमेवास्य वैशिष्ट्यम् । अस्य पितुर्नाम वामन-दीक्षित आसीत् पर्यायोपाधि: त्रिस्थलीपितृ तस्मात् उपाध्यायपदवीं अभूत् इति प्रतिपादितं गदाधरेण । हेमाद्रिमहाभागस्य उद्धरणेन आचार्यवर्यस्य समय: १२७० ई० अनन्तरं सम्भवत: १६०० ई० यावत् निश्चितम: ।

विश्वनाथ:

विश्वनाथ: किल नन्दपुर वास्तव्य: कश्यपगोत्रीय: नागरब्राह्मण-आसीत्, अस्य जनकस्य नाम नरसिंह तथा च माता गंगादेवी नाम्नी अभूत्, ययो: स्मरणं टीका द्वौ आधारौ बभूवतु: । अस्य विरचिता टीका गृह्य-सूत्रकारिका अस्ति या अत्र वर्णिता वर्तते । अन्तिम-पञ्चकण्डिकासु टीका ग्रन्थकारस्य पितृव्येन अनन्तस्य प्रपौत्रेण कमलाधरेण १६५२ वि०सं० (= १५९५ ई०) आब्दे कृतम् । असौ स्तम्भ-तीर्थात् (खम्भात्, गुजरात:)आगत

काश्यां वासः कृतवान् । काश्यामेव व्याख्या पूर्णतामगमत् । व्याख्या-परिमाणे पञ्चाशत्पत्रेषु विस्तृतं वर्तते । विश्वनाथस्य समयः १७०० ई० शताब्द-स्योत्तरार्ध-भागे स्वीकर्तुं शक्यते ।

## गृह्यकारिका

अथेदं गृह्यकारिकायाः विषये किंचिद् विविच्यतेऽपि । वस्तुतः गृह्यकारिकायाः सम्पादनमिदं शोधप्रबन्धस्यास्य मुख्यविषयः । भारतीय-संस्कृतवाङ्मये गृह्यसूत्रेषु बहवः कारिकाग्रन्थाः विरचिताः सन्ति, यथा - आश्वलायन गृह्यकारिका, आपस्तम्बगृह्यकारिका, बौधायनगृह्यकारिकाः, परमत्र अस्माकं तात्पर्यं वर्तते रेणुविरचितायाः गृह्यकारिकाविषये । गृह्यकारिकायाः अस्याः बहूनि नामानि सन्ति यथा - कात्यायनगृह्यसूत्रकारिका, कात्यायनगृह्यकारिका, कात्यायनगृह्यसूत्रविवृतिः, रेणुकारिका, पारस्करकारिका, पारस्करगृह्यसूत्रकारिका, गृह्यकारिका चेति । अत्र ग्रन्थस्यास्य अन्तिमं नाम गृहीतम् ।

ग्रन्थोऽयं कात्यायनगृह्यसूत्र-श्राद्धादिसूत्रेषु आधृतः । वीमित्रा-पौत्रेण गोवर्धनात्मजेन अग्निहोत्रिणा रेणुकेन ग्रन्थोऽयं विरचितः । ग्रन्थेऽस्मिन् द्वौ भागौ स्तः, पूर्वार्धः उत्तरार्धश्चेति ।

पूर्वार्धभागे - गर्भाधानादारभ्य - श्राद्धप्रकरणसमाप्तिं यावद् वर्णनं अस्ति, पूर्वार्धस्य अन्तिमे श्लोके रेणुकेन स्वकीयः परिचयः विलिखितः । उत्तरार्धे तु अधिकारनिरूपणम् - प्रायश्चित्तविधिपर्यन्तं चास्ति विषयविवेचनम् । ग्रन्थारम्भे गणपतिस्मरणपूर्वकं ग्रन्थकारेण ग्रन्थरचना प्रारब्धा, द्वितीये भागेऽपि शिवापार्वत्यौ रेणुकेन नमोऽस्तुतिः कृता । सम्पूर्णा एव गृह्यकारिका

श्लोकबद्धा अस्ति, अत्र यद्यपि अनुष्टुप् छन्दसो बाहुल्यम्, तथापि अनेकानि विभिन्नानि छन्दांसि प्रयुक्तानि । गृह्यकारिकायाः विस्तृतं विषय-विवेचनं अग्रे करिष्यामि ।

ग्रन्थकर्तुः परिचयः

गृह्यकारिकायाः प्रणेता वसति समये पि धरातले अवतीर्णः पुष्पितः। असौ किल शाण्डिल्यगोत्रीयः, माध्यन्दिनशाखाध्यायी, विविधशास्त्रेषु निष्णातः, अग्निहोत्रिवंशोद्भवः, सर्वमपि च गुजरातस्थ विप्र आसीत् । महाकवेरस्य नाम रेणुकाचार्य, रेणुकाग्निहोत्री वा आसीत् । अस्य पितामहः सोमेश्वरः, पितामही च उमा नाम्नी तथा चास्य पिता गोवर्धनाख्य आसीत् ।

गृह्यकारिकायाः विविधप्रकरणे रेणुकेन स्वपितृपितामहयोः नामोल्लेखो सबहुमानं कृतम् -

१. गोवर्धनात्मजेनेह रेणुकाग्निहोत्रिणा ।
सुतार्थं कृतिना तेन कृतेयं गृह्यकारिका ॥
(पृ० गृह्यकारिकायां गर्भाधानम्)

२. गोवर्धनात्मजेनैव यज्वना रेणुकेन तु ।
कातीयगृह्यसूत्रोक्तप्रयोगविवृतिः कृता ॥
(पृ० गृह्यकारिकायां पुंसवनम्)

३. यज्वा सोमेश्वरः श्रीमान् उमापादाब्जषट्पदः ।
तत्पौत्रेण कृता गृह्यकारिका विबुधप्रिया ॥
(पृ० गृह्यसीमन्तोन्नयनम्)

४. गोवर्धनात्मजेन यज्वना रेणुकेन तु ।
कातीयगृह्यसूत्रोक्ता प्रयोगविवृतिः कृता ॥
(पृ० गृ० अन्नप्राशनम्)

भूमिका

५. यज्वा सोमेश्वरः श्रीमान् उत्मापादवंशकः ।
तत्पौत्रेण कृता गृह्यकारिका विबुधःप्रिया ॥
(पृ० चूडाकरणम्)

६. गीर्वाणाम्बायेन यज्वना रेणुकेन तु ।
कात्यायनगृह्यसूत्रोक्त प्रयोगविवृतिः कृता ॥
(पृ० मौञ्जीबन्धनम्)

७. यज्वा सोमेश्वरः श्रीमान् उत्मापादवंशकः ।
तत्पौत्रेण कृता गृह्यकारिका विबुधप्रिया ॥
(पृ० समावर्तनम्)

८. यज्वा सोमेश्वरः श्रीमान् उत्मापादवंशकः ।
तत्पौत्रेण कृता गृह्यकारिका विबुध प्रिया ।
(पृ० उपाकर्म)

९. गीर्वाणाम्बायेन यज्वना रेणुकेन तु ।
कात्यायनगृह्यसूत्रोक्तप्रयोगविवृतिः कृता ॥
(पृ० महाग्न्याधानम्)

१०. गीर्वाणाम्बायेन रेणुकेनाग्निहोत्रिणा ।
कात्यायनगृह्यसूत्रोक्त प्रयोग विवृतिः कृता ॥
(पृ० पदादिकं)

११. यज्वा सोमेश्वरः श्रीमान् उत्मापादवंशकः ।
तत्पौत्रेण कृता गृह्यकारिका विबुधप्रिया ॥
(पृ० विवाहप्रकरणम् )

उक्तेन ग्रन्थस्य पुष्पिकाभागे स्वीयः परिचयः प्रदत्तः, तदनुसारं रेणुकस्य पितृपितामहाः महान्तः विद्वांसः आसन्, पितामहः सोमेश्वरः

गुरुणामभिलीन:, विविध-शास्त्राणि कतिपु विद्यान् अभवत्, तस्य पुत्रो नाम सोमेश्वरदाक्षित: अभूत् । तस्य महीदेवस्य पत्न्या: कुक्षौ गोवर्धनाचार्यो जात:, गोवर्धनाचार्यस्य द्वौ पुत्रौ अभवताम् महेश: रेणुकश्चेति ।

ठेक्कस्य वंशजा:
|
सोमेश्वर दाक्षित:
|
गोवर्धन:
|
महेश: — रेणुकाचार्य:

कवि: रेणु: श्रुतिस्मृति वेदाध्ययनपरायण: अभवत्, प्रतिभाति यत्नेन परम्परया अध्ययनं कृतम् । असौ माध्यन्दिनशाखाया: वाजसनेयिनं चकार, तस्य कवि तस्य कीर्ति-पताकां दशसु दिक्षु दीप्यते स्म । स्वयं परिचयं रेणुकवि पद्ये वर्णयति -

आसीच्चान्द्रिकवंशजो द्विजवर:
सौजन्यजन्माकृति: ।
श्रीसोमेश्वरदाक्षितो मुखमखा-
पत्तास्त्र: शतक्रतु: ।
तस्यासीत्तनयो विशिष्ट-
कैरवकुल्या सुधि: ।
श्रीमा माध्यन्दिन धी-धुरंधर-धरी-
वाचि धुरीणस्तत: ॥

पुत्रस्तस्य पद्म-पंकजा:
श्रीमान् महेशाभिध: ।

पुत्रैर्वृता: श्रुति-स्मृति का-

र्योत्कर्षिणो भवतु ।

सन्तु: कर्पूरकलिका-

वर्तीत नन्दी भवान् ।

दिवं रचिता प्रयोग-विवृति:

श्री केशवार्य: सुधी: ॥

केशवस्य पितामह: (सोमेश्वर:)

सोमेश्वरदीक्षित: केशवाचार्यस्य पितामहत्वेन गृह्यकारिकायां बहुश: स्मृत: । तस्य विषये पञ्चा तन्त्रस्य प्रयोग: केशव: करोति । अयं सप्तसोमयाग-सप्तहविर्याग-सप्तपाकयज्ञादि कर्मणां विधिज्ञ: तथा: अग्नि-मानासीत् । दीक्षितस्य सा स्पर्धा - यत् येन सोमयागे दक्षता गृह्यता च दीक्षितो भवति ।

यद्यपि सोमेश्वर नाम्ना बहव: आचार्या: सन्ति । परन्तु मान्यो कालस्य कर्ता सन्देहेन: सोमेश्वर आसन्तु कौशिकपद्धति केशवस्य आचार्य केशवस्य पञ्च: सोमेश्वर: गुरुरिति: अस्ति पद्यौ केशव: कौशिक-पद्धति-पुस्तके केशवेन कृता[1]

॥ कौशिकाम्नायात्[2] ॥

वाजसात् केशव उत्पन्न: केशवादनन्त उच्यते ।

अनन्तात् सोमेश्वरो जात: सोमेश्वरात् केशवस्तथा ॥

---

१. कौशिकपद्धति: वाराणसेयसंस्कृतविश्वविद्यालयस्य सुप्रसिद्ध सरस्वतीभवन-पुस्तकालये ५० संख्या (४७०५) सुरक्षिता वर्तते ।

२. कौशिक पद्धति: (केशवकृता) ।

यस्य वै पविदिनः यो न्निहोत्रिण तथा ।
यस्य स्निग्धैमादिभिर्यजमाना यथाविधि ।
यस्य वै सकतोऽक्ष यथा विधिवद्विवर्णः ।
महाशास्त्रैर्बहुभिरविशास्त्रैरिव कारिताः ।
यस्मोऽस्मिन्धर्मिष्ठाः यस्य सर्वरायणाः ।
यस्य आयामकुलत्वामङ्गाः यस्य अन्याः पुरुषस्तथा ।
प्रत्यक्षं तु कृतं येषां स्वकावाधिपती तथा ।
चतुर्णामपि वेदानामर्थविस्थितं तथा ।
बहुगुणे यात्सौ गुणाः वक्तुं न शक्यन्ते ।
श्रीमद् श्रीपद्धे विद्वान् आसात् सोमेश्वरो द्विजः ।
तत्पुत्र केशवेणाकृता श्रीकिमवादितः ।।इति।।

श्रीपद्धर स्थानमिदं कच्छदेशे राजपुर पुर नाम्ना ख्यातमिति कस्मश्चिन्मिन्नः बहुधाः पूर्वस्थाने स्वाध्यायाशीलान्मुक्त्वा । केशवो यं माधवाचार्यात् पूर्ववर्ती, मायणेन स्वभाष्ये बहुधाः स्मृतः समाश्रितश्च ।

अस्य केशवसोदयस्य पितुर्नाम सोमेश्वर एव आसीत् । पर्यालोचनेन प्रतिभाति यत् अयं सोमेश्वरः भिन्नो वर्तते । न तु रेणुपितामहः, किन्तु रेणुकान्निहोति महोदयस्य पितामहः सोमेश्वर दाधीचः पूर्वमेव प्रतिभाति यस्य विषये अधिकं न किमपि प्राप्यते ।

गोवर्धनः

गोवर्धनाचार्यः गृह्यकारिकाग्रन्थकर्तुः पिता आसीत् । यद्यपि समस्तेऽपि ग्रन्थे रेणुकेन अस्य स्मरणं कृतं तथापि ग्रन्थान्ते प्रथम पद्ये

अस्य विषये स्पष्टं न किमपि उक्तं, तथापि एवं पंक्तिः अस्य सम्बन्धिनी वर्तते यथा -

गौ माध्यन्दिन धर्म-धुर्य-धुरी-
णोऽस्ति धौरेयकः ।

गौ शब्दस्य तात्पर्यं संस्कृते वृषभो भवति, उक्त श्लोकांशे: अन्वयः: यत् धुर्यो गौ माध्यन्दिनधर्मः तस्य धौरेय भारवाहकः । भारवाहकस्तु गौ = वृषभ एव भवति । गोवर्धनशब्दस्तु गवां वर्धने । अण्णी युट् कृते इति निष्पद्यते (वाचस्पत्यम् भा० ४ पृ० २७२०) । अतः उक्त पंक्तिना अपि रेणुः स्थितं स्मरति । स्वमितुल्ये अस्मादपि साधारणी विज्ञानं प्रतिभाति । संस्कृत साहित्ये अन्ये पि गोवर्धनाभिधाः कवयः सन्ति परमेतत्तु पृथक् । अस्य विषयः स्वल्पं सन्ति, अद्यावधि न ज्ञातम् । अस्य तौ पुत्रौ कृष्णः, भवितः । रेणुकस्तिति ।

रेणुकाग्निहोत्रिपितृविषये धर्मशास्त्रस्य प्रसिद्धो विद्वान् महा-महोपाध्यायः डा० पाण्डुरंगवामन काणे महोदयो धर्मशास्त्रेतिहासे अभिमतम् - अस्य रेणुकाग्निहोत्रिमहोदयस्य पितुर्नाम गोवसूरिः आसीत् मन्ये डा०पा०वा० काणे महोदयेन समस्ता गृह्यकारिका सावधानतया नावलोकिता । गोवसूरिस्तु अस्य भ्राता, पितृव्यो वा भवितुमर्हति न तु पिता, अतः पञ्चान्तरः गोव-सूरिः स्थाने गोवर्धनाचार्यः इति संशोधनं कर्तव्यम् । सूरिस्तु जैनधर्मावलम्बिनां उपाधिः, रेणुकस्तु अग्निहोत्री आसीत्, अस्य पितृपितामहादयो पि अग्नि-होत्रिणः आसन् अत एव सूरि पदयोजनं सर्वथा अयुक्तम् । स्वग्रन्थे विविध-स्थले रेणुकः स्वपितुः आत्मानं गोवर्धनात्मजः इति व्यवहरति अतः काणेमहोदयस्य[1]

---

१. पारस्करगृह्यकारिका-(उप० कातीयगृह्यसूत्रप्रयोगविवृतिः) शाण्डिल्यगोत्रो-त्पन्न तोभिमाता महा-गोवसूरिमहोदयस्य पुत्रेण रेणुकाचार्येण । शकां० ११९८ (१२६६ ई०) प्रणीता । (वर्णिकावा०भा० १ पृ० ७३)
(उद्धृतम् - धर्मशास्त्रेतिहासः भा० ३ पृ० १५१८).

भूमिका

तं: न समाधानः । यथा हि -

गोवर्धनात्मजेन यज्वना रेणुकेन तु ।
बालावबुद्धये ब्रह्मौगिकविवृतिः कृता ॥
(गृ०गृह्यकारिका पद्यादि०)

अधुना पुस्तकालयेषु यत्र यत्र गृह्यकारिका प्राप्तोपलब्धाः तासु सर्वास्वेव गोवर्धनी लेखो दृश्यते चित्सुखेन , न तु भीमसुरिनामकस्यान्यस्य सति ।

रेणुकाग्निहोत्रिणः महोदयस्य देशकालौ

रेणुकेन स्वकीये गृह्यकारिका ग्रन्थे गृह्यकारिकायाः रचनाकालः प्रदर्शितः । तदनुसारं महोदयस्यास्य ग्रन्थसमाप्तिः शकाब्दे ११८८ चैत्र मासि दशम्यां सं० बुध -

अब्देशाधारके मधुमासि शुक्ले व्यवस्थो जातोऽस्मिन्नामा (११८८)
ग्रन्थः कृतो मे कलाज्योतिः शरीरस्य मौदितमद्दिनात्
(गृ०गृ०का०अन्तिमपद्यम्)

अतः सुस्पष्टं भाति यत् ११८८ तमे शकाब्दे दशम्यां बुधवासरे मधुमासे मासि गृह्यकारिकां पूर्णतामगमत् । यद्यपि तिथिरत्र लेखस्याभाविता तथापि भारतीय-परम्परानुसारं कार्यसमाप्तिः प्रारम्भस्य भौमे ज्ञो वा दृश्यते अस्तु अस्मिन् दिने ईसवीयाब्दस्य १२६६ तमे वर्षे: मार्चमासस्य १९ तिथिरासीत् । विक्रमाब्दे तु १३२३ तमे वर्षे चैत्र कृ०पक्षस्य अष्टमी तिथिः, भौमवासरः इण्डियनएफेमेरीसात्[१] ।

१. एन इण्डियन एफेमेरीज, भा० ४(ए०डी० १३००-१३९९)
डॉ० एल०डी० स्वामीकन्नूपिल्लई

यती श्रीरेणुकाचार्यस्य गुरुकारिका १२६६ ई० वर्षे पूर्णतां गतम् अतः अस्य जन्म समयः १२०० ख्रा०ई० वर्षे स्यादिति संभावयामि ।

महानुभावस्यास्य कस्मिन् प्रान्ते सौराष्ट्रे वा जन्म अभूत् सुस्पष्टं नास्ति । तथाप्यहं एनं महाराष्ट्रीयं स्वीकरोमि । गुरुकारिका ग्रन्थे टेवकी यं कन्नौजमवलौ: उपालकः पाताडु - येन प्रायशः स्त्रान्ते कमठा, कमठाभ्याम्: गणेशाभ्रिः, इत्यादि शब्दानां प्रयोग कृतः - यथा -

१. मतादिकर्म-विज्ञान-कुशाद्गन्ध देवि ।
नमस्तस्मै गणेशाभ्र नवसद्गुराचार्य ॥
(पृ०७० फलाचरणम्, गर्भाधानम्)

२. श्रद्धा-भक्ति-विधिवत्यादि तरुणाचरणेन च ।
यजमाना रेणुकार्येण कृतं गुरुकारिका ॥
(पृ०१७० पातकर्म)

३. कमठा-चरण-वरीयि स्मितास्मितमुखी रेणुकाम्बिकेति ।
कुरुते तत्कृपापानात् सम्यक्सातापगुणायेन ॥
(पृ०७० नामकरणम्)

४. कमठाभ्रि प्रसादतः (वर्णितम्)

५. श्रद्धा-भक्ति-विधिवत्यादि तरुणाचरणेन च ।
यजमानारेणुकाचार्येण कृतं गुरुकारिका ॥
(उ०७० आधानप्रकरणम्)

६. शान्ति-भक्ति-विधिवत्यादि तरुणाचरणेन च ।
यजमानारेणुकाचार्येण कृतं गुरुकारिका ॥
(उ०७० पात्रस्थापनम्)

७. श्रद्धा-भक्ति-विविक्तत्वादि तच्छास्त्रलक्षणेन च ।
यत्नात् रेणुकाचार्येण कृतं गुरुकारिका ॥
(उ०पृ० अधिकारनिरूपणम्)

८. महत्कर्मापहा भोगमहोदधुधाविता ।
स्तुत्यार्थं (पद्यार्थं) कृत्वा तेन कृतं गुरुकारिका ॥
(उ०पृ० मणिकावधानम्)

९. शंकराचार्यविणाकगतो हि तत्त्वभक्तिमार्गसंवता ।
ध्वान्तानितिमिरघोरा प्रकाशिता कारिका शिवात् ॥
(उ०पृ० दीक्षाविधिः)

१०. कलाचरणतत्त्वरीति निमित्तकिरणौ रेणुकाशिवौ ।
कुर्याति कृतककृत्यानात् तत्पक्षातीय सूत्रार्थम् ॥
(उ०पृ० महावृतः)

रेणुकाचार्यस्य महाराष्ट्रीयत्वेन निम्न-प्रधानकारणानि सन्ति -

(क) रेणुकेन स्वग्रन्थे शकाब्दसंवत्सरस्योल्लेखः कृतः, तत्र गुहकारिका-रचनात्मक तस्मिन् वर्षे चान्द्रः संवत्सरारम्भात् कार्तिकादतु १९८८ तमः । उत्तरभारते १९८८ शकाब्दे चान्द्रः सम्वत्सरो नाम्नात् अतः कार्तिकस्य प्रयोगात् चैत्रे भारते चान्द्रसम्वत्सर-स्याभावात् च तेषां दक्षिणदेशीयत्वं सिध्यति ।

(ख) यतो हि उत्तरभारतानन्तरं दक्षिणभारते केवलं महाराष्ट्र प्रदेश एव एतादृशं क्षेत्रमस्ति यत्र माध्यन्दिनशाखाध्यायिनः सन्ति, अतो ऽस्य माध्यन्दिनशाखाध्यायित्वेन महाराष्ट्रदेशीयत्वं स्वी-क्रियते चास्माभिः ।

(ग) गुहकाम्बिकायाः पार्श्वोक्तेन प्रतिभाति यत् रेणुकाम्बिकेयं जगन्मातृश्रीरूपासक आसीत् । तेन ग्रन्थे कन्या, कन्याद्रि, महालक्ष्मी, नगेशाद्रि इत्यादि शब्दानां प्रयोगः कृतः, यतोऽस्य महाराष्ट्रीय प्रान्तस्य कोल्हापुरस्य निवासित्वं [illegible] ।

(घ) महाराष्ट्रप्रान्तानां यदि कथास्तीन्दु, तत्र वर्तमानकाले नाम कोल्हापुर अस्ति । कोल्हापुरे वर्तन्ते प्राचीनं महालक्ष्मीमन्दिरं वर्तते । रेणुकाचार्यस्य सम्बन्धः तेन मन्दिरेण सह पूर्वं बभूव, यतो महाभागः मन्दिरस्यास्य अध्यक्षः(पुजारी) उपासकश्चासीत्, एतस्मादेव कारणात् लिखितमिदं -

कन्याकुमारीरोपि विभाति भुवी-
रेणुकाम्बिकेयं ॥
महालक्ष्मीपदाम्भोजमकरन्दसुधापिता ।

(उ०कु०मणिकावलयम्)

अतः वयं अत्रं विभावयामि यत् श्री रेणुकाचार्यः महालक्ष्मी-मन्दिरे प्रधानोपासकश्चासीत् । अस्य कोल्हापुरे जन्म निवासो वा बभूव । कोल्हापुरे एवास्मिन् गुहकाम्बिकायाः रचना कृता, लिखितं च पूर्वाङ्कग्रन्थस्य समाप्तौ -

अर्कदावाके भुवांशिमासि
अपि चकाचो शर दम्भाङ्कि ।
ग्रन्थः कृतो यं कन्याद्रि-
वरोरुदर्शमोदितमदीनाम् ॥

(पू०ग्र० अन्तिमः श्लोकः)

भूमिका

## कोल्हापुरम् (रेणुकाचार्यस्य जन्मभूमिः)

कोल्हापुरं स्थानमिदं चास्माकं पुराणप्रसिद्धं करवीरक्षेत्रमस्ति, यत्साम्प्रतं महाराष्ट्रसीम्नि विद्यते । स्कन्दपुराणे अस्य देशस्य नाम काराष्ट्रदेशः, विस्तारस्तस्य दशयोजनम् दुर्गमो यं देशः । देशस्यास्य मध्ये च आयामादधिकं पवित्रं लक्ष्मीनिर्मितं करवीराख्यं क्षेत्रं वर्तते । महत्पुण्यं क्षेत्रमिदम्, अस्य दर्शनादेव सर्वपापनाशो जायते । क्षेत्रे स्मिन् ऋषिगणाः, वेदपाठिनो विप्राश्च निवसन्ति, येषां दर्शनमात्रेण सर्वपापविनाशं भवितुमर्हति ।

## करवीरमाहात्म्यम्

योजनं दश वै पुत्र काराष्ट्रो देशदुर्धरः ।
तन्मध्ये पञ्चक्रोशञ्च काश्यपादधिकं भुवि ॥
क्षेत्रं वै करवीराख्यं क्षेत्रं लक्ष्मीविनिर्मितम् ।
तत्क्षेत्रं हि महत्पुण्यं दर्शनात् पापनाशनम् ॥
तत्क्षेत्रे ऋषयः सर्वे ब्राह्मणाः वेदपारगाः ।
तेषां दर्शनमात्रेण सर्वपापक्षयो भवेत् ॥

(स्कन्दपुराणस्य सह्याद्रि खण्डकम् २, २९-३१)

कुर्दवाडीतः पण्ढरपुरं प्रति यो रेलमार्गः मीरजस्टेशनं यावद् गच्छति, पुनः मीरजस्थानात् सांगलीस्थानम्, मीरज-कोल्हापुर रेलमार्गे अष्टादशक्रोशं यावद्गते सति समागच्छति कोल्हापुरं स्थानम् । स्थाने स्मिन् नित्यं निवसति महालक्ष्मी । इदं महालक्ष्मीमन्दिरं एकपञ्चाशत् (५१) शक्तिपीठेष्वेकम् । भक्ताः श्रियार्थिनश्चान्याः सर्वाः नैकधाम्नेव पवित्रमिति पौराणिका-नामाख्यानम् ।

<u>महालक्ष्मीमन्दिरम्</u>

कोल्हापुरस्य प्राच्यराजमन्दिरस्याग्रे वर्तते श्रीजगद्गुरु(शङ्कराचार्य)राजमन्दिरस्यास्य पृष्ठभागे महालक्ष्म्याः विशालं पाषाणं प्राचीन-मन्दिरमस्ति । तत्रैव कपालेश्वरस्य शम्भोर्मन्दिरमस्ति, मन्दिरस्यास्य दीर्घं परिकुण्डम्, यस्मिन् भगवत्याः महालक्ष्म्याः विशालं मन्दिरं राजते । मन्दिरस्य प्रधान-भागः पाषाणैर्निर्मितः, अस्य मन्दिरस्य निर्माणकार्यं कदा जातं न कोऽपि वेत्ति, तथापि दशमशताब्द्याः प्रागेव अस्य रचनाकालः । मन्दिरस्य पार्श्वे राजते पद्माख्यं सरः । अत्र काशीतीर्थं मणिकर्णिकातीर्थं च वर्तते । एतदतिरिक्तम् काशीविश्वनाथमन्दिरम्, जगन्नाथादि देवानां मन्दिराणि मनोहराणि । जैन-धर्मावलम्बिनः महालक्ष्मीमिमां पद्मावतीति उच्चरन्ति, तेषां विचारतः मन्दिरमिदं तेषां इष्टदेव्याः पद्मावत्याः चास्ति ।

कोल्हापुरं नाम्नैतदपि करवीराख्यो ग्रामो[1] वर्तते, येन पौराणिक-कथास्वेतस्य समुल्लेखो भवति । कोल्हापुरे पञ्चगङ्गायाः तटे राजमार्गनिकटे उपत्यकायां अनेकानि मन्दिराणि सन्ति, येषु त्रीणि शिवमन्दिराणि मुख्यानि सन्ति (कल्याण-पत्रिका, तीर्थाङ्क, पृ० २६१) ।

---

१. करवीरम् (आधुनिकं कोल्हापुरम्) मत्स्य पु० १३.४(करवीरे महालक्ष्मीम्), पद्म० ५.१७.२०३, मत्स्य० २२.७६, वायु० २५.४४. पद्म० ६.१०८.३; स्क० काशीखण्ड, भा० ३, पृ० २०७, २१०, तीर्थ भा० २६, पृ० २०० । कालिका० ९६.७९, नारद० ११७, हरिवंश(विष्णुपर्व) ३९.५०-५१ ;
धर्मशास्त्रेतिहास: पा०वा० काणे
भा० ४, पृ० ७२९, तीर्थसूची ।

रेणुकाचार्यस्य रचना:

रेणुकाग्निहोत्रिमहोदयस्य अद्यावधि रचने द्वे उपलब्धे स्त: -

१. गृह्यकारिका (उत० पारस्करगृह्यकारिका, कातीयगृह्यकारिका, कातीयगृह्यसूत्रविवृति:) ।

२. रुद्रपद्धति: ।

गृह्यकारिकाया अनेकानि हस्तलिखितानि पुस्तकानि वाराणसेय-संस्कृत-विश्वविद्यालयस्य सरस्वती-भवन पुस्तकालये सुरक्षितानि सन्ति । रुद्र-पद्धते: एका एव प्रतिरुपलब्धा या सम्प्रति बीकानेरनगरस्य अनूप संस्कृत-पुस्तकालये (७१) पुस्त० सुरक्षिता वर्तते । रुद्रपद्धति: कीदृशी, लघ्वी वा विस्तृता वा न जाने, पत्राचारेऽपि यत्नेऽपि तस्या: पुस्तकस्याध्ययने न कदापि एतादृशी सुविधा प्राप्ता । उपर्युक्त-रचनाद्वयं विहाय मया रेणुमहोदयस्य अन्या रचना नैव दृष्टा । अत्र तावत् गृह्यकारिकाया: विषय-वर्णनं समुप-स्थापयामि संक्षेपत: ।

गृह्यकारिकाया: विषयपरिचय:

गृह्यकारिका भागद्वये विभक्ता वर्तते । तत्र प्रथमे भागे (पूर्वार्द्धे) गर्भाधानादारभ्य क्रमश: पुंसवन-सीमन्तोन्नयन-जातकर्म-नामकरण-निष्क्रमण-कर्णवेधान्नप्राशन-चूडाकरण-मौञ्जीबन्धन-वेदारम्भ-उपाकर्म-उत्सर्गविधि-केशान्त-समावर्तन-विवाह-संस्कारं यावत्, पुन: श्राद्धारम्भात्- साधारणकर्मविवेचनं यावत् विस्तृतं विषयवर्णनमुपलभ्यते ।

पुनस्तत्र द्वितीये भागे (उत्तरार्द्धे) अधिकारनिरूपणम्, पात्रलक्षणम्, आधानकाल:, अग्न्याधानम्, पंचमहायज्ञा:, होमविधि:, पदार्थक्रम-

लिङ्गानाम्, मन्त्राणाम्, व्रणकर्म, छन्दसाम्:, अष्टकाकर्म, पूर्णाहुति:, वाक्यप्रामाण्यम्, प्रायश्चित्तविधिश्चेत्येतस्मिन् विषयविवरणम्। अत्र तावत् क्रमाद् परिचयं लिख्यते - प्रथमं पूर्वार्धभागस्य अनन्तरम् उत्तरार्धभागस्य चेति।

## पूर्वार्धभागः

## संस्काराः

### संस्कारशब्दार्थः

संस्कृत-भाषायां संस्कारशब्दस्य व्युत्पत्तिः सम् उपसर्गपूर्वक कृ धातोः घञ् प्रत्यये कृते सति भवति (सम् + कृ + घञ् = संस्कारः)। शब्दस्यास्य प्रयोगः अनेकार्थेषु भवति।

मीमांसकानां मते तु प्रोक्षणादिजन्यसंस्कारो यज्ञाङ्गपुरोडाशेष्विति द्रव्यधर्मः[1] भवति। वैदिकाभिमतास्तु भावाभावादिजन्याः संस्कारा देहे उत्पद्यमानानि तदभिधानानि यानि कल्पन्ते[2]। नैयायिकानां मते संस्कारशब्दार्थः - भावाभिव्यञ्जकत्वं वा स्वभावान्तरं वा संस्कारत्वेन व्याकरणीया तस्य हि परिगणनं वैशेषिकदर्शने चतुर्विंशतिगुणान्तर्गतमायाति।

१. वाचस्पत्यम्, वृहद०, ५ पृ० ५१८८.
२. तदेव.

संस्कृतसाहित्ये अस्य प्रयोगः शिक्षा, संस्कृतिः, प्रक्षालनम्[१], शोधन-पूर्णता-व्याकरणसम्बन्धिशुद्धिः[२], संस्करणम्, परिष्करणम्[३], शोभा, आभूषणम्[४], प्रभावः, स्वरूपम्, स्वभावः[५], क्रिया[६], छापशक्तिः, शुद्धि-क्रिया, धार्मिक-विधि-विधानानि[७], अभिषेकः[८], विचारः, भावना, धारणा, कार्यपरिणामः, क्रियाया अविनाशितादि अर्थेषु भवति ।

<u>संस्काराणां विस्तारः तेषां संख्या च</u>

(क) <u>गृह्यसूत्रम्</u>

शास्त्र-दृष्ट्या संस्काराः गृह्यसूत्राणां विषयक्षेत्रान्तर्गतमायान्ति । किन्तु अत्रापि संस्कारशब्दस्य प्रयोगः तस्य वास्तविकार्थे नोपलभ्यते । गृह्यसूत्रकाराः पाकयज्ञानां सम्बन्धे एव संस्कारशब्दस्य प्रयोगं कुर्वन्ति तथा च पंचभूसंस्कारान्[९] पाकसंस्कारा द्योतयन्ति, गृह्यसूत्रकारैः सामाजिक-

---

१. निसर्गसंस्कारविनीत इत्यसौ नृपेण चक्रे युवराजशब्दभाक् । रघु० ३. ३५.
२. संस्कारवत्येव गिरा मनीषी तया स पूतश्च विभूषितश्च । कुमार० १. २८.
३. प्रयुक्तसंस्कार इवाधिकं बभौ । रघु० ३. १८.
४. स्वभावसुन्दरं वस्तु न संस्कारमपेक्षते । शाकु० ७. ३३.
५. यन्नवे भाजने लग्नः संस्कारो नान्यथा भवेत् । हितोपदेशः १. ८.
६. संस्कारमात्रजन्यं ज्ञानं स्मृतिः । तर्कसंग्रहः
७. कार्यः शरीर-संस्कारः पावनः प्रेत्य चेह च । मनुस्मृ० २. २६.
८. फलानुमेयाः प्रारम्भाः संस्काराः प्राक्तना इव । रघु० १. २०.
९. आ०गृ०सू० १. ३. १ ;
पा०गृ०सू० १. १. २ ;
गो०गृ०सू० १. १. ९.

कतिपयानि यज्ञानां विविधः प्रभाव आसीत् । अतो यज्ञानां गृह्य-विधिविधानानां कर्मकाण्डं विविधानां[1] यज्ञानामन्तर्गतं चक्रुः । दैनिक-संस्काराणां गणना पाकयज्ञेषु आसीत्[2] । पारस्करगृह्यसूत्रे पाकयज्ञ-कर्माणि हुताहुत-प्रहुत-प्राशितादिचतुष्टये विभक्तानि । बौधायन-गृह्यसूत्रे पाकयज्ञकर्माणि सप्तधा वर्णितानि, तानि च हुतः, प्रहुतः, आहुतः, शूलगवः, बलिहरणम्, प्रत्यवरोहणम्, अष्टकाहोमादिनामानि सन्ति ।

वैखानस-स्मार्तसूत्रेषु[3] दैनिकसंस्कारेषु तथा च विभिन्नावसरेषु देवार्चनार्थं क्रियमाणेषु यज्ञेषु सुस्पष्टो भेदः । एतेषु गर्भाधानात् विवाहपर्यन्तं अष्टादश-शारीर-संस्कार-क्रमो प्राप्यते, एतदतिरिक्तं अयं-ग्रन्थः द्वाविंशतानां यज्ञानामुल्लेखं[4] विदधाति ।

गृह्यसूत्राणि साधारणतया विवाहतः आरभ्य समावर्तनपर्यन्तं दैनिक-संस्कारकर्माणि निरूपयन्ति, तेषु प्राधिकांशतः अन्त्येष्टिकर्माणि न वर्णयन्ति । केवलं पारस्कर-आश्वलायन-बौधायनादीनि गृह्यसूत्राणि एव अन्त्येष्टिसंस्कारं वर्णयन्ति । गृह्यसूत्रेषु वर्णिता संस्कार-संख्या निम्नलिखिता अस्ति -

---

१. आ॰गृ॰सू॰ १, २, १ ; पा॰गृ॰सू॰ १, १, ४ ; बा॰गृ॰सू॰ १, १, २

२. बौ॰गृ॰सू॰ १, १, १-१२

३. बौ॰गृ॰सू॰ १, १, १

४. तत्रैव.

आश्वलायनगृह्यसूत्रे

१. विवाहः, २. गर्भाधानम्, ३. पुंसवनम्, ४. सीमन्तोन्नयनम्, जातकर्म, ६. नामकरणम्, ७. चूडाकर्म, ८. अन्नप्राशनम्, ९. उपनयनम्, १०. समावर्तनम्, ११. अन्त्येष्टिः ।

पारस्करगृह्यसूत्रे

१. विवाहः, २. गर्भाधानम्, ३. पुंसवनम्, ४. सीमन्तोन्नयनम्, ५. जातकर्म, ६. नामकरणम्, ७. निष्क्रमणम्, ८. अन्नप्राशनम्, ९. चूडाकर्म, १०. उपनयनम्, ११. केशान्तः, समावर्तनम्, १३. अन्त्येष्टिः ।

बौधायनगृह्यसूत्रे

१. विवाहः, २. गर्भाधानम्, ३. पुंसवनम्, ४. सीमन्तोन्नयनम्, ५. जातकर्म, ६. नामकरणम्, ७. उपनिष्क्रमणम्, ८. अन्नप्राशनम्, ९. चूडाकर्म, १०. कर्णवेधः(गृहप्रवेशः), ११. उपनयनम्, १२. समावर्तनम्, १३. पितृमेधः ।

वाराहगृह्यसूत्रे

१. जातकर्म, २. नामकरणम्, ३. दन्तोद्गमनम्, ४. अन्नप्राशनम्, ५. चूडाकर्म, ६. उपनयनम्, ७. वेदव्रतानि, ८. गोदानम्, ९. समावर्तनम्, १०. विवाहः, ११. गर्भाधानम्, १२. पुंसवनम्, १३. सीमन्तोन्नयनम् ।

वैखानसस्मृति

१. ऋतुसंगमनम्, २. गर्भाधानम्, ३. सीमन्तोन्नयनम्, ४. विष्णु-बलिः, ५. जातकर्म, ६. उत्थानम्, ७. नामकरणम्, ८. अन्नप्राशनम्, ९. प्रवासागमनम्, १०. पिण्डवर्धनम्, ११. चौलकर्म, १२. उपनयनम्, १३. पारायणम्, १४. व्रतबन्धविसर्गः, १५. उपाकर्म, १६. उत्सर्जनम्, समावर्तनम्, १८. पाणिग्रहणम् ।

(ख) धर्मसूत्रम्

यद्यपि धर्मसूत्रेषु अधिकांशभागे विधिक्रियाः वर्णिताः, अतः समस्तेषु धर्मसूत्रेषु समस्त-संस्काराणां वर्णनम्, परिगणना च न मिलति, तथापि तेषु अध्ययन-विवाहोपाकर्मों सर्वेषां आचाराशौचादि विषये नियम-समाविष्टत्वादवलोक्यते । गौतम धर्मसूत्रे चत्वारिंशद् (४०) संस्काराः अष्टौ (८) आत्मगुणाश्च सन्ति, यैः सह संस्कार संख्या(४८) अष्टचत्वारिंशद् भवति ।

गौतमधर्मसूत्रे संस्कार परिगणना

१. गर्भाधानम्, २. पुंसवनम्, ३. सीमन्तोन्नयनम्, ४. जातकर्म, ५. नामकरणम्, ६. अन्नप्राशनम्, ७. चौलकर्म, ८. उपनयनम्, ९-१२. चत्वारि वेदव्रतानि, १३. स्नानम्, १४. सहधर्मचारिणी-संयोगः, १५-१९. पंचमहायज्ञाः, २०-२६, अष्टका, पार्वणम्, श्राद्धम्, श्रावणी, आग्रहायणी, चैत्री, आश्वयुजी, इति सप्त पाकयज्ञसंस्थाः । २७-३३ अग्न्याधानम्, अग्निहोत्रम्, दर्शपूर्णमासः, चातुर्मास्यम्, आग्रायणेष्टिः, निरूढ-पशुबन्धः, सौत्रामणिः इति सप्तहविर्यज्ञाः ।

३४-४० अग्निष्टोमः, अत्यग्निष्टोमः, उक्थ्यः, षोडशी, वाजपेयः, अतिरात्रम्, आप्तोर्यामः इति सप्तसोमसंस्थाः ।

(ग) स्मृतयः:

स्मृतिषु संस्कार-शब्दप्रयोगः केवलं तेषामेव धार्मिक-कृत्येषु युक्तः येषामनुष्ठानेन व्यक्तेः व्यक्तित्वशुद्धिः भवति स्म । मनुस्मृतौ मनुना वर्णिताः प्राक् गर्भाधानात् - मृत्युपर्यन्तं त्रयोदशसंस्काराः स्वीकृताः:-

१. गर्भाधानम्, २. पुंसवनम्, ३. सीमन्तोन्नयनम्, ४. जातकर्म, ५. नामधेयम्, ६. निष्क्रमणम्, ७. अन्नप्राशनम्, ८. चूडाकर्म, ९. उपनयनम्, अथवा मौञ्जीबन्धनम्, १०. केशान्तः, ११. समावर्तनम्, १२. विवाहः, १३. अन्त्येष्टिः ।

गौतम-अंगिरा-मनु-याज्ञवल्क्यादि स्मृतिषु संस्कारगणने मतैक्यं नास्ति, एतद्वैषम्यं कारणं तत्कालिके सति संस्काराणां क्रमो विकासश्च भवति ।

(घ) गृह्यकारिकायां संस्काराः:

गृह्यकारिकायां पुनः त एव संस्काराः वर्णिताः येषां वर्णनं पारस्करगृह्यसूत्रे भवति । गृह्यकारिकायाः प्रणयनं तु पारस्करगृह्यसूत्रे, कात्यायनश्रौतसूत्रे, शतपथब्राह्मणे चाश्रितम्, अतः पारस्करगृह्यसूत्रानुसारं गृह्यकारिकानुसारं च परस्परं भेदोऽपि दृश्यते ।

१. गर्भाधानम्, २. पुंसवनम्, ३. सीमन्तोन्नयनम्, ४. जातकर्म, ५. नामकरणम्, ६. निष्क्रमणम्, ७. कर्णवेधः, ८. अन्नप्राशनम्,

९, चूडाकरणम्, १०. मौञ्जीबन्धनम्, ११. वेदारम्भः, १२. उपाकर्म, १३. उत्सर्गविधिः, १४. केशान्तकर्म, १५. समावर्तनम्, १६. विवाहः १७. अन्त्येष्टिः ।

गृह्यकारिकानुसारं षोडशसंस्काराः भवन्ति येषु अन्त्येष्टिकर्म नायाति ।

अधुना लोके यद्यपि यत्र तत्र सर्वापि संस्कारक्रिया दृश्यते तथापि जातकर्म-उपनयन-विवाह-अन्त्येष्टि च विहाय अन्ये संस्काराः लुप्तप्राया एव ।

<u>गर्भाधानम्</u>

स्त्रीमातृकुक्षौ बीजरूपेण प्रतिष्ठापनं हि गर्भाधानम् । वैदिक-ऋषिभिरस्मिन्नवसरे विष्णु-त्वष्टृ-प्रजापति-धात्रादीनां स्मरणं कृतम् । बृहदारण्यकोपनिषदि विशिष्टगुणैः समन्वितान् पुत्रान् प्राप्तुं विशिष्टभोजनानां विधानं वर्तते ।

एतद्विधौ गर्भाधानाय तिथीनां नक्षत्राणां च शुभाशुभत्वं पर्यालोचितम् । विज्ञानसम्मतं प्रतिभाति विधानमिदम् । गर्भे स्थाप्यमानः शिशुर्मातुर्मानसिकाभिवृत्तिरूपस्य सादृश्यं प्राप्नोति । अत एव रोगाः प्रसन्नात्मानो न दृष्टव्या इति वैज्ञानिकाः शास्त्रकाराणां मतम् ।

मातुः पितुश्चोदात्तविचाराणां संवहनम्, तेजस्विपुत्र-प्राप्ति-कामना, दिव्यशक्तीनां सान्निध्यं चास्य संस्कारस्य वैशिष्ट्यानि । संस्कारोऽयं विना सम्भविष्यताम्, उत पुत्र निःश्रेयसाय । पुत्र निःश्रेयसमिति प्रमाणम् ।

<u>पुंसवनम्</u>

गर्भस्थ शिशोः पुंस्त्वं विधातुं पुंसवनं क्रियते । प्रथमं तावद् देवानां स्तुतयः कृताः, तेभ्यश्च देवेभ्यः पुत्रप्राप्तये वरो याचितः । अस्मिन्नवसरे गर्भिण्याश्च पुत्रोत्पत्तौ साधुभिरौषधीनां प्रयोगश्च कृतः[1] । पुंसवन-सीमन्तोन्नयनसंस्कारविधिषु समायोजितं वीरसूतं पुष्टं स्वास्थ्यसंवर्धनाय भवति, गर्भस्थ-शिशोः कल्याणं जायत इति सुनिश्चितमिव[2] । वैष्णवानां मते पुंसवनार्थं वर्ष-पर्यन्तं विष्णोः स्तुतिः तदाराधना पूजा च कर्तव्या इति विहितम्[3] ।

<u>सीमन्तोन्नयनम्</u>

सीमन्तोन्नयनमुपनयनप्रायमभवत् । संस्कारेऽस्मिन् पतिः पत्न्याः केशकलापमुन्नीय तस्याः सीमन्तमरचयत् । गायन्ती गर्भाक्रान्ता माता प्रमोदिताभूत् । वैदिकयुगे सीमन्तोन्नयनावसरे वीणागाथिनौ वीणावाद-पूर्वं सोमराजस्य स्तुतिमकुरुताम् । सीमन्तोन्नयनं गर्भाधानात् चतुर्थे मासि सम्पादितम्, यदा शुक्लपक्षे पुंनक्षत्रेण चन्द्रमा युक्तो भवेत् ।

<u>जातकर्म</u>

शिशौ जाते महान् हर्षो जायते । प्रथमं तावद् वैश्वानरस्य परि-तुष्टिः सम्पाद्यते । वैश्वानरस्य परितोषेण जातस्य शिशोः भाग्यान्ते तेजस्वितायाः समृद्धेः सर्वतश्च सम्भावना अभवत् । नाभिवर्धनात्प्रागेव

---

१. पुंस्त्वलक्षणानामाविर्भावात् प्राग्गर्भस्थशिशोर्लिङ्गपरिवर्तनं कर्तुं शक्यत इति स्पष्टं मतमायुर्वेदस्य । चरके शारीरस्थानप्रकरणे, ८. ९-२५
२. समाप्नोगर्भिणी ऽपि माता यदा गर्भेण देवपूजार्थिनी । तत्रैव ४. १६
३. भागवते ६. १८-१९ अध्यायतः ।

पञ्चभिर्ब्राह्मणैः शिशोरुपप्राणनमक्रियत । केन विधानेन तस्य पूर्णायुष्कत्वा-युष्कत्व चर्चा सम्भाविता । ब्राह्मणानां पञ्चानां स्वस्ववितिना शिशोर्प्राणस्य विधायक इति धारणा स्यात् । पश्चात् पृषदाज्यस्याहुतिः कृता । अस्मिन् क्षणे पिता जगाद –

अस्मिन्सहस्रं पुष्यासमेधमानः स्वे गृहे । अस्योपसद्यां मा च्छैत्सीत् प्रजया च पशुभिश्च स्वाहा । मयि प्राणांस्त्वयि मनसा जुहोमि स्वाहा । यदस्य कर्मणोऽत्यरीरिचं यद्वा न्यूनमिहाकरम् । अग्निष्टत्स्विष्टकृद्विद्वान् स्विष्टं सुहुतं करोतु नः ।

ततः पितास्य दक्षिणं कर्णमभिनिधाय

वाग्वागिति त्रिरथ दधिमधुघृतं संनीयानन्तर्हितेन जातरूपेण प्राशयति, भूस्ते दधामि भुवस्ते दधामि स्वस्ते दधामि, भूर्भुवः स्वः सर्वं त्वयि दधामि इति मन्त्रोच्चारणात्[1] ।

वेदाभिमृष्टा नामक्तु ब्राह्मणग्रन्थविहितस्य पुंसः स्मरणीया । अस्य तत्त्वानुशीलनस्य मानसिक-प्रतिष्ठायै शिशोर्जन्म ग्रामे जातं भवतु । केन प्रकारेण नामक-व्यक्तित्वस्य विशेषत्वं निर्धारितम् ।

पश्चात् पिता शिशोर्नाम कृतवान् वेदोऽसि इति गुह्यनामाभवत् । ततः शिशुं मात्रे प्रदाय पिता तस्यै स्तनं प्रयच्छति सरस्वतीं प्रार्थयते च –

---

१. बृहदारण्यक ६.४ । वाक् सर्ववेदानां प्रतीकी नित्यं प्रकाशे । आयुर्वेदानुसारं दधिमधुघृतमिश्रणम्, मधुरसं ओजधातूनां वृद्धै च पञ्चामृतं तेजः ।
स्तोत्र ब्रा० ८.२० ;
आपो वै सर्वाणि भेषजानि भेषजं भौषज्यम् । शतपथ ब्रा० ६.२.१.११.

यस्ते स्तनः शशयो यो मयोभूः येन विश्वा पुष्यसि वार्याणि ।
यो रत्नधा वसुविद्यः सुदत्रः सरस्वति तमिह धातवे कः ॥

ततः पिता च मातरमभिमन्त्रयते -

इळासि मैत्रावरुणी वीरे वीरमजीजनत् ।
सा त्वं वीरवती भव । याऽस्मान् वीरवतो करदिति ॥

शिशुं सम्बोध्य तस्याः पुरुषाः आहुः -

अतिपिता बताभूरतिपितामहो बताभूः । परमां बत काष्ठां प्रापच्छ्रिया यशसा ब्रह्मवर्चसेन, य एवं विदो ब्राह्मणस्य पुत्रो जायते ।

आ स्तनपानप्रवृत्त्यनुसारं दक्षिणकर्णं प्राप्य पिता शिशोः कर्-वर्णानां पुण्यपुञ्जमश्रावयत् । ततः शिशोर्मेधाजननं कुर्वन् तस्य श्रवणमार्गं मुखमानाययत् -

मेधां ते देवः सविता मेधां देवी सरस्वती ।
मेधां ते अश्विनौ देवावाधत्तां पुष्करस्रजौ ॥

ततः शिशोः स्कन्धं स्पृशन् पिताऽजपत -

अश्मा भव परशुर्भव हिरण्यमस्तृतं भव
वेदो वै पुत्रनामासि स जीव शरदः शतमिति
इन्द्र श्रेष्ठानि द्रविणानि धेह्यस्मै
प्रत्यन्धि मघवन्नृजीषिन् ।

उपर्युक्त प्रक्रियायाः प्रत्यक्षस्वरूपमपि प्रदर्शितमासीत् । तथाऽश्मा परशुहिरण्यं क्रमशः उपर्युपरि निधाय तस्योपरि शिशुः प्रतिष्ठापितः । येन विधिना शिशोः सर्वोच्चत्वं प्रापितम् ।

केषुचिद् गृह्यसूत्रेषु कुलेषु चिरं प्रजीवनायनं विधातुं जन्म-
दिने निन्दायत्नः प्रख्यातिः[1] । पुत्रजन्मोत्सवे पिता प्रायशो दानमकरोत्[2] ।

नामकरणम्

नाम्नो विशेषमहत्त्वं विदितं सर्वेषाम् । नाम्नो महत्त्वमधिकृत्य
बृहदारण्यकोपनिषदि संवादो यं प्राप्यते -

याज्ञवल्क्येति होवाच - यत्रायं पुरुषो म्रियते किमेनं न जहातीति ।
नामेत्यनन्तं वै नामानन्ता विश्वेदेवा अनन्तमेव स तेन लोकं जयति[3] ।

बालकस्यापि गुह्यं नाम कुर्यात् । जन्मतो दशमे द्वादशे वा दिने
पुण्ये मुहूर्ते नक्षत्रे वा ब्राह्मणभोजनानन्तरं नामाकुर्वत । नाम्नो मधुरध्वनिः
सुश्राव्यश्च । चतुरक्षरं द्व्यक्षरं वा घोषवदाद्यन्तरन्तस्थं पुंसाम्, अकारान्त-
युग्माक्षरं च स्त्रीणामिति कृते नाम्नि, शुभं फलं भवतीति । द्व्यक्षरनाम्ना
प्रतिष्ठाकामस्य चतुरक्षरेण वा ब्रह्मवर्चसकामस्य कामना प्रकटीकृता[4] ।

बौधायनानुसारं पुत्राणां नामानि ऋषि-देव-पूर्वजानां नामा-
न्यपि भवेयुः । तथापि देवानां नामानि न गृहीतव्यानि इति ।
केषुचिद् धर्मशास्त्रेषु लिखितं यथा -

---

1. आपस्तम्बादौ ।
2. द्र० गृह्यकारिकायाः बालकर्मप्रकरणम् ।
3. बृह० ३. २. १२ , बृहस्पतिमते नामाधिकृत्य प्रमाणितम् -
नामाखिलस्य व्यवहारहेतुः शुभावहं कर्मसु भाग्यहेतुः ।
नाम्नैव कीर्तिं लभते मनुष्यस्ततः प्रशस्तं खलु नामकर्म ॥
4. द्र० पा०गृ०सू०व्या० १, गृह्यकारिका-नामकरण प्रकरणम्

शुभङ्करः, शिवदत्तः, देवदत्तः, इति शोभननामानि, न तु रामः, विष्णुः, इन्द्रो वा पुरुषाणां नामानि भवेयुः । स्त्रीणां नामान्यपि एवं मनुना उक्तम् -

स्त्रीणां सुखोद्यमक्रूरं विस्पष्टार्थं मनोहरम् ।
मङ्गल्यं दीर्घवर्णान्तमाशीर्वादाभिधानवत् ॥ मनु० २.३३.

विष्णुपुराणानुसारं तु -

गुप्तदासात्मकं नाम प्रशस्तं वैश्यशूद्रयोः ।
नार्थहीनं न चाशस्तं नापशब्दयुतं तथा ॥
नामङ्गल्यं जुगुप्स्यं वा नाम कुर्यात् समाक्षरम् ।
नातिदीर्घं नातिह्रस्वं नातिगुर्वक्षरान्वितम् ॥
सुखोच्चार्यं तु तन्नाम कुर्याद्यत्प्रवणाक्षरम्[1] ॥

नाम्ना देवानां महापुरुषाणां चोदात्तदर्शां मान्यतायाः सततं प्रतिष्ठापिताः[2]। नाम्नैवाभ्युत्थानाय प्रेरणा प्राप्यते गुणाधायिनीति शास्त्रकाराणां मतम् । येन केन प्रकारेण महतां देवानां नामोच्चारणेन पुण्योदयस्य धारणा वर्तते । क्वचिन्मूर्खजनाः पुत्रान् पिशाचवाहनादयो वा संज्ञिताः । तेषां वाक्यार्थमात्रात् । नाम्नः प्राक् श्रीशब्दस्य योजनं रीतिरासीत् प्रायः ।

## निष्क्रमणम्

जन्मतः चतुर्थमासे शिशोर्गृहान्निष्क्रमणमभवत्[3]। मातुर्गर्भान्निष्क्रम्य प्रसवगृहे ततः निष्क्रम्यान्येषु गृहेषु विचरन् शिशुः संकीर्ण-परिधौ वसति ।

---

१. विष्णुपुराणम् - ३. ७. ८-११.
२. चाण्डालानामपि नामानि शोभनानि बभूवुः इति राजतरङ्गिण्यां दृश्यते बहुशः ।
३. गु० पु० गृह्यकारिका-निष्क्रमणम्

तस्मादपि निष्क्रम्य दिव्यविभूतीनां संदर्शनाय दिव्यात्मकं चरित्रं संस्कारेषु निष्क्रमणमिव सूर्यचन्द्रादीनां दर्शनमपि । सामाजिक-शास्त्री निष्क्रमण च प्रथमानुभवपिपासाभि समाविष्टवृद्धिक्रमेण ।

निष्क्रमण-विधौ तत्र सूर्यस्य दर्शनं प्रथमं समाचारितम् । सूर्यस्तु भारतीयदृष्ट्या ज्ञानविज्ञानयोः परमं निधानमिव । आचार्य एव सूर्यः सविता वा दिव्यज्ञानाय सूर्यदर्शनं कारयन्निव निगादयत् -

तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् ।
पश्येम शरदः शतं जीवेम शरदः शतम् ।
शृणुयाम शरदः शतं प्रब्रवाम शरदः शतम् ।
अदीनाः स्याम शरदः शतं भूयश्च शरदः -
शतात् ॥ यजुर्वेदः (३६ २४)

रात्रौ निष्क्रमणविधौ चन्द्रदर्शनं कारितम् । एतासां दिव्यविभूतीनां दर्शनस्य शिशोः सर्वतः संवर्धने निश्चितः प्रभावो भवतः ।

कर्णवेधः

बृहस्पतिमतानुसारं शिशोर्जन्मतः दशमे, द्वादशे, षोडशे दिवसे वा कर्णवेधः प्रशस्तः[1] । गर्गमतानुसारं जन्मतः षष्ठः सप्तमः, अष्टमो द्वादशो वा मासः संस्कारेऽस्मिन् योग्यतमो भवति । श्रीधराचार्यस्तु जातदन्तस्य बालकस्य कर्णवेधः प्रशस्त इति वचनं स्वीकरोति[2] । परन्तु कात्यायनमतानुसारं

---

१. जन्मतो दशमेऽह्नि द्वादशे वा च षोडशे ।
बृहस्पतिः वी०मि०सं०भा० १ पृ० २५८
२. शुभकालिकायाम् - कर्णवेधः श्लो० ९
शिशोरजातदन्तस्य मातुरुत्सङ्गसर्पिणः ।
सौचिको वेधयेत् कर्णौ सूच्या द्विगुणसूत्रया ॥
वी०मि०सं०भा० १, पृ० २५९

## भूमिका

तृतीये, पंचमे वा वर्षे शिशोः कर्णवेधस्य प्रशस्तः कालः[1] । यद्यपि कर्ण-वेध-संस्कारस्य कृते एक एव विचारो लिखितः – यत् बालकस्य कर्णवेधे स्वल्पमेव कष्टं भवति । आरोग्यं सौविध्यं चावलोक्य सुश्रुतः षष्ठे सप्तमे वा मासि कर्णवेधस्य व्यवस्थां स्वीकरोतीति[2] ।

संस्कारस्यास्य कर्ता पिता एव भवति इति कात्यायनसूत्रसम्मतिः, परं कर्णवेधनविषये न तत्र काचिद् व्यवस्था दृश्यते गृह्यकारिकानुसारं तु पिता अन्यो वापि कर्ता इति वचनम्[3] । सुश्रुतानुसारं भिषक् एव वामहस्तेन कर्णवेधनमकरोत्[4] । किन्तु मध्यकालिकनिबन्धग्रन्थेषु श्रीपतिना कर्णवेधनं कार्यं व्यावसायिकः सौचिकः(स्वर्णकारः) एव करोति इत्थं स्वात्मा सम्मतिः प्रदत्ता[5] ।

संस्कारे अस्मिन् सूचिका[6] विषये पि मतमतान्तराणि सन्ति – यत् – स्वर्णमयी – रजतमयी, ताम्रमयी, आयसी, वा स्यादिति । वीर-मित्रोदये तु वर्णानुसारेण ब्राह्मण-क्षत्रिय-वैश्य-शूद्राणां कृते सूचिका व्यवस्था

---

१. पा०गृ०सू० परिशिष्टम् – १.
२. सुश्रुतसंहितायाम् सूत्रस्थानम् – अ० १६ १
३. गृह्यकारिकायाम् – कर्णवेध: श्लो० ६.
४. भिषग्वामहस्तेन कर्णौ विध्येत् । सुश्रुत सं० सूत्रस्था०अ० १६-२.
५. सौचिको वेधयेत् कर्णौ । श्रीपति:
६. शातकुम्भमयी सूचीविधौ श्रीप्रदा ।
राजती या यदा वा पि यथा विभवतः शुभा ॥
बृहस्पतिः वी०मि०सं० भाग
स्मृति-महार्णवे पि ;
गृह्यकारिका-कर्णवेध: श्लोक ७.

दृश्यते[1]। केवलः संस्कारस्यास्य अनिवार्यतां प्रतीयते[2]। कात्यायनसूत्रे वर्णितं कर्णवेध-कर्म अत्यन्तं साधारणम्[3]। मातुरङ्के चोपविष्टाय बालकाय पूर्वा-भिमुखं विधाय तस्मै मिष्टान्नं दातव्यम्, ततः भद्रं कर्णेभिः इत्यनेन दक्षिणं कर्णं विध्येत् ततः वक्ष्यन्ति इत्यादिनाभिमन्त्र्य वामं विध्येत्। संस्कारा-नन्तरं ब्राह्मणभोजनं भवति[4]।

वस्तुतः कर्णवेधस्य प्रचलनं केन कारणेन जातम्? अस्य विषये सुश्रुतस्य कथनमस्ति - यत् - "रक्षादिभ्यो रक्षार्थं तथा च भूषणालंकरण-निमित्तं बालकस्य कर्णौ विध्येत्[5]। सुश्रुत एव अन्त्रवृद्धि-निरोधाय तथा च अन्त्रवृद्ध्युपशमनाय अपि कर्णवेधविधानम्[6]। ग्रन्थानां पर्यालोचनेन प्रतिभाति यत् संस्कारोऽयमस्मिन् भारतवर्षे प्रारम्भे धार्मिकापेक्षया सुरक्षार्थं उपायाः भवन्ति स्म। गृह्यसूत्रेषु संस्कारस्यास्य गणना नास्ति, अतो स्य प्रचलनं

---

१. सौवर्णी राजपुत्रस्य राजती विप्रवैश्ययोः।
शूद्रस्य चायसी सूची मध्यमाष्टांगुलात्मिका॥
वी०मि०सं०भा० १, पृ० २५९ उद्धृतम्।

२. कर्णरन्ध्रे रवेश्छाया न विशेदग्रजन्मनः।
तं दृष्ट्वा विलयं यान्ति पुण्यौघाश्च पुरातनाः॥
तस्मै श्राद्धं न दातव्यं यदि चेदासुरी भवेत्।
सं०, देवलवचनम्

३. पा०गृ०सू०परि० १, २.

४. गृह्यकारिकायाम्-कर्णवेधः, श्लोक ८-१०.

५. रक्षाभूषणनिमित्तं बालस्य कर्णौ विध्येत्।
सु०सं०सू०स्था० १६, १.

६. शंखोपरि च कर्णान्ते त्यक्त्वा यत्नेन सेवनीम्।
व्यत्यासाद्वा सिरां विध्येदन्त्रवृद्धिनिवृत्तये॥
सं०, चिकित्सास्थानम्, १९, २१.

यानन्तरं जातमिति समीचीनं प्रतिभाति । पारस्करगृह्ये परिशिष्टभागे संस्कारस्यास्य चर्चा दृश्यते । आश्वलायनादिगृह्यसूत्रेष्वस्य वर्णनं नास्ति । बौधायनगृह्ये स्वल्पेन चास्ति वर्णनम् ।

अन्नप्राशनम्

शिशोर्जन्मतः दधिमधुघृतानां प्राशनम् । यतो हि शिशोः षष्ठे- मासि अन्नप्राशनं स्मृतम्[1] । आयुर्वेदानुसारं लघु हितमन्नं शिशवे दातव्यम् । अन्नस्य न केवलं प्राणधारणायैव महत्त्वमपितु व्यक्तित्वस्य विकासायाप्यस्योपयोगि- ताऽभिमता । तथा -

आहारशुद्धौ सत्त्वशुद्धिः, सत्त्वशुद्धौ ध्रुवा स्मृतिः,
स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्षः इति[2] ।

अस्यां दशायां स्पष्टमिदं प्रतिभाति यत् शिशवे प्रदत्तं प्रथमं भोजनं व्यक्तित्वस्य विकासदृष्ट्यैव निर्णीतमासीत् । सामान्यतोऽन्नप्राशनाय दधि- मधु-घृत-मिश्रं भक्तमेव दद्यात् । भोजनप्राशनं दत्त्वैव पिता पुत्रं स्वः वसुधाराप- मवतिष्ठ । केचिद् धर्मशास्त्रकाराः समांसं भोजनमन्नप्राशनाय निर्दिशन्ति[3] ।

---

१. षण्मासं चैनमन्नं प्राशयेल्लघु हितं च । सुश्रुते शारीरस्थाने १०. ६४.

२. छान्दोग्य ७. २६. २.
गीतायामपि समानं दृश्यतेऽस्य महत्त्वम् । गीता १७. ८-१०.

३. आधुनिके शिशोः मांसभोजनस्य पाचनयोग्यता न विद्यते । अतो मांस- भोजनमन्नप्राशनाय समर्थितमिति समस्या । परं पारस्करस्तु - मांस- भोजनं समर्थितवान् -

भारद्वाज्या मांसेन वाक्प्रसारकामस्य । मत्स्यैर्जवनकामस्य,
आट्या ब्रह्मवर्चसकामस्य । पा०गृ०सू० १. १९. ७-११ ;

बृ० गृह्यकारिका(बृ०) अन्नप्राशनम् ।

भारतीय-धारणानुसारमस्मिन् देवताद्वयं वर्तते । अस्मिन् संस्कारे पदे पदे मन्त्रिवस्य स्तुतिर्विहिता । कालान्तरे न्यायकारैः शिरोभित्ति-पोषणस्य वास्तविकोपायस्य निर्णयः कृतः । देवानां सान्निध्ये बहूनां व्यवसायानां प्रस्तावाः समुपस्थापिताः । तेषु यानि कानिचित् विशुद्धानीव रीत्या शिरोपोषिका सम्भाविता ।

चूडाकरणम्

चूडाकरणं शिशोः प्रथमे वर्षे तृतीये वा सम्पादितम्[1] । देवानां कर्तृं विधाय शिरसि चूडा कृता । केशकर्तनस्य लाभा आयुर्वेदानुसारं सन्ति यथा -

पापोपशमनं केशनखरोमापमार्जनम् ।
हर्षलाघवसौभाग्यकरमुत्साहवर्धनम् ॥
पौष्टिकं वृष्यमायुष्यं शुचिरूपं विराजनम् ।
केशश्मश्रुनखादीनां कर्तनं संप्रसाधनम् ॥ (चरकसंहितायाम्) ।

चूडाकरणात् प्रभृति शिखाधारणं भवति । आयुर्वेदानुसारं शिखायाः महत्त्वं विद्यते । यथा हि - शिरसः शिखरे सिरा-सन्धीनां सम्मेलनं भवति । अस्य स्थानस्याधिपतिः रोमावर्तः । तत्र केनापि प्रहारेण सद्य एव मृत्युर्भवति[2] । अस्य मर्मस्थानस्य रक्षा शिखया भवति ।

---

१. पा०गृ०सू० २, १, १-२; मनुस्मृ० २. ३५; गृह्यकारिका-चूडा० श्लोक १-५
तृतीये पंचमे वै चौडकर्मप्रशस्यते ।
प्रथमे वर्षे तृतीये वा यथोक्तकर्मणि वा । वी० मि०
सं०भा० १ पृ० २९६

२. मस्तकाभ्यन्तरोपरिष्टात् सिरासन्धिसन्निपातो रोमावर्तोऽधिपति-स्तत्रापि सद्यो मरणम् । शारीरस्थानम् अ० ६, ८३.

केशान्तस्य समारम्भः पिता नापितेन कारयति । यदि तादृशं यस्य पुत्रस्य प्रयोगो भवति । पैठीनसिः कुर्ते चूडां वा कामयत - त्रिशूर्पावृः पञ्चवा शान्दस वा भवतु[1] । विविध कुलगोत्रप्रवरस्य चूडाविधिका[2] । तथा -

दक्षिणतः वसिष्ठानाम् । उभयतो अत्रिकश्यपानाम् ।
मुण्डा भृगवः । पंचचूडा अङ्गिरसः । केचन पंक्तिमेवाङ्गलार्थं शिखिनो न्ये ।
यथा कुलधर्म- वा ।

चूडासंख्या प्रायशो प्रवरसंख्या[3] समा स्याद्भवतु ।

<u>उपनयनम्</u>

आचार्येण ब्रह्मविद्यायाः अध्यापनाय विद्यार्थिनः शिष्यभावेन स्वीकरणमुपनयनम्[4] । ततः पंचविंशतिवर्षपर्यन्तं ब्रह्मचर्याश्रमस्य विधानम् । पिता स्वयमेव स्वपुत्रमाचार्यसमीपं नीत्वा तस्योपनयनाय प्रार्थयत । उपनयन-संस्कारे विद्यार्थी तदाचार्यस्य पुत्ररूपेण प्रकाशयत । पुत्रीकरणस्यैव प्रक्रिया यजुर्वेदे प्रथमं वर्णिता -

---

१. पञ्चवि० ३.६३ ; काठ० ९.९८.२ ; ९.९८.३.:८.४.१७ ; शां०गृ०सू० १.२८, आ०गृ०सू० १.१७ ; पा०गृ०सू० २.१ ; गो०गृ०सू० २.६ ; खा०गृ०सू० २.३-१९, आप०गृ०सू० १६.३ ; बौ०गृ०सू० २.४.

२. यथा कुलधर्मं केशवेशान् करोति । आ०गृ०सू० १.१७.

३. प्रवरास्तु कस्यापि कुलस्य महर्षय एव । प्रवरैः कुलस्योत्कर्षापरिचयोऽपि । प्रवरसंख्यासमाः चूडाः महर्षीणामो भवितुं शोभायन्तु इति धर्मशास्त्र-काराणां मतं प्रतिभाति ।

४. उपनयनस्यापरं नामाचार्यकरणमप्यस्ति । पाणिनिः १.३.३६ ; स्वीकरणमित्युपनयनस्य धात्वर्थः । काशिका १.३.३६

आचार्य उपनयमानो ब्रह्मचारिणं कृणुते गर्भमन्तः ।

तं रात्रीस्तिस्र उदरे बिभर्ति तं जातं द्रष्टुमभिसंयन्ति देवाः ॥

वैदिककाले विद्यार्थी स्वयमेवाचार्यसमीपं गत्वा न्यवेदयत् - ब्रह्मचर्यमागामिति ।

आचार्यो विद्यार्थिनमाह -

को नामासीति । प्रजापतिर्वै वः ।

स तस्य हस्तं गृह्णाति ।

आचार्यो भाषते - इन्द्रस्य ब्रह्मचार्यसि । अग्निराचार्यस्तव । अहमाचार्यस्तव । आचार्यः ताभ्यां देवताभ्यां विद्यार्थिनं परिददाति । पश्चात् स तं भूतेभ्यः प्रजापतये, सवित्रे च परिददाति कथयति च - एते वै श्रेष्ठे परिषदे देवते । एताभ्यामेव श्रेष्ठाभ्यां परिषद्भ्यां देवताभ्यां परिददाति । तथा तस्य ब्रह्मचारी न कश्चनारिष्यतीति । पश्चात् स विद्यार्थिनमद्भ्यः ओषधिभ्यो द्यावापृथिवीभ्यां विश्वेभ्यो भूतेभ्यश्च परिददाति ।

पश्चादाचार्यो वदतु - ब्रह्मचार्यसि । अपो ऽशान वा । कर्म कुरु इति । कार्यं कुरु । कार्यं कुरु । समिधमादधीति । समिल्त्वा स्वान्तं रेमाश ब्रह्मचर्य । मा सुषुप्थाः । मा भूथाः । आपो ऽशानेत्यपो वा । तेनैवमेतो भूतिं परिगृह्णाति । सर्वं सावित्रीमन्वाह[1] ।

वैदिकब्रह्मचर्यपालनविधिर्वैदिककाले प्रतिष्ठित आसीत् । उपनिषदि प्रवेशविधिः सत्यकामजाबालप्रकरणे वर्णितः, उपनिषत्सु गृहस्था अपि आत्मना उपनयनमकार्षुः यदि कदापि तेषां मनसि ब्रह्मज्ञानं प्राप्तुमिच्छाजायत ।

---

१. शतपथब्राह्मणे ११.५.४.

तस्मिन् युगे प्रायो वेदाध्यापिका बाला ब्रह्मचर्यमाचार्यकुलादिभिः सह ।

परवर्तियुगे तु पुत्राणामेवोपनयनविधिर्विहितः । उपनयनाय योग्य कालो निर्धारितः -

वसन्ते ब्राह्मणमुपनयीत, ग्रीष्मे राजन्यं शरदि वैश्यम् । गर्भाष्टमे ब्राह्मणं, गर्भैकादशेषु राजन्यं, गर्भद्वादशेषु वैश्यम् । विभिन्नवर्णानुपनयन-सम्पादनेन विविधानि कार्याणि साध्यानि स्युः । यथा सप्तमे ब्रह्मवर्चसकामम्, अष्टमे आयुष्कामम्, नवमे तेजस्कामम्, दशमे अन्नाद्यकामम्, एकादश इन्द्रियकामम्, द्वादशे पशुकाममिति, गृह्यसूत्रग्रन्थानामवस्थापना वयस्येव समाधानमन्वयत । तथा -

ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पञ्चमे ।
राज्ञो बलार्थिनः षष्ठे वैश्यस्येहार्थिनोऽष्टमे ॥ म० स्मृ० २.३७.

उपनयनाय परमावस्थापि निर्धारिता । मन्वनुसारम् -

आ षोडशाद् ब्राह्मणस्य सावित्री नातिवर्तते ।
आ द्वाविंशात् क्षत्रबन्धोराचतुर्विंशतेर्विशः ॥ म० स्मृ० २.३८.

परवर्तियुगे विस्तृतोपनयनविधिः सूत्रग्रन्थेषूल्लिखितानि - विद्यार्थिन उत्तरीयवासो धारणम्, मुञ्जम्, मेखलादण्डधारणम्, स्नानम्, समिदाधानम्, सावित्र्युपदेशम् च । एषु विधिषु पदे पदे वैदिकमन्त्रैर्देव-स्तुतिः प्रार्थनाश्च कृतानि । यथाचार्यो वदति -

मम व्रते हृदयं ते दधामि । मम चित्तमनुचित्तं तेऽस्तु । मम वाचमेक-व्रतो जुषस्व । बृहस्पतिष्ट्वा नियुनक्तु मह्यम् ।

---

१. पा० गृ० सू० २.२ ; आ० गृ० सू० १.१९ ; शां० गृ० सू० २.१ ; बौ० गृ० सू० २.५ ; आप० गृ० सू० ११ ; गो० गृ० सू० १०; म० स्मृ० २.३६ ; या० स्मृ० १.१४; द्र० - देखें उपनयन संस्कार, पृ० २९.

## भूमिका

विद्यार्थिने ब्रह्मचारिवटवे विधानमाचार्यः प्रस्तुतवान् – ब्रह्मचार्यसि । अपोऽशान, कर्म कुरु, दिवा मा स्वाप्सीः, आचार्याधीनो वेदमधीष्व इति । अस्मिन्नुपनयन विधौ विद्यार्थिनः मानसिक-बुद्ध्ये शारीरिकस्वास्थ्याय च या दीक्षा निर्दिष्टा, या विद्यार्थिसुलभाऽसीत् तथा तस्य शरीरे स्वास्थ्यपूर्णं च जाते समानन्दं च पुष्टता । शिष्याचार्यसम्बन्धो यं देवानां साक्ष्ये प्रतिष्ठापितः स तु गौरवान्वितो भूत् ।

सूत्रचिह्नितस्य यज्ञोपवीतस्य वैदिककाले प्रचलनं नाभवत् । तदानीं यज्ञकाले उत्तरीयं यज्ञोपवीतविधिना धृतम् । यस्मिन् कार्ये यत्र स्वेति मत्वा तदेव यज्ञोपवीती उत्तरीयस्य परिधानं निगतम् । सूत्रेषु सूत्रचिह्नितयज्ञोप-वीतस्य प्रचलनं प्रारभत । उत्तरीयं तु प्रायशो मृगचर्मणा निर्मितम् । तस्य स्थाने सूत्रस्य यज्ञोपवीतस्य परिधानं शनैः शनैः समारब्धम् । अतो ह्युपनयनविधौ प्रथमं मृगचर्मणो यज्ञोपवीतं ध्रियते, तदुत्तरं एव प्राचीनमुत्तरीयस्य । उपनयनं तु येषां निश्चितकाले न भवति स्म तेषां तु व्रात्य संज्ञा अभूत् । व्रात्यस्य वेदाध्ययने चाधिकारो न भवति स्म – तस्य स्थाने तु – व्रात्य-स्तोमकाले व्रात्यः इत्यभिहितः । उपनयनस्य पश्चात् गुरुः शिष्यं शौचमाचारमग्निकार्यं सन्ध्योपासनं च प्रथमं शिक्षयति स्म । ततः परं वेदस्याध्यापनं प्रायशः चतुर्विंशति वर्षपर्यन्तमभूत् ।

**वेदारम्भः**

उपनयनानन्तरं शुभे दिने वेदारम्भसंस्कारो भवति । तत्र प्रथमं पूर्वाङ्ग-पूजनं यावत् अत्युक्तैः तत् सम्पादितं कर्तव्यम् । ततः अग्न्यादिभ्यो चाहुतिप्रदानं

---

१. तथा हि मनुस्मृतौ –

अग्निहोत्रावधानं ब्राह्मणानां विधूननम् ।
देवतानां पितृणां च भागो येन प्रदीयते ॥ ७. ९८

कर्तव्यम् । तदनन्तरं आचार्यादिभ्यः पूर्णपात्रदानं कर्तव्यम् । यान्ते आचार्यः प्रजापतिशोभनात् वेदमध्यापयति ।

वैदिक-संस्कृतौ यज्ञादिकर्मारम्भेषु प्रयुक्तानां मन्त्राणां पाठः शुद्धः सुनिश्चितश्चापेक्षितात् । अशुद्धपाठेनानिष्टस्य सम्भावना यस्मात् । अतो वेदाध्यापने गुरुभिः स्वयमेव शुद्धपाठः प्रयुक्तः शिष्यैः स पाठो शुद्ध इति सावधानं परिरक्षितात् । अशुद्धपाठो क्वापि न स्यादिति वर्णपरम्परा-रक्षितात् । भारते संस्कृता शिक्षा व्यवस्था प्रायः एव कण्ठाग्रविद्याया माध्यमं सम्भवत् । विशुद्धपाठस्य कण्ठाग्रकरणाय बहुविधाः पाठाः प्रचारिताः । यथा - संहिता-पद-क्रम-जटा-माला-शिखा-रेखा-ध्वजो-दण्डो-रथो-घनादय-श्चेति ।

पितुः पुत्रं प्रति शिक्षणविधिर्वेदकालादारभ्य प्रचलित इति ऋग्वेदात् प्रतीयते । यथाहि - इदं वामाहुवे शृणुतं मे अश्विना पुत्रायेव पितरा मह्यं शिक्षतम् (ऋ० १०, ३९, ६) । अध्ययनारम्भे ओङ्कारविधिरनुष्ठेय इति प्रतिपादयन्नापस्तम्बो लिखति - ओङ्कारः स्वर्गद्वारं तस्माद् ब्रह्माध्येष्यमाण एतदादि प्रतिपद्येत । विकथां चान्यां कृत्वैवं लौकिक्या वाचा व्यावर्तते ब्रह्म[1] ।

यस्यां स्थितावाचार्यः, तस्यां स्थितौ भूत्वैव शिष्यस्तं प्रश्नान् पृच्छेदिति नियम आसीत् । आचार्ये उत्तिष्ठति, उपविशति, चलति, शयाने वा स्वयमप्युत्तिष्ठन्, उपविशन्, चलन्, शयान एव शिष्यः पृच्छति स्म[2] । उपर्युक्त शिक्षण-विधौ विद्यार्थिनां संख्या नाधिका प्रकल्पनीया ।

---

१. आपस्तम्बो १, १३, ६-८.

२. दीघनिकाये अम्बट्ठ सुत्ते ।

भूमिका

पूर्वसिद्धान्तानुसारं तु ज्योतिषविषयस्याध्ययनार्थं परीक्षाः, शिक्षाणि बन्धनानि च यथायोग्यमुपयुज्यन्त । गुरुकुलानामवबोधायसिद्धान्त शिरोमणौग्रन्थाधिकारे पञ्चमेंष उपवर्णितः । प्रायोगिक-शिक्षाणि भरतस्तु ग्रहणं, धारणं, ज्ञानं, प्रयोगश्चेति चत्वारि अंगानि निर्दिशन्ति ।[1]

ब्रह्मचारि नियमाः:

विद्यार्थि-जीवनं कठोरमासीत् । तस्मात् स्वर्गेऽपि च विद्यार्थिनां निवृत्ती प्रवृत्ती भवन्ति भारतीयानां या अवधारणा । वैदिक-ग्रन्थानि तु धर्म-विज्ञानतो स्वतादारभ्य नाम विद्याप्राप्तिमार्गे बाधाः । ब्रह्मचर्य-शब्दः तथैव कठोरजीवनस्य प्रतीको भवति । ब्रह्मचर्यं तु[2] ब्रह्मणः (वेद-विद्यारूपस्य वेदस्य) प्राप्त्यै ब्रह्मचर्यं (आचरणविधिः) कथ्यते । तस्मात् ब्रह्म विधिज्ञानस्येति सिद्धान्तः । तपो ब्रह्मेति[3] । विष्णुपुराणानुसारं तु -

स्वाध्यायसंयमाभ्यां सदृश्यते पुरुषोत्तमः ।
तत्प्राप्तिकारणं ब्रह्म तदेतदिति पठ्यते ॥६, ६, १.

वैदिकयुगस्यादिकालतः विद्यार्थिजीवने तपः आवश्यकत्वं निर्धारितम् । तदा ब्रह्मचारी धरातले शेते स्म, न तु खट्वायाम् । स गीतनृत्यपरिभ्रमणादिभ्यो दूरो भवतु । स्त्रीविषयक्रोधाहङ्कारसौन्दर्यसुगन्धादिभिः स कदापि न आकृष्टः[4] । उपनिषदि ब्रह्मचर्यं तु तपः यौनस्वाभाविकवासनायाः त्यागस्य स्वरूप-

---

१. नाट्यशास्त्र १, २२.

२. ब्रह्म वेदः, तदध्ययनार्थं व्रतमप्युपचाराद् ब्रह्म । ब्रह्मणि शब्दस्य पदं ब्रह्म तस्मिन् ज्ञानं वा चरति ब्रह्मचर्यं इति ब्रह्मचारिशब्दस्य व्याख्या: ।

३. तैत्त०उप० भृगुव० २.

४. गोपथ ब्रा० २, ५-७ ; २, ९-६.

मेव सम्मतम्[1] । भृगुस्तु ब्रह्मचर्याय वर्षं वासमुपयते[2] । अपिच विद्यार्थिनो गुरोर्गवां चारणं कृतवन्तः[3] । वैदिकयुगानन्तरं ब्रह्मचारिजीवनस्य विस्तृत-नियमाः सूत्रस्मृतिषु दृश्यन्ते । ते नियमाः ब्रह्मचारिणो भोजनमावासं तपः श्रमं वस्त्रं शौचं स्वभावं चाधिकृत्य निर्मिताः । महाभारतानुसारं गु -

> आहूताध्यायी गुरुकर्मस्वचोद्यः पूर्वोत्थायी चरमं चोपशायी ।
> मृदुर्दान्तो धृतिमानप्रमत्तः स्वाध्यायशीलः सिध्यति ब्रह्मचारी ॥
>
> महा०आ०पर्व० ८६, २

(क) <u>भोजनम्</u>

ब्रह्मचारी भिक्षान्नं भुञ्जीत । स भिक्षान्नमाचार्यनिवेदितानि वस्तून्येवालभेत् भोजनपात्रे च किंचिदपि न त्यजेत्, भुक्त्वा च पात्र-मार्जयेत् । स क्षारलवणमधुमांसभोजनं न कुर्यात् । भोजनकाले मौनं निर्वोढव्यं चाप्यविधानमासीत् । बौधायनस्तु विद्यार्थिभ्यो यथेष्टभोजनमात्राया व्यवस्थां कृतवान् ।

(ख) <u>आवासः</u>

विद्यार्थी आचार्यगृहे वसति स्म । अन्यत्र निवासस्य व्यवस्था नासीत् । रात्रौ ब्राह्ममुहूर्ते उत्थाय स आचार्यपादौ प्रणमति स्म । दिवा स नाशेत । रात्रौ स्नानात् प्रागेव गुरोः चरणौ स धावति स्म । तदनन्तरः स शयनाय गच्छेत् । तस्याधः शय्या भवति स्म ।

---

१. प्रश्नोप० १, २; छान्दोग्य ८, ५

२. तै०उ० भृगु० ।

३. छान्दोग्य ४, ४, ५

स्म तपस्यन्[1] । भृगुस्तु ब्रह्मज्ञानाय वारं वारमतप्यत्[2] । अपि च विद्यार्थिनो गुरोर्गवां चारणं कृतवन्त:[3] । वैदिककालानन्तरं ब्रह्मचारिजीवनस्य विस्तृत-नियमा: धर्मसूत्रेषु दृश्यन्ते । ते नियमा: ब्रह्मचारिणो भोजनमावासं तप: अध्ययनं वस्त्रं शौचं स्वभावं चाधिकृत्य निर्मिता: । महाभारतानुसारं तु -

आचार्यकारी गुरुकर्मस्वचोद्य: पूर्वोत्थायी चरमं चोपशायी ।
मृदुर्दान्तो धृतिमानप्रमत्त: स्वाध्यायशील: सिध्यति ब्रह्मचारी ॥

महा०आ०पर्व० ८६.२

(क) भोजनम्

ब्रह्मचारी भिक्षान्नं भिक्षान्नं भुक्तवान् । स भिक्षान्नादुपनिर्दिष्टानि वस्तून्येवाखादत् भोजनमपि च किंचिदपि न अत्यजत्, भुक्त्वा च पात्र-मार्जयत् । स पारान्नमधुमांसभोजनं न कृतवान् । भोजनादि भोगे निर्लोभत्वं चावश्यकविधानमासीत् । बौधायनस्तु विद्यार्थिभ्यो अष्टभोजनमात्राया व्यवस्थां कृतवान् ।

(ख) आवास:

विद्यार्थी आचार्यगृहे वसति स्म । अन्यत्र निवासस्य व्यवस्था नासीत् । रात्रौ ब्राह्ममुहूर्ते उत्थाय स आचार्यपादान् प्रणमति स्म । दिवा स पठति । रात्रौ शयनात् प्रागेव गुरो: चरणौ स धावति स्म । ततश्च स शयनाय गतवान् । तस्याध: शय्या भवति स्म ।

---

१. प्रश्नोप० १.२; छान्दोग्य ८.५

२. तै०उ० भृगु० ।

३. छान्दोग्य ५.४.५

(ग) वस्त्रम्

विद्यार्थिनो द्वे परिधाने उत्तरीयं वासश्च गृह्णन्ति स्म । प्रारम्भावस्थायां विविधवर्णानां विद्यार्थिनामुत्तरीयं विभिन्नप्रकारकं चर्मणा निर्मितम् । उत्तरीयं पशोश्चर्मवत् भूतम् । वाससा कटिप्रदेशादधोभाग आच्छादितः । ब्रह्मचारिणां वस्त्राणि शरीराच्छादनाय साधारणानि स्पष्टमेव[1] । शरीरालङ्काराय न नियमितान्यासन् । राजकुमारा[2] अपि महाभारतानुसारं पूर्वविद्याध्ययनकाले कौशाजिनवाससो बभूवुः ।

(घ) केशाः

ब्रह्मचारिणस्त्रयो विधयः स्मृता निर्दिष्टम् -
तपोविशेषैर्विविधैर्व्रतैश्च विधिचोदितैः ।
वेदः कृत्स्नोऽधिगन्तव्यः सरहस्यो द्विजन्मना ॥मनुस्मृ २, १६५
मुण्डो वा जटिलो वा स्यादथवा स्याच्छिखाजटः ॥मनु, २, २१९.
शास्त्रानुसारं तु विद्यार्थी जटी दीर्घरोमा बभूव ।

(ङ) स्वभावः

ब्रह्मचारी शमशाली, जितेन्द्रियो, विनयी, परिश्रमशीलः अध्ययनपरायणः अपि च आत्मविश्वासी, स्फूर्तिशीलः क्रोधरहितः ईर्ष्यारहितश्च भवेत् ।

---

१. कथं स्यात् शरीरालङ्करणं यतो मनुना निर्दिष्टम् -
दण्डं कमण्डलुं चैव मौञ्जीं च रशनां तथा ।
धारयेत् ब्रह्मचर्ये च भिक्षान्नाशी गुरौ वसन् ॥

२. सभापर्वणि, ४, ३८.

कदापि तेन स्वप्रशंसा परनिन्दा कटुभाषणं वा न कर्तव्यम्[1] ।

ब्रह्मचारिणोऽध्ययनविधिरापस्तम्बेन निर्दिष्टः - न प्रेक्षेत नग्नां स्त्रियम् । ओषधिवनस्पतीनामाच्छिद्य नोपजिघ्रेत् । उपानहौ छत्रं यानमिति च वर्जयेत् । न स्मयेत् । नोपजिघ्रेत् स्त्रियं मुखेन । न हृदयेन प्रार्थयेत् । नाकारणादुपस्पृशेत्[2] । महाभारते विद्यार्थिनस्त्यागमयं जीवनं वर्णितम् । यथा -

सुखार्थिनः कुतो विद्या नास्ति विद्यार्थिनः सुखम् ।
सुखार्थी वा त्यजेद् विद्यां विद्यार्थी वा त्यजेत् सुखम् ॥

उपाकर्म

धर्मशास्त्रे उपाकर्मणः स्वरूपं "अध्ययनमध्यापनं चोपाकरणं प्रारम्भो येन कर्मणा तदध्यायोपाकरणम्" - नारायणः (आश्व०गृ०सू० ३.५.१)। निबन्धकारानुसारं श्रावणे वर्षाकाले वेदाध्ययनाय उपाकर्म ओषधीनां प्रादुर्भावे (मिता०याज्ञ० १.१४२) भवति ।

गृह्यसूत्रेषु उपाकर्म - कालविषये मतैक्यं नास्ति । आश्वलायन-गृह्ये तु श्रावणमासस्य पौर्णमास्यां श्रवणेन युक्तायाम्, अथवा श्रावणस्य पञ्चम्यां हस्तेन वा तस्मिन् उपाकर्म कर्तव्यम्[3] । सम्प्रति उपाकर्म श्रावणस्य पूर्णिमायां

---

१. महाभारते - शा०प० ८५, ३३.
२. आप०ध०सू० १.७. ८-११.
३. ओषधीनां प्रादुर्भावे श्रवणेन श्रावणस्य पञ्चम्यां हस्तेन वा । आ०गृ० ३.५.१-२,
ओषधीनां प्रादुर्भावे श्रवणेन श्रावण्यां पौर्णमास्यां पञ्चम्यां हस्तेन वा । पा०गृ०सू० २.१०.
प्रौष्ठपदीं हस्तेन वाध्यायानुपाकुर्युः । श्रावणीमित्येके । बौ०गृ० ३.२.१४-१५,
प्रौष्ठपदीं हस्तेनोपाकरणम् । श्रावणमित्युपाकृत्यैतमा सावित्रीं काण्ड-कानन्ते । गोभि०गृ०सू० ३.३.१ एवं १३ ;

एव भाति । प्रायशः सर्वाणि गृह्यसूत्राणि एव एतद् विषये स्वमतं प्रकटयन्ति । वाराहगृह्यसूत्राणि मानवं वैखानसं च उपाकर्माणि स्वीकुर्वन्तु । गृह्यकारिकाकारस्तु पारस्करगृह्यसूत्रस्य एव समर्थनं करोति ।

उपाकर्म प्रातःकाले ब्रह्मचारिभिः गृहस्थैः वानप्रस्थैश्च सम्पादितं भवति । अध्यापकाः स्वैः शिष्यैः कुर्वन्ति । पारस्करगृह्यसूत्रस्य प्रसिद्धो भाष्यकारः कर्कोपाध्यायः लिखति - यत् शिष्यरहितस्य गुरोः उपाकर्मणि नाधिकार इति । हरिहरस्य सम्मतिरेषा यत् - साधारण लौकिकाग्नौ शालाग्नौ च उपाकर्म करणं प्रामाणिकं नास्ति, अपितु व्यवहार मात्रम् ।

विधिः

पारस्करगृह्यसूत्रानुसारं उपाकर्मणो विधिः प्रस्तूयते - प्रथमं आघाराज्यभागयोः होमः, ततः सावित्री-श्रद्धा-मेधा-प्रज्ञा-धारणा-सदसस्पति-अनुमति-छन्द-ऋष्यादिभ्यो आज्याहुतिं प्रयच्छेत् । ततः दधि-मिश्रितैः सक्तुभिः अनुमन्त्रैः आहुत्यः प्रदेया भवन्ति । ते च मन्त्राः १. १. १, १. १९१. १६, २. ११. ३, ३. ६२. १८, ४. ५८. ११, ५. ७०. ८, ६. ७५. १६,

---

अथातः स्वाध्यायोपाकर्म श्रावण्यां पौर्णमास्यां प्रौष्ठपद्यां वा ।
वशिष्ठः १३. १

कृताकृतमुपाकर्म । श्रावण्यां पौर्णमास्यां क्रियतापि वा आषाढ्याम् ।
बौधा०गृ० ३. १. १-२,

श्रावणपक्षे ओषधीषु जातासु हस्तेन पौर्णमास्यां स्वाध्यायोपाकर्म ।
हिरण्यकेशि गृ० २. १८. २,

बौधा०गृ० ३. १२ ; मनु० ४. ९५ ; संस्कारप्रकाशः, पृ० ४९०-९८,
गृह्यकारिकायाम् - उपाकर्मश्लोक १-६ ।
स्मृतिमुक्ताफलम्, पृ० ३२,

एव भाति । प्रायशः सर्वाणि गृह्यसूत्राणि एव एतद् विषये स्वस्वमतं प्रकटयन्ति । खादिरगृह्यसूत्रकारेण भाद्रपदं हस्तनक्षत्रं च उपाकर्मणि स्वीकृतम् । गृह्यकारिकाकारस्तु पारस्करगृह्यसूत्रस्य एव समर्थनं करोति ।

उपाकर्म प्रातःकाले ब्रह्मचारिभिः गुरुभिः सम्भूयैव सम्पादितं भाति । अध्यापकाः कर्म छात्रैः कुर्वन्ति । पारस्करगृह्यसूत्रस्य प्रसिद्धो भाष्यकारः कर्काचार्यः लिखति - यत् शिष्यरहितस्य गुरोः उपाकर्मणि नाधिकार इति । हरिहरस्य सम्मतिरेषा यत् - साधारण लौकिकाग्नौ संस्थाय उपाकर्म करणं प्रामाणिकं नास्ति, अपितु व्यवहार मात्रम् ।

विधिः

पारस्करगृह्यसूत्रानुसारं उपाकर्मणो विधिः प्रस्तूयते - प्रथमं आधाराज्यभागस्य होमः, ततः सावित्री-श्रद्धा-मेधा-प्रज्ञा-धारणा-सदसस्पति-अनुमति-छन्द-ऋषिभ्यादिभ्यो आज्याहुतिं प्रयच्छेत् । ततः दधि-मिश्रितैः सक्तुभिः ऋङ्मन्त्रैः आहुत्यः प्रदेया भवन्ति । ते च मन्त्राः: १.१.१, १.१९१.१६, २.४३.३, ३.६२.१८, ४.५८.११, ५.८७.९, ६.७५.१९,

---

अथातः स्वाध्यायोपाकर्म श्रावण्यां पौर्णमास्यां प्रोष्ठपद्यां वा ।
वसिष्ठः १३.१
कृतानुकृतोपाकर्म । श्रावण्यां पौर्णमास्यां स्थितापि वा आषाढ्याम् ।
बौधा०गृ० ३.१.१-२,
श्रावणपक्षे ओषधीषु जातासु हस्तेन पौर्णमास्यां स्वाध्यायोपाकर्म ।
हिरण्यकेशि गृ० २.१८.२,
बौधा०गृ० ३.१२ ; मनु० ४.९५ ; संस्कारप्रकाशः, पृ० ७८०-९८,
गृह्यकारिकायाम् - उपाकर्मश्लोक १-६ ।
स्मृतिमुक्ताफलम्, पृ० ३२,

७, ७४, २५, ८, ७३, ७७, ६, १९७, ४, ७, ९९१, ७७ सन्ति । आहुति प्रदाना-नन्तरं पुनरपि आहुति पूर्वं गायत्रीमन्त्रस्य जपः, ततः वेदपाठारम्भो भवति । पारस्करगृह्ये (२, १०) विस्तृतं वर्णनं मिलति । आपस्तम्बगृह्ये संक्षेपेण उपाकर्म वर्णितम् ।

## उत्सर्जनम्

उत्सर्जनस्य कालविषये विभिन्नानि मतानि सन्ति । बौधायन-गृह्यसूत्रेण (१, ५, १९४) पौषस्य माघस्य वा पूर्णिमा रोहिणीयुक्ता इति प्रदत्त सम्मतिः । आश्वलायनेन (३, ५, १४) वेदाध्ययनार्थं उपाकर्मतः उत्सर्जनान्तराले षाण्मासिकावधिः निश्चिता । पारस्करगृह्ये तु ४½ या ६ मासं यावत् वेदाध्ययनं कृत्वा ततः वेदाध्ययनस्य समाप्तिं कुर्यादिति व्यवस्था । गोभिल-गृह्ये (३, ३, १४) तथा च खादिरगृ० (३, २, २४) सांखा०गृ० (४, ६, १) पौष-मासस्य माघमासस्य वा पूर्णिमा उक्ता रोहिणीयुक्ता इति मतम् । फलतः पौषो वा माघो वा उत्सर्जन-कर्मणो रोहिणीयुक्तो इति । पारस्करगृह्यसूत्रेण उत्सर्जनविधिः वर्णिता - आचार्यः शिष्यैः स्नातानां गच्छेत् । तत्र देव-गुरु-पितृ-आचार्य-गन्धर्वादीनां तर्पणं कर्तव्यम्, ततः चतुरावृत्त्यां गायत्रीजपः, पुनः अन्ते उत्सर्जनस्य संकल्पः । उत्सर्जनकर्मणि उपाकर्म इव अनध्यायो भवति ।

## अनध्याय प्रकरणम्

गृह्यसूत्रानुसारं श्रावणमासस्य पूर्णिमातिथावुपाकर्मविधिना अध्ययना-रम्भो भवतु । तत्प्रभृति पञ्चमासान् अध्ययनम् इष्यते । पौष-पूर्णिमायामुत्सर्ग-

---

१. पा०गृ०सू० २, १२, आश्व०गृ०सू० ३, ५, १३, गोभि०गृ०सू० ३, ३, १५, म०स्मृ० ४, ९७, या०स्मृ० १, १४३, मान०गृ०सू० १, ५१.

विधिना श्रावणं समाप्यते स्म । अनध्यायदिवसानां संख्या नासीत् स्थिरा । साधारणी हि प्रतिपदि, अष्टमि, चतुर्दशि, संयोग, धार्मिकपर्वणि इति अनध्याय: प्रवर्तित: । तथा हि भूकम्पे, उल्कापाते, वज्राग्निपाते विद्युति च इति प्रकृतिकाण्डेषु, अमावस्यायां पौर्णमास्यां चानध्यायो घोषित: । गृह्यकारिकायां 'ऋतुदारिकेति विप्लुता सूत्रे' प्रस्तुत चानध्यायस्य (गृ०का० अध्याय पृ० श्लो० ९-२०) पारस्करगृह्ये पि गृह्यकारिकाया: समर्थिता: एव अनध्यायदिवसा: वर्णिता (पा०गृ०सू० २, ११, ४) ।

केशान्त:

केशान्त-संस्कार: अस्य प्रथमं चौलकर्मवत् परिकल्पितम् एवं आसीत्[1] । कालक्रमात् पृथक् इति प्रतीते संस्कारस्यास्य पृथग्गणना जाता । उपनयन-संस्कारदेव केशान्तसामान्यत्वं केशान्तापेक्षया प्राधान्यतरं प्रतिभाति । गृह्यसूत्राणि चूडाकरणेन सह केशान्तं वर्णयन्ति[2] । प्रसिद्धो विद्वान् पाठकश्च केशान्तं संस्कारत्वेन गणयति[3] । व्याख्यातेन केशान्त: षोडशसंस्कारेषु नास्ति प्रयुक्त:[4] । संस्कारस्यास्यापरं नाम गोदानम् । केशान्ते आचार्याय गोदानस्य विधानं वर्तते । अयं संस्कार: षोडशे वर्षे भवति[5] । अत्र प्रमाणानि:

---

१. वा०गृ०सू०शे०सू० ३६

२. आ०गृ०सू० १, १८ ; पा०गृ०सू० २, १, ३ ; शां०गृ०सू० १, २८, १८ ; गो०गृ० सू० ३, १ ; खा०गृ०सू० २, ६, १६ ; आप०गृ०सू० १२ ; बौ०गृ० २, ५, १

३. षोडशवर्षाणि गौतम समावर्तसंस्कार: । वा०स्मृ०सं०भा० १

४. या०स्मृ० १, ३४.

५. केशान्तं षोडशे वर्षे ब्राह्मणस्य विधीयते म०स्मृ० २.

श्मश्रूणां सर्वप्रथमं वपनं भवति[1] । कतिपयाचार्याणां मतानुसारं केशान्तसंस्कारेण सह ब्रह्मचर्य-समाप्तिः भवति स्म[2] । संस्कारेऽस्मिन् सर्वाणि कर्माणि चूडाकरणवद् भवन्ति । अत्र भेदो एतावानेव यत् मस्तकस्य स्थाने श्मश्रूणां वपनविधानमस्ति । संस्कारान्ते आचार्याय गोदानं कर्तव्यम् । तदन्ते वर्ष-पर्यन्तं ब्रह्मचर्यस्य पालनं तपश्चर्या पालनीयम् ।

समावर्तनम्

अध्ययनान्ते स्वयं परिसमाप्य प्रायशो विद्यार्थिनः स्वगृहमागच्छन् । तस्माद् गुरुगृहात् समावर्तनम्[3] । अस्मिन्नवसरे समावर्तनसंस्कारः सम्पादितः । समावर्तनसंस्कारे विवाहयोग्यस्य ब्रह्मचारिणो विधिस्नानमभूत् । इदं परित्यज्य समावर्तनस्यापरनाम स्नानमिति । समावर्तन-सम्बन्धि-स्नानमिदं कृत्वैव स स्नातको भवति । पाणिनिस्तु स्नातकस्यापत्यार्थं प्रत्ययं निर्दिशति । इदं नाम तस्य गार्हस्थ्यप्रवेशस्य सूचकम् । ब्रह्मचर्यकाले विद्यार्थी सर्वथा भोग-विलासादिभ्यो विरतो भवति । समावर्तनकाले तदाचरणस्य प्राप्तो भवति । स्नातकस्य वेशविन्यासः गृहस्थानामिवाभवत् ।

पारस्करगृह्यसूत्रानुसारं त्रयः स्नातकाः भवन्ति । विद्यास्नातकः, व्रतस्नातकः, विद्याव्रतस्नातकश्च । तत्र समाप्य विद्यामसमाप्य व्रतं यः समावर्तते

---

१. म॰स्मृ॰ २.६५

२. गोदानाख्यं कर्म (केशान्तम्) इत्येके । आ॰गृ॰सू॰ १.८, पा॰गृ॰सू॰ ८, गो॰गृ॰सू॰ १.१८ इत्यादिषु ।

३. तत्र समावर्तनं नाम वेदाध्ययनानन्तरं गुरुकुलात् स्वगृहागमनम् । वी॰मि॰सं॰भा॰ १, पृ॰ ५६४.

ते विद्यास्नातकाः । यथा व्रतकालस्य पालनं ये समापयन्ति स्म ते व्रत-स्नातकाः । विद्याव्रतमुभयं समाप्य ये निवर्तन्ते ते विद्याव्रतस्नातकाः मताः[1] ।

उपनयनं पश्चात् कदा समावर्तनं विधेयमिति विचारणीया जटिला समस्या वर्तते । प्रथमस्तावद्विधिः षट्त्रिंशदाब्दिकं ब्रह्मचर्यं चरेदिति प्रथमो नियमः, तत्र प्रत्येकस्य वेदस्य अध्ययनार्थं द्वादशवर्षात्मकः कालः नियत आसीत्[2] । द्वितीयो नियमस्तु ३६, १८ वा ९ वर्षात्मकश्च वर्तते । तृतीये तृतीये नियमे चतुर्विंशति वर्षाणां अवस्था नियता आसीत्[3] गृह-काङ्क्षाकारी षोडशादितस्तु पारस्करगृह्ये समर्थितम् ।

समावर्तन-स्नानानन्तरं विद्यार्थिनः एवं पदं वर्ध्यमानानि[4] - विद्यार्थिजीवनस्य समाप्त्यर्थं गुरोरनुमतिं गृह्णाति । एतस्मिन्काले विद्यार्थी यथा सामर्थ्यं गुरवेऽपि दक्षिणां प्रयच्छति स्म । गुरुदक्षिणाविषयिको सन्दर्भस्तु कथा सुप्रथिता अस्ति[5] । गुरोराज्ञामादाय सः समावर्तनार्थं स्नानं करोति स्म । तत्र प्रथमं पूर्णकुम्भैः च स्वच्छोदकैः स्नानं विदधाति स्म, ततः मेखला-दण्डादीनां त्यागः कृतवान् । नवानि च वस्त्राभूषणान्यपि धारयति स्म[6] ।

---

१. त्रयः स्नातका भवन्ति - विद्यास्नातको व्रतस्नातको विद्याव्रतस्नातक इति । पा०गृ०सू० २.५.३२.

२. षट्त्रिंशदाब्दिकं ब्रह्मचर्यं चरेत् ।
द्वादशवर्षं वा प्रतिवेदम् ॥ तत्र, २.५

३. गृहस्थाकाङ्क्षायाम् पूर्व० समावर्तनम् ।

४. विद्यान्ते गुरुमर्थेन निमन्त्र्य कृतानुज्ञानस्य वा स्नानमिति, आ०गृ०सू० ३.८, म०स्मृ० ३.४, २.२४५, २.२४६

५. स्नायीत गुर्वनुज्ञातो दत्त्वास्मै दक्षिणां हि गाम्, वी०मि०सं०भा० १, पृ० ५६५

६. पा०गृ०सू० २.३.१-२, २.६.८, २.६.८-१०, २.६.१२-१३, गो०गृ०सू० ३.४.११, ३.५.२६, खा०गृ०सू० ३.१.६, बौ०गृ०सू० २.६, आप०गृ०सू० ९.११.५, ३.१.२६, ३.६.८.

समावर्तनसंस्कारस्य वैशिष्ट्येन ज्ञायते यत् प्राचीने भारते स्नातका समागतानां विदुषां महान् आदरः सम्मानश्चासीत्। एतद् विषये गृह्यसूत्रे विभिन्नानि मतानि मिलन्ति। स्नातकस्तु सर्वत्र मधुपर्केण सम्मानितो भवत्। प्रथमाचार्य एव तस्मै मधुपर्कसमर्पणमकरोत्। आचार्यः स्नातकमन्ते चोपदिशति स्म - सत्यं वद। धर्मं चर। स्वाध्यायान्माप्रमदः। आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः। सत्यान्न प्रमदितव्यम्। धर्मान्न प्रमदितव्यम्। कुशलान्न प्रमदितव्यम्। भूत्यै न प्रमदितव्यम्। स्वाध्याय प्रवचनाभ्यां न प्रमदितव्यम्। देवपितृकार्याभ्यां न प्रमदितव्यम्। मातृ देवो भव। पितृ देवो भव। आचार्य देवो भव। अतिथि देवो भव। यान्यनवद्यानि कर्माणि तानि सेवितव्यानि, नो इतराणि। यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि नो इतराणि। (तै०उ०शिक्षावल्ली)।

समावर्तनानन्तरं स्नातकस्य गृहस्थाश्रम परिपालनाय गृहिण्या अपेक्षाभूत्। सा तु विवाहसंस्कारेण लब्धासीत्।

<u>स्नातकस्य नियमाः</u>

गृह्यसूत्रेषु[1] वर्णिताः स्नातकस्य पालिकाः नियमाः सन्ति। रेणुदीक्षितेन शाट्यायनगृह्यसूत्रोक्तानि स्नातकव्रतानि गृह्यकारिकायां लिखितानि। अत्र केषु कृत्याध्यधिकारः। समावर्तनानन्तरं स्नातको व्रतानि संकल्पेत। तानि च स्मृत्युक्तानि श्रुत्युक्तानि वेति द्विविधानि। सर्वाण्यपि पुरुषार्थानीति न तु[2] समावर्तनाङ्गानि। तानि यथा - निमित्तं विना न नग्नो स्नायामि। न नग्नः शयिषे। न नग्नां स्त्रियमीक्षिष्ये

---

१. गृह्यकारिकायां स्नातकनियमाः।

२. पा०गृ०सू० २.७. ९-१९

स्यात्र मैथुनात् । वर्षति न धावितव्यं । न वृक्षमारोहितव्यं । न कूपमवरोहितव्यं न बाहुभ्यां नदी तरितव्या । न प्राणसंशयमापत्तव्यं । स्नातकस्यापि यथा - नित्यं यज्ञोपवीतद्वयधारणम्, सोदककमण्डलुं छत्रमुष्णीषं पादुके उपानहौ सुवर्ण कुण्डले दर्भमुष्ट्यादि धारणम्, नित्यमध्ययनम्, चाण्डालासंभाषणात् । कन्या-धारणं, रजस्वलायाः निरीक्षणं, भार्यया सार्धमपि एकत्र भोजनम्, निषिद्धम् । रात्रौ ग्रामान्तरं गमनं चापि निषिद्धमासीत् स्नातकस्य इति ।

विवाहः

विवाहस्तु सन्तानकामाय, प्रकृतिसुखाय, धर्मसम्पादनाय चाभवत् । संस्कारत्वादस्य धार्मिकं महत्त्वमस्ति । गृह्यकारिकानुसारं स्त्रीणां जन्मतः युग्मे वर्षे पाणिपीडनं शुभं भवति ।

लग्नशुद्धिः

रेणुदीक्षितानुसारं विवाहः ज्येष्ठे माघे माधवे फाल्गुने मार्गे कार्त्तिके वा शुभदः स्यादिति । एतद्विषये च विस्तृतं वर्णनं प्रस्तौति स्वकीये ग्रन्थे (गृह्यकारिका पूर्वविवाहः श्लोक १-७) ।

विवाहभेदाः

पुरा विवाहस्याष्टभेदा आसन् - ब्राह्मः, दैवः, आर्षः, प्राजापत्यः, आसुरः, गान्धर्वः, राक्षसः, पैशाचश्च । अस्मिन् प्रकरणे विवाहशब्दस्यार्थो विशिष्ट एव । गार्हस्थ्यधर्मस्य सम्पादनाय पतिगृहे वासाय च कन्या येनोपायेन प्राप्ता तमेवोपायमुद्दिश्य विवाहप्रकारो निर्दिष्टः । अस्मिन् प्रकरणे विवाहः संस्कारात्मकोऽनास्ति । उपर्युक्तविधिभिः कन्या

संस्कारार्थं विभिन्नेषु लोकविधिः परिणयस्य विहितो । देवीभागव-
वृत्त निर्दिष्टम् –

प्राचीनेषु च विवाहेषु विधिर्वैवाहिकः स्मृतः ।
कौतुकस्य त्रिधावर्णः सर्वेषामपि सात्त्विकः ॥

पुरा भारते बहुविधेषु सांस्कृतिकस्तरेषु विविधजातीनां जना बभूवुः । यथा – ब्रह्मपरायणा वेदवादिनो वा ब्राह्मणाः, देवपरायणा यज्ञवादिनो वा ब्राह्मणाः[1], मन्त्रद्रष्टार ऋषयः, प्रजापतेः परायणा मानवाः, बहुविवाहेन अर्पिता असुराः, भोगकलाविलासपरायणा-गन्धर्वाः, कलाशिल्पी पुरुषपरायणा राक्षसाः रूपपरायणाः पिशाचाश्च[2] । एतेषां वैशिष्ट्येन विवाहार्थं कन्याग्रहणं तेषु तेषु वर्गेषु प्रचलितम् । ब्राह्मणाः ऋषयो मानवाश्चार्यवर्गीया बभूवुः । आर्यवर्गीया विवाहकार्यकुशला ज्ञातका भूत्वा शास्त्रोक्तविधिना विवाहार्थं कन्यां प्राप्नुवन् ।

ब्राह्मविवाहे वैदिके ब्राह्मणायाऽलङ्कृता कन्या प्रदीयते स्म । बौधा-यनानुसारम् – श्रुत-शीलविदुषे ब्रह्मचारिणे अर्थिने कन्या देया स ब्राह्मः ।

---

१. तस्मिन्नु ह वै तत्प्रजापतिव्रतं चरन्ति ते मिथुनमुत्पादयन्ते । तेषामेवैष ब्रह्मलोको येषां तपो ब्रह्मचर्यं येषु सत्यं प्रतिष्ठितम् । प्रश्नोपनि० १.१५

२. एतदष्टकर्मेषु चत्वार आद्या आर्या बभूवुः । अपरे चत्वार अनार्याः । आर्या द्विजाः प्रायशो ब्राह्मणा क्षत्रिया वैश्याश्च बभूवुः । असुरराक्षसाः प्रायः सर्वे क्षत्रिया वैश्या वा बभूवुः, केचिदेव ब्राह्मणा बभूवुः । गन्धर्वा अपि केचित् क्षत्रियाः प्रायः वैश्याः शूद्रा वा बभूवुः । सर्वे पिशाचास्तु शूद्रतां प्रतिपन्नाः ।

उपर्युक्ताष्टप्रकारकविवाहेषु वरणविधिः चावगन्तव्यः । शेषेषु वरणं नापेक्ष्यते ।

अस्मिन् विवाहे वरस्य वैदुष्यं सच्चरित्रत्वमासीत् । दैवविवाहे यज्ञस्य ऋत्विजे दत्ता कन्या दक्षिणारूपेणासीत् । ब्राह्मदैवविवाहौ ब्राह्मणस्यैव नेतीरणाम् । ब्राह्मणानामृत्विक्त्वे सति गोमिथुनस्य ग्रहणं कृत्वैव तस्मै कन्या-प्रदानस्य प्रचलनमभूत् । अस्मिन् मते गोमिथुनस्य ग्रहणं शुल्करूपं नासीत् । अपितु सा यज्ञादिकर्मरीतिरासीत् । तत्रापि गोमिथुनस्य मूल्यप्रतीकत्वादपि-भूतमभूत् । आर्षविवाहो ऽपि ब्राह्मणेष्वेव प्रचलित आसीत्[1] । सामान्यत-स्तु ब्राह्मणा एव ऋषय आसन् ।

प्राजापत्यविवाहः आर्षवत् प्रायः सर्वाधिकोऽप्यासीत्[2] । स्नातकाः अस्नातकाः सर्वे ऽपि गार्हस्थ्यधर्मनिर्वाहाय सम्बन्धं कृत्वा प्राजापत्यरीत्या परिणीताः । आसुरविवाहस्तु प्रथमम् असुरवर्गेषु पश्चात् क्षत्रियवर्गेषु प्रचलितः । विवाहे ऽस्मिन् कन्यायाः सौन्दर्यातिशयं प्रतिष्ठाप-यन्नेव तस्यास्तथा शारीरिकी क्षमता[3] । गान्धर्वविवाहस्य प्रचलनं प्रथमं गन्धर्व-वर्गेषु पश्चात् राजन्यक्षत्रियवर्गेषु चाभवत् । गान्धर्वे तु वरकन्ययोः परस्परा-कर्षणमात्रेण समागमप्रवृत्तिरुद्भूता । परस्पराकर्षणं तु सौन्दर्यं नृत्यसंगीता-भिरुचावाश्रितमिति । वरकन्ययोः परस्परमैत्री गन्धर्वेषु सुप्रचलितमासीत्[4] ।

---

१. वैदिककालीनाः गोत्रप्रवर्तिका ऋषिविदिताः ऋग्वेदे- ६, २८, १, १०, ७५, ४, ६, ७. ३३, १, प्रभृतिमन्त्रद्रष्टारः कौशिकाः स्मृताः ।

२. मनुस्तु प्रजापतिः, शतपथब्रा० १३, ४, ३, ३, ११, तस्य नाम्ना प्रचलितो यं प्राजापत्योविवाहः । मनुश्च गृहस्थाश्रमस्य श्रेष्ठत्वमाचष्टे एवं च भूतानां प्रीतिरस्मात् - प्रजार्थं स्त्रियः सृष्टाः सन्तानार्थं च मानवाः इति ।

३. पाण्डोर्विवाहार्थं माद्री क्रीता ततु भीष्मेण ।

४. सन्धानकामास्तु गन्धर्वाः ।
रामायणे किष्कि० ५६. ८.

कामिनां कृते गान्धर्वविवाहो गुरुसंबंधादनुकूलो युक्तः । राक्षसविवाहः प्रथमं राजन्यवर्गेषु पश्चात् क्षत्रियेषु प्रचलितः । विवाहेऽस्मिन् बलप्रयोगेण कन्याप्राप्तिरभवत् । राक्षसाः क्षत्रिया वा बलात्कारिणो बभूवुः । बलात्कारेण कन्याहरणं प्रतिष्ठाद्योतकमिवाभवत् । तेषां विवाहव्यापारं नाम मात्र एव । पैशाचविवाहः प्रथमं पिशाचेषु पश्चात् क्रूरेषु प्रचलितो भवत् । मनुनोक्तम् -

सुप्तां मत्तां प्रमत्तां वा रहो यत्रोपगच्छति ।
स पापिष्ठो विवाहानां पैशाचः प्रथितोऽष्टमः ॥३. ३४.

उपर्युक्ता विवाहास्तु प्रागैतिहासिका एव । केषु वर्णेषु चाधुनाप्यमी जना वर्तन्ते । तेषां न केवलं विवाहो पितु वंशे एव पालन-चिन्तन आत्म-प्रवृत्तयो भवति ।

बाल-विवाहः

भारतीय धर्मशास्त्रानुसारं बालविवाहाय प्रतिबन्धः केषांचन कृते पालनीयः आसीत् । इतिहासविदां मतमिदं यत्[1] बालविवाह-प्रथायाः प्रारम्भः यादवकाले कन्यानां न्यूनत्वात् अभूत् । एवमेव मनु - यवनेषु यौनशोषणादिनिवारणाय बालविवाहस्य प्रचलनमभूत्[2] । शतपथब्राह्मणानुसारं तृतीये चतुर्थे वा पुरुषे भ्रातृभगिन्योः विवाहवर्णनं अस्ति[3] । शतपथब्राह्मणस्य भाष्यकारेण हरिस्वामिनाऽप्यनेन आचारकमनुमोदितम् । वैदिककाले सपिण्डविवाहस्य निषेधः नासीत् ।

---

१. जा०एफ० मैकलेन, स्टडीज इन् ऐंशियेण्ट हिस्ट्री १, पृ० ८०.
२. एल०एच०मार्गन, ऐंशियेण्ट सोसायटी, पृ० ३४, फ्रेजर : टोटेमिज्म एण्ड एक्सोगैमी, १, पृ० १७.
३. तदं हि चतुर्थे पुरुषे तृतीये सङ्गच्छामहे । शतपथब्रा० १.८.३.६

मातुलविवाहस्य निषेधः

मातुलविवाहस्य निषेधः सर्वप्रथमं गृह्यसूत्रेषु मिलति । आपस्तम्ब-कौशिक-बौधायन-पारस्करगृह्यसूत्रेषु मातुलस्य निषेधत्वं प्राप्यते पर गौतमस्य निषेधोनास्ति[1] । मातुलकन्यया सह विवाहस्य प्रचलनमद्यापि दक्षिणभारते दृश्यते । अस्य समर्थनं याज्ञवल्क्यस्मृतौ अपरार्कभाष्ये मिलति[2] । रेणुकाचार्य-मते मातुलविवाहस्य समर्थनं नास्ति[3] ।

सवर्णविवाहः

स्मृति-सम्मतं मतमिदं यत् सवर्णा कन्या एव विवाहार्थं प्रशस्ता भवति[4] । प्राचीनकाले पि अस्य प्रचलनमुदितं तथापि, तथापि पुरा अस्य पालनं कठोरतया न भवति स्म ।

अनुलोमविवाहः

वेदेषु अनुलोमविवाहस्य उदाहरणानि मिलन्ति । ऋग्वेदा-नुसारं च्यवन-श्यावाश्व-विमदादिभिः राजकन्याविवाहः कृतः[5] । क्षत्रिय-नृपस्य भावयव्यस्य पत्नी आङ्गिरसी ब्राह्मण-कन्या भूत्[6] । प्राचीन ब्राह्मण-

---

1. केशवकृतानीतिप्रकरणमञ्जरी ।
2. या० स्मृ० १.५५ अपरार्क-भाष्यम् ।
3. गृह्यकारिका विं० प्रकरणम् ।
4. उक्तवेदेषु त्रिषो भार्याः सवर्णाः उदाहरणान्युक्तानि । मनुस्मृ० ३.४.
5. ऋग्वे० १.११२.१९, ११६.१, ११७.२०, ७.३६.
6. तत्रैव, १.१२६

शूद्रा: वैश्येभ्य: परिणीता:[1] । यजुर्वेदे शूद्रकन्याभि: सह आर्यपुरुषाणां सम्बन्धा: सन्तीति वर्णनं मिलति[2] । औशिज-कवष-वत्सादि महापुरुषा: दासीभ्य: शूद्राभ्यो वा जीवस्य पूर्वम् । अत: एतादृशा: विवाहा: तदानीं विधिसम्मता आसन् । परं गृह्यकारिकायां स्मृत्यादिषु अनुलोम-विवाहस्य समर्थनं न कृतम् ।

<u>प्रतिलोमविवाह:</u>

वैदिक-साहित्ये शूद्रार्यो: विवाहस्यापि उदाहरणानि दृश्यन्ते । यजुर्वेदे आर्या शूद्रस्त्रीभिरेव आयाति[3] । आर्या शूद्रस्य सम्बन्ध: यस्ता आर्यागमं शूद्रेण सह कर्तुं इच्छति । अथार्थ: शूद्रेण सह विवाहिता वैश्या-स्त्री भवेत्[4] ।

> शूद्रायामेव: जाता पञ्चजन्याख्या गुणात् ।
> पैशाच्यपितृषु जायन्ते कर्णिका: ।।

[5] कौटिल्यार्थशास्त्रानुसारं परिवारस्य दासी अपि विधवाया: देव-पुत्रेण सह स्वामिन: विधवापत्न्या सह विवाहं कर्तुं शक्नुत् । अथर्ववेदे अपि अन्यविवाहस्य वर्णनं प्राप्तम्(ऋवे० २, ५, ६) । अत: वैदिकयुगे अपि जना: अनुलोम-प्रतिलोमविवाहा: समाचरन्ति स्म ।

---

१. तैब्रा० ३, ८, ७, ३ ; शतब्रा० १३, २.
२. वा०सं० १३, ३०, ३१ ; तैसं० ७, ४, १९, २-३.
३. यजु० सं० ३०, ५
४. मनु० १०, १२.
५. आप०गृ० ३, २, १८.

अन्तर्जातीयविवाह-निषेधः

मनुस्मृतौ शूद्रस्त्रिया सह विवाहो निषिद्ध इति प्रतिपादितः[1]। मनुः अन्तर्जातीयविवाहं कामप्रभवमिति कथयति[2], तदनुसारं चान्तर्जातीयविवाहतः समुत्पन्नाया सन्ततेः निम्न-स्थानं भवति[3]। सम्प्रति प्रायशः न को ऽपि अन्तर्जातीयमनुमन्यते। नेपुदापितो ऽपि मनुवचनमनुवदति[4]।

वरवध्वोः योग्यता

वरवध्वोः योग्यतायाः परीक्षा बाह्याभ्यन्तरं कृता। बाह्यतः सौन्दर्यं पुरुषत्वं नारीत्वञ्च तथा च दर्शनीयानि। आभ्यन्तरदृष्ट्या शील-चरित्रं कुलं च परीक्षणीयानि। वैदिकयुगे विवाहावस्था गृहस्थाश्रमस्य योग्यतामनुमापिता। तदवस्था क्रमशः वरायवध्वै च पंचविंशतिवर्षाणि षोडशवर्षाणि चाभिमता। स्मृतौ कन्यादानावस्था स्वल्पीकृता। दश-वर्षा द्वादशवर्षीया वा कन्या परिणेयेति मतम्[5]।

---

१. हीनजातिस्त्रियं मोहादुद्वहन्तो द्विजातयः।
कुलान्येव नयन्त्याशु ससन्तानानि शूद्रताम्॥३.१५.
शूद्रां शयनमारोप्य ब्राह्मणो यात्यधोगतिम्।
जनयित्वा सुतं तस्यां ब्राह्मण्यादेव हीयते॥३.१७.

२. म०स्मृ० ३.१२.

३. तत्रैव, १७.

४. गृह्यकारिकायां विवाहप्रकरणम्.

५. वसिष्ठ स्मृ० १७, महाभा० अनु०प०अ० १३, ब्रह्मपु० १.५;
वैखा०स्मृ० १.६; परा०स्मृ० ७.८-९.

कामसूत्रानुसारं तु पञ्चपञ्चकथान्तरं त्रिवर्णमाकेय मौद्गिति मतं समाचारं प्रतिभाति । स्वयंवराणां वर्णनं स्पष्टं स्यात् यत् पुरा वधूनां वराणां च योग्यता विषये दैवकी नाभवत् विचारणाय: । वाल्मीकिनापि महत्त्वं स्वयंवरमिलाभात् ।

वाङ्मयदृष्ट्या गुणप्रकर्षः शारीरिकसौन्दर्यमपि दृष्ट्वैव । वैदिक-कालत एवास्य प्रयोजनाय स्वयंवरविधिः प्रवर्तितः । तस्मिन् युगे कन्यकानां सौन्दर्यनिरूपणाय शास्त्रमानदण्डाः प्रतिष्ठिता आसन् । तथा -

स्वयंवरे हि योषाणां प्रवेशन्ति सुश्रोणीं विसृष्टान्तराम् ।
सा मघी संज्ञायेति ॥ श०ब्रा० १.२.५.१६

गृह्यसूत्रे लक्षणसम्पन्नात् स्वस्थात् पुरुषादेव वरत्वेन ग्रहणं विधानं स्वीकृतम् । आश्वलायनस्तु बाह्यलक्षणैरेव सन्तुष्टो जातः । (आ०गृ०सू० १.५) । भारद्वाजगृह्यानुसारं विवाहे चत्वारि कारणानि विचारितव्यानि, वित्तं रूपं प्रज्ञा कुलं चेति[1] । भारद्वाजस्मृतिस्तु कन्यारूपमेव बहुमन्यते[2] । किन्तु भारद्वाजस्य मतमिदं सर्वैरेव न स्वीकृतम् । मनुयाज्ञवल्क्य-शातातपादिमहर्षीणां विभिन्नानि मतानि सन्ति । मनुः प्रज्ञारूपादिगुण-सम्पन्नां शुभलक्षणान्वितां कन्यां स्वीकरोति[3] । याज्ञवल्क्यस्तु कन्यायां

---

१. चत्वारि विवाहकारणानि वित्तं रूपं प्रज्ञा बान्धवमिति ।भा०गृ०सू० १.६

२. यस्यां मनो पुनर्ति चक्षुश्च प्रतिबद्धे ।
तां विना सुप्रकल्पार्थो किं शमिन् करिष्यति ॥भा०स्मृ० १.१२

३. म०स्मृ० १.१९ ; तत्रैव ३.८ ;
अव्यङ्गाङ्गीं सौम्यनाम्नीं हंसवारणगामिनीम् ।
तनुलोमकेशदशनां मृद्वङ्गीमुद्वहेत् स्त्रियम् ॥ तत्रैव, ३.१०.

कान्तां कामयते[1] । शातातपः कन्यायाः बाह्यसौन्दर्यमवलोकयति[2] । मिता-
क्षराटीकाकारेण नपुंसकस्य निवृत्त्यै स्त्रीणां परीक्षणमभिहितम् -

स्त्रियं नपुंसकस्य निवृत्त्यै स्त्रीत्वेन परीक्षिताम् ।
या०स्मृ० मिताक्षरा १.५२

याज्ञवल्क्यः विवाहार्थं यथायोग्यां अनन्यपूर्विकां कन्यकां स्वीकरोति[3]। परन्तु कन्यकायाः सौन्दर्यं बहुमन्यते । कन्यारत्नं दुष्कुलादपि ग्रहणीयम् । कामसूत्रानुसारं तु रूप-शील-लक्षण-सौन्दर्य-स्वास्थ्यैः सम्पन्नश्च वरश्चेद्गुणैः सम्पन्नायाः कन्यायाः विवाहे भवितुमर्हति ।

याज्ञवल्क्यमते वरोऽपि समस्तगुणयुक्तत्वमिच्छति । एतैरेव गुणैर्युक्तः (या०स्मृ० १.५५) । मनुवचनानुसारं यथाक्रमं वेदमधीत्य चाखण्डब्रह्मचर्ययुक्तः ब्रह्मचारी एव वरणीय आसीत् । यथा -

वेदानधीत्य वेदौ वा वेदं वापि यथाक्रमम् ।
अविप्लुतब्रह्मचर्यो गृहस्थाश्रममाविशेत् ॥ म०स्मृ० ३.२

वरस्य द्वितीया महत्त्वपूर्णा विशेषता दीर्घायुरुक्ता । वीरमित्रोदये बृहज्ज्योतिषपुराणवचनानुसारं सर्वप्रथममायुरेव विचारणीयम् । यतो हि विगतायुषां नराणां लक्षणैः न किमपि प्रयोजनं भवति[4] । वात्स्यायनानुसारं

---

1. या०स्मृ० १.५२
2. वी०मि०भा० २ पृ० ७३१ शातातपवचनम् ।
3. या०स्मृ० १.५२ ; तत्र पुनर्भूविवक्षितापुनः
4. पूर्वमायुः परीक्षेत पश्चाल्लक्षणमादिशेत् ।
   आयुर्हीननराणां च लक्षणैः किं प्रयोजनम् ॥
   वी०मि० भा० २, पृ० ७५२

विनाशक्रीताय सवर्णाय कन्या प्रदेया[1] । गौतमस्तु विद्या-चारित्र्य-बान्धव-शीलसम्पन्नेन पुरुषेण सह कन्या विवाहस्यानुमोदनमकरोत्[2] । आपस्तम्बो ऽपि प्रायः गौतममतमेव समर्थयति[3] ।

यमस्तु वरविषयकतानां सर्वाधिकं विस्तृतं सुविशदं सुविस्तृतं च वर्णनं प्रस्तौति - वरस्य कुलशील-शरीरायु-विद्या-वित्त साधन-सम्पन्नतां च परीक्ष्य विवाहः कर्तव्यः, एतदतिरिक्तं न किमपि विचारणीयम्[4] । स्मृतिकार विचारतः कन्यादानं बोधयति यत् सम्पन्नाय च वराय दातव्यम्[5] । वसिष्ठानुसारं तु दुर्गुणिने रोगादिग्रस्ताय कन्या न प्रदेया, तं दत्त्वा ऽपि कन्यां हरेत् । यथा -

कुलशीलविहीनस्य षण्ढादिपतितस्य च ।
अपस्मारिविधर्मस्य रोगिणां वेषधारिणाम् ॥
दत्तामपि हरेत् कन्यां सगोत्रोढान्तथैव च ॥
(वी०मि०सं०भा० २, पृ० ७५८ वसिष्ठः)

---

१. विनाशक्रीतः सवर्णः सवर्णां भार्यां विन्देत् (आ०गृ०सू० ७.९.७.६)

२. विद्याचारित्र्यबन्धुशीलसम्पन्नाय कन्यां दद्यात् । गौ०ध०सू०

३. बन्धुशीलक्षणसम्पन्नः श्रुतवानरोग इति ।
आप०ध०सू० १.३.१०.

४. कुलं च शीलं च वपुर्वयश्च विद्यां च वित्तं च सनाथतां च ।
एतान्गुणान्सप्त परीक्ष्य देया कन्या बुधैः शेषमचिन्तनीयम् ॥
यमवचनम् वी०मि०सं०भा० २, पृ० ७५१ उद्धृतम्.

५. अपत्यार्थं स्त्रियः सृष्टाः स्त्रीक्षेत्रं बीजिनो नराः ।
क्षेत्रं बीजवते देयं नाबीजी क्षेत्रमर्हति ॥
पा०गृ०सू० १.८ नारदेन चोक्तम्.

विवाहविधिः

यद्यपि भारते वर्षे प्रचलितो विवाहसंस्कारविधिरेकः नास्ति । देश-प्रान्तभेदात् तत्र बहो भिन्नता । तथापि गृह्यकारिकानुसारं रेणुदीक्षितेन परिलक्षितं तदनुरूपं वर्णयामि विधिमेनः ।

वरागतो कन्यादानार्थं वरस्य द्वारि मधुपर्कदानि श्वशुरः तत्र स्वागतमकरोत्, तत्र आसनपाद्यार्घ्यः मधुपर्क-दानैश्च वराय सम्मानं प्रयच्छति । मधुपर्कानन्तरं वस्त्राभूषणादिभिः कन्यापूजनं भवति । ततः परः वरः पत्नी-पदं प्रार्थयति (पा०गृ०सू० १,४,१२-१४) । तत्पश्चात् वधूपिता वधूवरयोः समञ्जनमकरोत् - समञ्जन्तु विश्वेदेवा इत्यादिना । ततः गोत्रोच्चारपूर्वकं कन्यादानं भवति । वस्तुतः कन्यादाने अधिकारी कन्यापिता एव भवति । गृह्यसूत्रेषु पिता एवाधिकारी कन्यादानस्य (पा०गृ०सू० १,४,१६) ।

याज्ञवल्क्यमतानुसारं पितृ-पितामह-भ्रातृ-सकुल्य माता च कन्याप्रदः सन्ति[1] । गृह्यकारिकानुसारं पिता एव अधिकारी कन्यादानस्य[2] । नारदस्य मतं याज्ञवल्क्यतो भिन्नम्[3] । पिता गोत्रनामोच्चारणपूर्वकं वराय कन्यादानं प्रयच्छति । कन्यादानात्पूर्वं प्रतिबन्ध-वस्तुप्रत्यर्पणे । धर्मार्थे च काले नातिचरितव्या त्वयेयम् । नातिचरामि इति वरः प्रतिज्ञामकरोत् । कन्यादानमादाय

---

१. पिता पितामहो भ्राता सकुल्यो जननी तथा ।
कन्याप्रदः पूर्वनाशे प्रकृतिस्थः परः परः ॥
या०स्मृ० १,६३.

२. गृह्यकारिकायाम् विवाहप्रकरणम्

३. ध०शा०इ०भा० २, पृ० ८२२ द्रष्टव्यं नारदस्य मतम् ।

वरः कन्यां समञ्जनं करोति स्म (पा०गृ०सू० १.४.१५-१७) । ततश्च राष्ट्र-भृदसीत्यादिकं मन्त्रं जपन् ददाति स्म मालां । तदनन्तरं वधूवरयोः समीक्षणं च (पा०गृ०सू० १.४) तदनन्तरं कन्या स्वपत्युः दीर्घायुष्यं प्रार्थयति ।

पाणिग्रहणम्

वरः कन्यायाः पाणिग्रहणकाले वाचयति - अहं सौभगत्वाय ते हस्तं गृह्णामि । त्वं मया सह दीर्घायुष्यं प्राप्नु[1] ।

अश्मारोहणम्

ततोऽग्नेः उत्तरतः वस्तुतः अश्मारोहणमस्तु । अत्र प्रस्तरस्य तात्पर्यं सुदृढत्वमस्ति । एतस्मिन् काले वधूः दक्षिणं पादं शिलोपरि आरो-हयति वरः[2] ।

यशोगानम्

तदनन्तरं पत्नि कर्तव्ये वरः स्त्रीणां प्रशंसायां गाथामेकं गायति, यस्य प्रतिनिधिस्वरूपा देवी सरस्वती करोति - हे शुभे सरस्वति अस्माकं ते स्तुतिं करोमि । यस्यां इदं सर्वं समुत्पन्नः, अस्माकं तां गाथां गास्यामि या गाथा स्त्रीणामुत्तमं यशः अस्ति -

१. ऋवे० १०.८५.३६ ; शा०गृ०सू० १.१३.२ ; आ०गृ०सू० १.७.३ ; गो०गृ०सू० २.२.१६ ; पा०गृ०सू० १.३.७.३१ ; भा०गृ०सू० १.६.२०.१

२. शां०गृ०सू० १.१३.१२ ; आ०गृ०सू० १.७.७ ; पा०गृ०सू० १.७.१ ; गो०गृ०सू० २.२.३ ; भा०गृ०सू० १.३.१६ ; बौ०गृ०सू० १.१६.१८ ; आप०गृ०सू० ५.३

सरस्वति प्रेदमव सुभगे वाजिनीवति ।

यान्त्वा विश्वस्य भूतस्य प्रजायां यस्याग्रतः ।।

तामद्यगाथां गास्यामि या स्त्रीणामुत्तमं यशः ।।

पा०गृ०सू० १.७.

अग्निप्रदक्षिणा

गाथागाने पश्चात् वधूवरौ अग्निप्रदक्षिणां कुरुतः । तत्र मन्त्रस्मरणपूर्वकं प्रार्थयति अग्निः, हे अग्ने त्वं पुनः पतिभ्यो प्रजया सह जायाम् प्रयच्छ -

तुभ्यमग्ने पर्यवहन्त्सूर्यां वहतुना सह ।

पुनः पतिभ्यो जायान्दा अग्ने प्रजया सह ।। पा०गृ०सू० १.७.

अनन्तरं लाजाहोमतः सर्वाः क्रियाः पुनः भवन्ति स्म । वधू चाग्नौ शेषान् लाजान् भगाय स्वाहा इत्यनेनावपतु ।

सप्तपदी

तदनन्तरं सप्तपदी भवति । पतिः पत्नीं चोत्तरदिशां प्रति पुनः सप्तपदं प्रक्रामयति ।

एकमिषे द्वे ऊर्जे त्रीणि रायस्पोषाय चत्वारि मयो भवाय पंचपशुभ्यः षड् ऋतुभ्यः सखे सप्तपदाभव मामनुव्रता भव । विष्णुस्त्वा नयत्विति सर्वत्रानुषजति (पा०गृ०सू० १.८.१-२) ।

उपर्युक्तानि सप्तपदानि पुरुषार्थाय जीवनाय चाभिप्रायाणि सन्ति । वैधानिक दृष्ट्या सप्तपदी चात्यन्ता महत्त्वपूर्णा क्रिया । यतो हि

सप्तपदाप्रभृति विवाहसंस्कारस्यास्य वैधता भवति । मन्वादिस्मृतिषु तत्त्व-स्यास्य समर्थनं कृतम् -

स्वगोत्राद् भ्रश्यते नारी विवाहात् सप्तमे पदे ।
पाणिग्रहणिकामन्त्रास्तु नियतं दारलक्षणम् ॥
तेषां निष्ठा तु विज्ञेया विवाहात् सप्तमे पदे ॥मनु०स्मृ०८,७०

नोदकेन न वाचा वा कन्यायाः पतिरिष्यते ।
पाणिग्रहणसंस्काराद् पतित्वं सप्तमे पदे ॥पा०गृ० १,८४,

अभिषिञ्चनम्

सप्तपदान्तरमेव पत्न्याः शिरसि अभिषिञ्चनमस्ति[1] । सर्वथैव जलस्य औषध-सदृशं पवित्रत्वं च प्रसिद्धम् । अनेन विधिना वधू शारीरिक-दोषेभ्यः मुक्ता भवति, तथा च तस्य वैवाहिकं जीवनं सफलमस्तीति विश्वासः जनानाम् ।

हृदयस्पर्शः

ततः[2] वध्वाः दक्षिणस्य स्कन्धोपरि हस्तं नीत्वा तस्या हृदय-मालभते वरः । अहं स्वव्रते ते हृदयं धारयामि । मम चित्तं त्वच्चित्तानुकूलमस्तु । हृदयं भाव-केन्द्रम् । स्पर्शेन्द्रियावारःप्रतीकत्वेण हृदयस्थितान् भावान् उभावपि-मभिजानाति, येन परस्परं भावना एकमेवं स्यात् ।

---

१. पा०गृ०सू० १,८५

२. अथास्य दक्षिणांसमधि हृदयमालभते । मम व्रते ते हृदयं दधामि मम चित्त-मनुचित्तं ते अस्तु । मम वाचमेकमना जुषस्व प्रजापतिष्ट्वा नियुनक्तु मह्यम् ।
पा०गृ०सू० १,८,८,

<u>आशीर्वचनम् (सिन्दूरदानम्)</u>

ततो वरः समागतान् सम्बन्धिजनान् आशीर्वचनार्थं आमन्त्रयति[1]। अस्मिन् समये सिन्दूरदानमपि भवति। गृह्यसूत्रेषु सिन्दूरदानविधिः नास्ति। पद्धतिकाराः नाम गुरुणां उक्तिव्यवहारतः कुर्वन्ति[2]। साम्प्रतं प्रायः अस्याः सुमङ्गली इति नामकरणं जातम्। आशीर्वचनं पश्चात् स्वगृहगमनाय दूरपुरुषाः उपविशन्ति स्म। साम्प्रतं प्रथेयं न दृश्यते[3]। अस्य स्थाने ताल-परिवर्तन एव भवति।

<u>विवाहस्य दक्षिणा</u>

गृह्यसूत्रानुसारं आचार्याय ब्राह्मणः एका गौः दक्षिणात्वेन प्रयच्छति स्म, क्षत्रियः ग्रामम्, वैश्यश्च घोटकं यावत्[4]।

<u>सूर्यदर्शनम्(ध्रुवदर्शनम्)</u>

विवाहसंस्कारं पश्चात् वधू सूर्यं ध्रुवं[6] वा अवलोकयति[5]। दिवा-लग्ने सूर्यम्, रात्रौ सति विवाहे ध्रुवदर्शनं विधीयते। आचार्यमतानुसारं तु वधू अरुन्धतीं सप्तर्षिमण्डलमपि विलोकयति[7]। सा दृष्ट्वापि पश्यामीति वदति।

---

१. अथैनामभिमन्त्रयते। सुमङ्गलीरियं वधूरिमां समेत पश्यत सौभाग्यमस्यै दत्त्वा याथास्तं विपरेतनेति। पा०गृ० सू० १.८.९.
२. आचारात् स्त्रियः सिन्दूरदानादि कुर्वन्ति ।गदाधरवृत्तिः पा०गृ०सू० १.८.९. उद्धृतम्।
३. पा०गृ०सू० १.८.७.
४. तत्रैव, १.८.१५-१७.
५. तत्रैव, १.८.१९.
६. तत्रैव, १.८.१६.
७. आ०गृ०सू० १.७.२२.

## त्रिरात्रव्रतम्

वैदिक-विधिविधानानां पश्चात् त्रिरात्रव्रतस्य क्रमः आयाति[१]। एषु दिनेषु वर्जयितुम्, अधश्शयनम्, षड्रात्रम्: त्रिरात्रं वा ब्रह्मचर्यपालनम् अक्षारालवणयुक्तं भोजनं निर्दिष्टं पारस्करादिगृह्यसूत्रेः[२]। प्राचीनकाले एतेषु दिनेषु पृथगेव विधिः प्रचलितः आसीत्, यस्य वर्णनं बौधायनगृह्ये मिलति। वस्तुतः व्रतमिदं दम्पत्योः आत्मसंयमस्य शिक्षा मिलति स्म[३]।

## चतुर्थी कर्म

गृह्यसूत्रानुसारं विवाहतः पश्चात् चतुर्थ्यां रात्रौ कर्म इदं भवति। तत्र पतिः गृह्याग्निं प्रतिष्ठाप्य वैवाहिकाग्निपूर्वकं कर्म करोति स्म। अत्र कर्मणि पतिः, वनस्पति-पशु-गन्धर्वादीनां स्थाने वायु-सूर्य-चन्द्र-गन्धर्वान् च स्तुति-पूर्वकं तेभ्यः आहुति-दानम् करोति[४]। अतः इदं कर्म वधू-पितृ-गृहे एव भवति। अनेन कर्मणा वधूशरीरतः दुष्टप्रभावाणां निराकरणं भवति[५]। चतुर्थीकर्म-समाप्तौ पतिः स्वपत्नीं पक्वान्नं भोजयति स्म।

---

१. पा०गृ०सू० १.८.२१.

२. बौ०गृ०सू० १.५.१०, १८.

३. काठ० ११.२.३.४ ; पा०गृ०सू० १.८.१७ ; कुन्हाप० ऋग्वैदिक कल्चर, पृ० ३८; बौ०गृ०सू० १.७.११.

४. पा०गृ०सू० १.११.१३ ; गो०गृ०सू० २.५ ; आ०गृ०सू० १.१८.१९ ; शा०गृ०सू० १.१९.२२ ; खा०गृ०सू० १.१३.११ ; आ०गृ०सू० ८.८.

५. प्राणैस्ते प्राणान् सन्दधामि अस्थिभिरस्थीनि मांसै-र्मांसानि त्वचा त्वचम्। पा०गृ०सू० १.११.५.

शालाकर्म

गृह्यकारिकानुसारं शुभाशुभविचारपूर्वकं शालाकर्म कर्तव्यमिति निर्देशः । वर्णं कर्म भूमि शुद्धिं कर्तव्यम् । यत्र कण्टकिनो वृक्षाः तत्र मन्दिरं न कार्यम् । यस्मिन् क्षेत्रे प्लक्ष-वट-उदुम्बर-पिप्पलाख्याः वृक्षाः तथा च प्रशस्ता ओषधयः भवन्ति तस्मिन् क्षेत्रे शालाकर्म कृते प्रशस्तं भवति ।

रेणुदीक्षितमतानुसारं विप्रादीनां क्रमात् सिता, रक्ता, पीता, कृष्णा भूमिः प्रशस्ता । वस्तुतः भूमि-चयनं तपरीक्षणं भवति । तत्र पृथिव्याः शान्तिः शल्यनिस्सारणपूर्वकं कर्तव्यम् , अन्यथा विपरीतं फलं विनिर्दिष्टम् । गृह्यकारिकायां शालाकर्म विस्तारपूर्वकं वर्णितमस्ति । गृह-निर्माणं वास्तु-शास्त्रानुसारं करणीयम् । प्रथमं सीमान्तरं निखान्येत्, ततः स्तम्भमुच्छ्रयेत् शालाकर्म निर्माणकम् । शालां प्रपूर्य तस्यां प्रविशेत् शुभमुहूर्ते - इति ।

वास्तुपूजनम्

तस्मादिति यदि शालाकर्मणि वास्तुपूजनं कर्तव्यम् गृहमध्ये ऐशान-कोणे वा वास्तुमण्डलं विरचयेत् । तत्र ऐशानादिक्रमेण देवतावाहनं कृत्वा तेषां पूजनं कृत्वा ततः पञ्चवारुणीभिः हुत्वा चाष्टोत्तरशतं हुत्वा, मधुसर्पिषा यवैः कृष्णतिलैश्च होमकर्मविधिम् । अत्र तावद् विशेषः याज्ञिकसम्मतः । अपामार्गम्, दूर्वा, कुशा, बिल्वश्च प्रयोगो दृश्यते । वास्तुपूजनेन कष्टं नाशं याति इति रेणुदीक्षितस्य सम्मतिः ।

शल्यनिस्सारणम्

गृह्यकारिकायां शल्यनिस्सारणविधिः वर्णितः । वस्तुतः शल्य-निस्सारणेन अनिष्टं दूरीभवति । सर्वप्रथमं निखिलस्य क्षेत्रस्य नवभागं कृत्वा

ग्रहण-माध्यमेन ग्रह-विचारो भवति । कन्यां फलनादीदिति व्यवस्थितो विधिः । यावन्न भवति ग्रहणिकारणं तावद्भूमिशोधनं क्रिया भूणां एव तिष्ठति । कालीपद्मुखकायां ग्रहणिकारणविधिः विस्तारं वर्णितः । यत्सारं विस्तारभयान्न लिखामि । गृह्यकारिकायाः पञ्चविंशकारा अपि ग्रहणिकारणं वर्णयन्ति, तत्र तेषां प्रमाणं भिन्न स्थानेषु ।

कर्षणपञ्चापूर्वा:

कृषिकार्यस्य प्रथमं कर्तव्यमस्ति यत् स भूमि वस्तु स्वकीयां भूमिमाश्रित्य कर्माणि कुर्यात् । विप्रस्य त्रिशो वृत्तः भवन्ति, याजनाध्यापन-वृत्तिः प्रतिग्रहश्च । क्षत्रियस्य कर्म प्रजानां परिपालनं रक्षणं च । विशः कर्माणि कृषिः, वाणिज्यं, पशुपालनं चेति । अथवा वाणिज्यार्थं कृषीवल्लि-मार्गेषु कुटुम्बपोषणाय । कृषीवलवृत्तिविषये गृह्यकारिकायां तेनु-दाहृतो लिखितम् -

अतो ब्रह्मयोगः स्यादूर्ध्वं धान्यमर्जितः ।
तावादि पतिता यस्या वस्त्रापूर्णा किमु ॥
स्वकीय परित्यक्तः कण्याश्यानंकुरम् ।
यायावरः शिलोञ्छेन विप्रोपार्जिता यदि ।
कृताकुलधान्यार्थैः ब्राह्मणस्तु चतुर्विधः ॥
गृह्यकारिका पृ० कर्षण० ७-९.

गृह्यकारिकायां देवलोकानि बहुमाणि वर्णितानि सन्ति । यदि विप्रवृत्तिमाध्यमेन याजन-यापनं न भवति तदा क्षात्रवृत्तिं वैश्यवृत्तिं वा गृह्णीयात् ।

## आग्रहायणीकम्

पुष्यार्थे आग्रहायणीकर्म कर्तव्यम् । तत्र प्रथमं इन्द्रादिभ्यो बलिं दद्यात् । ततः अश्विभ्यां मरुद्भ्यां वा अपामपादिभ्यो पृथक्-पृथक् बलिं प्रदद्यात् । अन्ततः आतुरः सर्वान् मधु सर्पिषा प्राश्नीयात् । ततः पुष्पाणां आग्रहायणेन कर्तव्यम् आग्रहायणीके निन्दितो वृषः यथा -

आभुग्नं भुग्नितं छिन्नपुच्छितं व्याधितं तथा ।
कृत्वा वृषं तु गृहाग्नौ अनाचर्य न वाहयेत् ॥
गृह्य०पु०अग्नीषोम-३५

रेणुदासित-श्री उपनयनेन मनुष्यं याचते । यथा हि -

भूमिं भित्वौषधीं छित्वा हत्वा कीटपिपीलिकाम् ।
पुनन्ति कर्षका यज्ञैः कर्षणान्नात्र संशयः ॥गृ०पु०अ० ६१

आग्रहायणी पुनः वैश्यवृत्तिः वर्तते । परन्तु याज्ञिका अपि विप्राः क्षत्रियो वा वृत्तिभ्यां गृहाकुर्वन्ति ।

## सीतायज्ञः

अथ सीतायज्ञस्य व्याख्यास्यामः । तत्र कृषिप्रसङ्गे औपासनाग्नौ विधीयते । गोभिलगृह्यसूत्रे (४. ४. २७) । सीतायज्ञस्य केदारे विधानमुपलभ्यते । अतो यज्ञः स्मार्त-औपासनाग्नौ वा गृहेऽग्नौ क्षेत्र कृषिकर्मकाले वाऽनुष्ठीयते । इमं कृषौ यज्ञीयं निर्माय - इन्द्र-मरुद्गण-पर्जन्य-अशनि-भगः आहुति प्रदद्यात् । सीता-आशा-अरडा-अनघादिभ्यः बलाहुतीः प्रदद्यात् । पारस्करगृह्यसूत्रे (२. १७) सर्वस्यास्य सविस्तरं वर्णनं मिलति । पारस्करगृह्ये (२. १३) कृषिप्रकरणविषयकं वृत्तं वर्णितमस्ति ।

वशीकरणम्

दासस्य वशीकरणार्थं कर्मानुष्ठीयते । अस्य कर्मणः वर्णनं पारस्करगृह्यसूत्रे (३.७.१-४) प्राप्यते । गृह्यकारिकायां अस्य विधिः मिलति -

तत्प्रक्रमादीतरस्य सुप्तिनस्तस्य वै निशि ।
गवादीयाथितः कुम्भादाय पुरिसंज्ञकं ।
तस्मिन्कुम्भात्सिंच्य स्वपतस्तस्य तेन वै ॥
परिषिञ्चन्पराधाभिः तन्तारवा गिरिस्तु ।
इत्यादि नापवान्त शीर्णं आदि वधून्तुः ॥

(गृह्य०पु० वशीकरणम् -१-३)

प्रातः [illegible] कर्णस्थपृष्ठं [illegible] सौमविधानं दासमनिमुख्येभ्यो कर्तव्यम् । अनेन कर्मणा दासः वशकं भवति ।

मेधाजननम्

पारस्करगृह्यसूत्रे (३.७.१-३) मेधाजननं वर्णितम् । यदि को पि शिरःकुत्रे चित्रः स्यादस्य च येन गुरुभ्यो प्रत्यायेत् । यत्तु मामिति मन्त्रेण अनुष्ठानं कुर्यात् । अथवा पिअशान्दिव यमे मन्त्रे अष्टकां यजेत् । तथा प्रतिदिवसे प्रभुणी पूर्वदिवे पूर्वं श्रावयन् शान्तिसीमानुच्यते । कर्मेदं सर्वस्यान्तेषु सर्वेष्वपिवर्णेषु कर्तव्यमिति व्यवस्था वर्तते ।

उत्क्रमणविधिः (मृत्यौ तत्कालम्)

मृत्योः प्राग्भूत-क्रियाणां तथा च भविष्यमाणानां क्रियाणां विशदं वर्णनं धर्मशास्त्रेषु मीमांस्यते । किन्तु परम्परायां कानिचापि विधि-

विधानानि तैरि प्रकटितानि सन्ति । गृह्यकारिकायां विनायकस्य चित्रं वर्णनं मिलति । यदा मानवः कुप्यति तस्य मृत्युः समीपमागता, तदा प्रिय-जनान् पार्श्वे तिष्ठते संस्मरति । आत्मनः कल्याणार्थं च ब्राह्मणेभ्यो निधिमपरः धनं प्रयच्छति । तस्मिन्नु गोदानं विशिष्टं भवति । अतो वैतरणी पतति । यतो हि गौः पापाल्लोकात् पतितां तारयति । या मृतकस्य पश्चाद्गामिनी भवति गृह्यसूत्रेषु गौः अनुस्तरणी संज्ञया व्यवहृता (बौ०पि०सू० ४.१) । समीपागतायां मृत्यौ, तदा जनाः स्वच्छ-भूमौ तं उपवेशयन्ति । तस्याः तदा अन्यः जनः भवन्ति । तस्य कृष्णस्य शिरः दक्षिणस्यां दिशि भवति(आ०गृ०सू० ४.२) तस्य कृष्णस्य कर्ण-पार्श्वे तत्कालसम्बन्धितानां मन्त्राणां पाठः प्रकरोति । यदि कृष्णः विप्रः भवति तदा तस्य कर्णे आरण्यककानि उच्चारितव्यानि भवन्ति । तदुपरि मृतस्य कर्णे जनाः गीतायाः श्लोकान् श्रावयन्ति ।

अन्त्येष्टिकालीनः(शव-दाह-विधिः)

आश्वलायन-मतानुसारं मृत्योः पश्चात् शीघ्रमग्निदेयमिति व्यवस्था मिलति । परन्तु एष नियमः तेषां कृते भवति ये श्रौते गृह्याग्निहोत्रिणः भवन्ति । बौधायनमतानुसारं मृतकस्य दक्षिणं हस्तं संस्पृश्य गार्हपत्याग्नौ पूर्णाहुतीन् आहुतिचतुष्टयं दातव्यमिति व्यवस्था । किन्तु भारद्वाजः आप-स्तम्बीयाम्भो धातूनां प्रक्षेपो भवतीति निर्दिष्टमनेन आहुतिसंख्या च लिखिता । आश्वलायनगृह्यसूत्रानुसारं उत्तरायणः पात्रे भिन्न क्रमेण प्रदेयाः भवन्ति (आ०गृ०सू० ४.१) । परन्तु सम्प्रति भारतीये समाजे तुषैः सह पञ्च-कर्मणि अतिरिक्तेन जनः कर्मप्रकाशयति । अधुना तु महाब्राह्मणस्य कृते तुलसी-पत्राणि गङ्गाजलं सह प्रतिपादन्ति । केचित् एका विलक्षणा एव प्रथा विकसिता जाता । तदनुसारं महाब्राह्मणाः जनाः नमस्कारं यान्ति, तदा च मृतकस्य

तस्य देहस्य चाग्नौ भागे कृते स्थापयन्ति । अस्या: क्रियाया नाम अन्त्येष्टि: अस्ति । समस्ते भारते अस्या: प्रथाया: विषये पूर्णा चानुपस्थिति: तथा चास्य आधुनिकस्य पुराणवचनात् इदं निश्चितुं शक्यते यदस्या प्रथाया: प्रारम्भ: आधुनिके काले अभवत् (बौ०ध०सू० १.१) ।

निर्हरणविधि:

गृह्यसूत्रानुसारं शोधानन्तरं उद्घाटयन्ती श्मशानं नयेत्, तत: तस्मिन् कृष्णचर्मास्तरणं कर्तव्यम् । सम्प्रति बंगाला भारतस्ये दृश्यते कृष्णमृगचर्मा-स्तु शीघ्र एव यात: निर्हरणात् प्राक् मृतो वस्त्राणि परिधारयितव्यानि । गृह्यकारिकाया: वर्णनं लोकप्रचलितमिव दृश्यते ।

कतिपयैराचार्यै: मतमिदं प्रतिपादितम् यत् शवयानं वृषभैराकर्षणीयं भवेत्, अपि तु शवस्य अवस्थानुरूपमस्ति (आ०गृ०सू० ४.१) । आश्वलायन-मतानुसारं एकस्य एव वृषभस्य व्यवहार: श्मशाने कर्तव्य: इति । प्राचीनग्रन्थेषु श्मशाने शूद्रस्य उल्लेख: न दृश्यते (पा०गृ०सू० ३.१३) । मनुना विप्रस्य श्मशानं शूद्रेण न समाचरितव्यमिति व्यवस्था प्रदत्ता (म०स्मृ० ५.१०४) ।

अन्वारोहण: नेतृत्वं मुख्यतया मृतकस्य ज्येष्ठ-पुत्र: वा प्रमुख: बान्धव: सम्बन्धी करोति (पा०गृ०सू० ३, व्याख्यातार:) । गृह्यसूत्रानुसारं सर्वान् सपिण्ड-जनान् अवयोजनार्थ सह श्मशानं यावत् गन्तव्यम् (पा०गृ०सू० ३.१०.८) । प्राचीनकाले स्त्रिय: प्रकीर्णकेशा: पांसुभिर्व्याकुलमाना: श्मशानं गच्छन्ति स्म । मृतकस्य कनिष्ठ भार्या तासां नेतृत्वं करोति स्म (बौ०पि०सू० १.४.३) । पश्चि-दानां प्रथायं न दृश्यते । प्राचीनकाले कन्याया-सम्बन्धी राज्ञां शव-यात्रा: ज्ञातिभिरन्यत्रसमाचारात् , एकदा भी: अश्व वा अभिनीत स्म[1] । इदानीं

---

१. बौ०गृ०सू० १.४.१ ; आ०गृ०सू० ४.१

अकारितः प्राक् गोदानं भवति न तु पश्चात्कालम् । ऋग्वेदकाले मृतस्य भ्रातुः सदारीणां नीः आस्य वा कस्यचित् स्थानापन्नाया: भार्यो निहित आसीत्(ऋ० वेद: पृ० ५७७-८८) । सूत्रकाले एतस्मिन् प्रकरणे परिवर्तनमागतम्, तथा च मृतस्य कृते अति भावविभिन्नोपयात्रा-सम्बन्धिनी भूत् (आ०गृ०सू०४) ।

मृतस्य गृहात् श्मशानभूमिं यावत् भविष्यमाणा यात्रा भाग-दौविध्यता अस्ति । अपयात्रा-प्रत्येकस्मिन् विरामे विरमति, यत्र विशिष्टं विधि-विधानं सम्पद्यते । मार्गे यमसूक्तस्य पाठो भवति(आ०गृ०सू०४ ) गृह्यकारिकायां वर्णक्रमेण व्यवस्था वर्तते -

दक्षिणेन मृतं शूद्रं पुरद्वारेण निर्हरेत् ।
पश्चिमोत्तरपूर्वैस्तु यथा संख्यं द्विजातय: ॥
(गृह्यकारिका पृ० निर्हरणविधि: ७)

दाह:

श्मशानभूमिमुपगम्य चितानिर्माणं भवति, तत्र गर्तनिर्माणार्थं स्थानचयनं भवति । गृह्यसूत्रेषु चितानिर्माणविषये विधानमुपलभ्यते । स्थानचयनं पश्चात् तस्य स्थानस्य शुद्धि: भवति स्म । बौधायनमतानुसारं अस्य शुद्धिमावृत्य पुरोगामिनं कृत्वा तेन प्रक्षाल्य होत्र प्रपूर्य दर्भै: संस्तीर्येत्[1] इति व्यवस्था वर्तते । कालान्तरे व्यवस्थेयं जनै: निर्मिता निन्दिता च जाता । वस्तुत: अस्या: परम्परायां मूले सदाचारस्य शौचित्यं

---

१. अथास्य दक्षिणं शुद्धिमावृत्य त्रिपुराणं कृत्वा अद्भि: प्रक्षाल्य सर्पिषा अन्नाद्यपि पूरयित्वा दर्भै: संस्तीर्यास्ति(बौ०पि०सू० २,६) ।

निहितं भवतु । अनुना तस्य मस्तिकाग्नं कर्णौ तथा च चक्षु नासिकाग्रं तु पुरुषं पर्णमिति ख्याप्यते । तदनन्तरं तस्य चितौपरि स्थापनं भवति[1] । ब्राह्मणस्य: तस्य हस्ते रुक्म: स्वर्णपिण्ड:, क्षत्रियस्य हस्ते धनु:, तथा च वैश्य: तस्य हस्ते मणि: भवति[2] ।

चितिका अग्निप्रणयनम्

बौधायनश्रौतसूत्रे (४. १७-१५) आहिताग्नि अन्त्येष्टिक्रियाविषये सविस्तरं वर्णनं मिलति । कात्यायन श्रौतसूत्रे (२५. ७) एतत् एव विधि: संक्षिप्त: वर्णित । कात्यायनेन (२५. ७. १८) वैकल्पिकानां कर्णं तथा च मन्त्रादि निरूपणस्य चर्चा कृता । कौशिकगृह्यसूत्रे (८०. १३. १६) बौधायनश्रौतसूत्रे च (५. ११. ४-५) तथा च बौधायनपितृमेधसूत्रे (१. २) पृथक् व्यवस्था दृश्यते ।

पात्रासादनम्

तदाधानानन्तरं निम्नलिखितानुसारं पात्रासादनं कर्तव्यम् । दक्षिणे हस्ते जुहू वामे हस्ते उपभृत, दक्षिणे स्रुव:, वामे निम्नोक्ता स्थाना, तथा च कूप-शिर:दन्त-नासिका कर्ण-उदर-गुप्तांग-चरण भागेषु च क्रमात् ध्रुवपात्रं, प्रस्तरखण्डं, प्राशित्रहरणं अन्या अरणि:, उलूखल-मुसल-शूर्प-पृषदाज्यादि च न्यसेत (कौशिक: ८१. ३. ४४) । पात्रासादनं पश्चात् दाहो भवति ।

---

१. बौ०गृ०सू० ४

२. बौ०पि०सू० १. ८. ३-५

सूतिकायाः दाहविधिः

पद्धतिषु¹ प्रसूतायाः रजस्वलायाः वा मरणे विशेष विधि-विधानमस्ति । तदनुसारं तस्याः पंचगव्यमिश्रितेन पयसा स्नापयेत् । यतो हि शुद्ध्यभावात्, या खलु प्रसूता सम्यक्स्थिता नवः प्रायश्चित्ता वा भवति । ततः प्रायश्चित्तपूर्वकविधानं कृत्वा तथा च शरीरं वस्त्रेण आच्छाद्य सूतिकायाः अग्निसंस्कारो भवति² । परन्तु सम्पूर्णदाहाभावात् एष दाहः अन्येभ्यः भिन्नः³ । गृह्यकारिकानुसारं रजस्वलायाः प्रेतायाः संस्कारं न समाचरेत् इति वचनं लिखितम् ।

प्रवासमृतविधिः

प्रवासमृतानां विषये बौधायनैः⁴ एव गृह्ये विशदं वर्णनं कृतम् । मृत्युसूचनामवाप्य तत्रस्थजनः अस्थ्यानयनार्थं तत्र गच्छेत् । ततः तं दग्ध्वा वा प्राप्य अन्त्येष्टिकर्म कर्तव्यम् । अस्थिनः अभावे यदि प्रति प्रेतस्य नामोच्चारणपूर्वकं आवाहयेत् । कृष्णमृगचर्मणि तस्य पुत्रं निधाय तस्मिन् यज्ञपात्राणि धारयेत्, ततः अग्निसंस्कारो भवति । यदि दूरदेशे च प्रस्थितस्य जनस्य शवं न मिलेत् तदा तस्य अग्निसंस्कारो भवति । परन्तु यदि स्वस्थः जनः गृहमागच्छेत् तदा तस्य गर्भाधानात् विवाहपर्यन्तम् समस्त संस्काराः कर्तव्याः । अधुना स्वल्पा एव प्रथायाः प्रचलनं दृश्यते ।

---

१. स्मार्तकृत्यादपद्धतिः ।

२. गृह्यकारिका पृ० सूतिकादाहः ।

३. विशेषस्तु न दग्धव्य इति वचनात् ।

४. बौ०पि०सू० ३.६ ; तत्र, ३.७.

भूमिका

## उत्क्रान्तिकाले अग्न्याधानविधिः

यदि गृहस्थाग्नि हीनस्य अग्निः नाशतां याति तदा अग्निमन्थनं कृत्वा तेनाग्निना दहेदिति गृह्योक्तो विधिः । किन्तु विश्व-वाहिनः स्यात् तत्र कृत-कालानन्तरं तस्य मरणं भवति, तर्हि अग्निहोत्रविधिना एव तस्य दाहो विधेयः ।

## अन्वारोहणम्

स्वमृतस्य भर्त्रा सह दहनं नाम अन्वारोहणम् । भारतीयगृह्यकारिकायां एतस्याः प्रथायाः विस्तृतं वर्णनं मिलति । रेणुदीक्षितेन एतस्य फलं कथितम् -

पापक्षयकरं तस्य भर्तुस्तारणं भवेत् ।
कैवल्यफलदं महापुण्यं फलं ध्रुवम् ॥
(गृह्य०पु० अन्वारोहणम् २)

अन्वारोहणं धर्मं शास्त्रप्रामाण्येन बहुकालपर्यन्तं भारते प्रचलितम् । तथापि एतस्य समर्थनं समस्तानि गृह्यसूत्राणि न कुर्वन्ति । अन्वारोहणं गर्भिणीनां कृते निषिद्धमासीत् ।

## बालानां दाहविधिः

बालानां दाहविधिविषये रेणुदीक्षितस्य विवरणं मिलति, एतत्तु बालानां दहनविधिः क्रमं च निराकरोति । गृह्ये तु मुख्यतः बालानां दाह-विधिः न दृश्यते ।

भूमिका

स्वयमग्निप्रवेशः

यदि को पि मुमुक्षुः वह्नौ प्रविशेत् तदा स चितां निर्माय स्नाता-चान्तकर्माणं च शुचिं कृत्वा अग्निं प्रज्वाल्य चितारोहणं कुर्यात्। गृह्य-कारिकायां प्रत्यवसाने अग्निप्रवेशनं कथितं ।

महापथविधिः

एकादशाहान्तरं स्नानं नाम महापथः । तत्र बहुदुग्धं बहुप्रदे स्नात्वा तत्र प्रेताय पृथक्-पृथक् कर्मविधानम् । ततः प्रेतान्नभोजनं च कीर्तितः प्राप्यते गृह्यकारिकायाम् ।

उदकदानविधिः

महापथविधेरनन्तरं उदककर्म भवति[1]। तत्र प्रेताय जलदानं नाम उदककर्म । मृतकस्य सपिण्डाः सर्वे सगोत्रा वा स्नात्वा प्राचीनावीतिनो भवन्ति । स्नाने एकवस्त्रौ भूत्वा सर्वे कुर्वन्ति शोकार्ताः जनाः दक्षिणाभिमुखो भूत्वा स्नान्ति । मृतस्य नामोच्चारण-पूर्वं सकृत् जलाञ्जलिं प्रयच्छन्ति । ततो गृहं प्रत्यायान्ति । ऋग्वेदे प्रथा पुत्राणां बान्धवानां स्नानं भवति[2]।

गृहप्रवेशविधिः

उदककर्म समाप्य गृहप्रवेशो भवति । अत्र इतिहास-पुराण-कथा-कोविदाः शोकार्तेभ्यः सान्त्वनां प्रयच्छन्ति[3] पूर्वाह्ने गृहं प्रविशन्ति[4] ।

---

१. पा०गृ०सू० ३. ७. १६-२३.
२. वर्षो न विद्युन्निवाहिता रुचि । ऋ० १.८५.७ ; गृ० उदकदानम्.
३. पा०गृ०सू० ३. ७. २२.
४. तत्रैव, ३. १६. ३५.

कतिपयोदाचार्याः वचनानुसारं दुर्भिक्षात् प्रासे गृहं न गच्छन्ति इति व्यवस्था प्रदत्ता[1] । पूर्वं पुत्रकाः प्रविशन्ति ततः पृष्ठ-भागे पुनः । पूर्वं अध्यात्म-प्रसाद् विपरीता । गति रति गृहे पारस्करः[2] भवति तत्र प्रथमान्निहोत्रान्न-पितृ-व्रत-कर्मादिनां स्वर्णं विधिः । मतान्तरेण पुत्रपुत्र्यै[3] भिन्न-पक्षयोः, यज्ञाग्निहोत्रादिनां स्वर्णं विधिः । ततः गृहे प्रविशेदिति ।

गृहवास्तुकायां गृहप्रवेशविधौ वर्ज्यानि कर्माण्यपि वर्णितानि । यथा -

प्रातर्भोज्यमिदं स्थापयेत् पात्रिका अपि ।
स्वर्णादाराधनान्नाद्युपभोगानि पायसम् ॥
वर्जितं स्नानमेषु वास्तुपूजनं विना ।
उपवासी गुरौ प्रेते पत्न्याः पुत्रस्य वा भवेत् ॥
नवगृहमतिसन्धाराराधनानि तु ।
द्वाधिकं दशरात्रं सुवर्णानामयर्पिताः ॥
प्रातरन्धकाराग्निमन्त्रा सुतो वधः ।
दशरात्रः सूतकान्तर्वासिनः ॥
पाकामाच्छृष्टा द्विजभोजिनः ।
भैक्षुकैर्नादाना: संभोगविवर्जिताः ॥

(गृह्य०पु० गृह०प्रवि० ८-१२)

नवान्नम्

रेणुकाग्निहोत्रि-मते नवान्नानि प्रेतस्यानुक्तानि वर्ज्यानि । मार्कण्डेय-मतानुसारं पञ्च दुर्गाये पंचकमाघादिषु च भवेदिति ।

---

१. पा०गृ०सू० ३. ७. ३६
२. बौ०ध०सू० १. १२. ६
३. पा०गृ०सू० ३. ७. ३४.

गृह्यकारिकायां वशिष्ठवचनं प्राप्यते तत्र तु -

तृतीयपंचमस्नाननिमित्तं प्रथमेऽपि ।
नवमे च भवेद्वस्तु तृतीये नवमे तथा ॥
पंचाब्दमासिकं तद्वदेकादशिकम् ।
स्नानानि त्रीणि कुर्यात्प्रेतत्वमुक्तये ॥
इति पूर्वभिक्षो वैदिकोद्दिष्टविधानतः । गृह्य०पु०कारिका० २-४

अत्र कोऽपि पितृनिर्वपणार्थं तर्पणं कर्तव्यम् । अस्मिन् जल-मधु-पंचगव्य-गन्धाक्षतादीनां प्रयोगो न भवति । स्नानार्थं सामन्त्रं पिण्डोदक-विधिपिंडं च कर्तव्यम् । अत्र प्रेतत्वमुक्तये नामगोत्रोच्चारणं रचितं भवति भाव-निरम् ।

दशपिण्डाः

प्रेतस्य शरीरनिर्माणार्थं प्रतिदिनं पिण्डः दातव्यः[1] । गृह्यकारिका-नुसारं पुत्रो, भ्राता, पिता, मातृगोत्रगुरुश्च पिण्डदाः भवन्ति । पिण्डदानं तु गृहे, तीरे, श्मशाने, तीर्थे देवालये वा कर्तव्यम् । दाहं सम्पाद्य पुत्रः यथा-न्यायं द्वौ पिण्डौ निर्वपेत्, पुनः शेषाः पिण्डाः देयाः । पिण्डदानेन प्रेतस्य शरीरनिर्माणं जायते यथा हि गृह्यकारिकायाम् -

शिरस्त्वाद्येन पिण्डेन प्रेतस्य क्रियते तु ॥
द्वितीयेन तु कर्णाक्षिनासिकां च समासतः ।
कण्ठं स्कन्धभुजांसि तृतीयेन यथाक्रमम् ॥
चतुर्थेन पिण्डेन नाभिलिङ्गगुदानि च ।
ऊरूजंघे तथा पादौ पंचमेन भवन्ति वै ॥

---

१. पा०गृ०सू० ३.१०.२८ ; आ०गृ०सू० ४.५

सर्वमर्माणि षष्ठेन सप्तमेनाथवा शिरा: ।

दन्तलोमान्यष्टमे तु वीर्यं तु नवमेन वै ।।

दशमेन तु पूर्णत्वं तृप्तता क्षुद्विपर्यय: ।

आशौचान्तेऽपि वर्णानां दद्यात् पिण्डमुत्सृजेत् ।।

(गृह्यका०पु० दशपिण्डा: २५-२८)

अंजलिदानम्(तिलांजलिदानम्)

दाहानन्तरं मृतकाय प्रथमदिवसाद् दशदिनं यावत् अंजलिदानं कर्तव्यम् । गृह्यकारिकायां दिवसक्रमेण जलांजलि: वर्धते । यथा प्रथमे दिने एका, द्वितीये द्वे, तृतीये त्रि: । एवं दशदिवसं यावत् । अत्र विकल्पकं भवति तत् विस्तारभयान्न लिखामि ।

अकृतचूडाविधि:

रेणुकारिकानुसारं मृता कुमाराणां अविवाहितकन्यकानां अकृतचूड- बालानां कृते मन्त्रविवर्जितं पिण्डं दद्यात् पिण्डं विना तेषां मोक्षो न भवति । तेषां सपिण्डीकरणमपि नास्ति तेषां सपिण्डीकरणे कृते सति सम्वत्सर- मध्ये प्रेतत्वनाशत: मुक्तिर्भवति ।

अस्थिसंचयनम्

दाहक्रियानन्तरं अस्थिसंचयनं भवति[1] । अतो दाहान्निर्वापणस्य प्राचीन प्रथाया: अधिकारी वर्तते । गृह्यसूत्रेषु अस्या: क्रियाया: विभिन्नं विवरणं मिलति । आश्वलायनमतानुसारं दाहदिवसात् त्रयोदशे पंचमे वा दिवसे

---

१. आ०गृ०सू० ४.५ ; बौ०पि०सू० १.१४.

कर्तव्यम्[1] । बौधायनस्तु दाहतः तृतीये दिवसे अस्थिसंचयनं कर्तव्यमिति प्रोक्तम्[2] । गृह्यकारिकानुसारं प्रथमे तृतीये सप्तमे नवमे वा कर्तव्यम्[3] । सर्वप्रथमे स्थाने दुग्धजलाभ्यां सेचनं कर्तव्यम्, ततः अस्थिसंचयनं कार्यम् । अस्थीनि एकत्रीकृत्य पात्रान्तरं स्थापितम् यदि तेषां तत्कालं कर्तव्यम् नास्ति । पक्षान्तरे अस्थि-संचयनानन्तरं तेषां प्रवाहः गङ्गायां कर्तव्यमिति क्रम एव प्रचलितः । प्रायशः अस्थिसंचयनं सम्प्रति दशाहानन्तरं एव कुर्वन्ति, ततः गङ्गादिपवित्रनद्यां तेषां प्रक्षेपः भवति इति ।

<u>शावसूतकम् (आशौचे करणीयानि कार्यसूत्रम्)</u>

जननाशौचं कर्मप्रतिरोधकारणमधिकारित्वापत्ति, मरणाशौचे तु अस्पृश्य-त्वकारणमप्यस्ति । तथा यदि विदेशाभिधाने जननाशौचं यत्र प्राप्नुयात्, तत्र प्रथमे तृतीयादि मरणाशौचमपि मातरि पितरि भ्रातरि सन्ततिषु च सपिण्डेषु यथायथं प्रयुज्यते । यथा मातरि जननाशौचे दशाहं मरणाशौचम्, दशाहे तु जनना-शौचे त्र्यहं मरणाशौचम् । त्र्यहे जननाशौचे एकाहं मरणाशौचम् । ततो न्यूने जननाशौचे स्नानमात्रम् मरणाशौचम् - इत्येवं तारतम्येन संयोज्यम् ।

अस्मिन् च दशाहपर्यन्तं यति सम्यक् अस्थिसंचयनकालो भवति । अत्र एव अस्थिसंचयनादिनि सर्वथा स्पृश्यता भवति । तत्र च पूर्णाशौचे अस्थिसंचयनकालो ब्राह्मणस्य चतुर्थाहः । क्षत्रियस्य पंचमाहः । वैश्यस्य षष्ठाहः । शूद्रस्य दशमाहः । अल्पाशौचे तु सर्वेषां द्वितीयाहः । अन्यत्रापीदं सम्प्रति विदेशाभिधाने जननाशौचविभागकाले स्पृश्यतादिनिर्णय इत्याह देवलः । गृह्य-कारिकायां वैचित्र्याणि पत-प्रत्यन्तराणि सन्ति । पूर्वं तु कथितमेव ।

---

१. आ०गृ०सू० ४.५

२. बौ०पि०सू० १.१७.१

३. कातीय गृ०का० पृ० अस्थि० १-३.

षोडशश्राद्धानि

केषुचिद् ग्रन्थेषु षोडश-श्राद्ध-वर्णनं मिलति। षोडशश्राद्धानि मृतस्य बान्धवार्थानि। षोडश-श्राद्धं विना जीवः प्रेतत्वबन्धान्मुच्यते। षोडशश्राद्धविषये मत-मतान्तराणि सन्ति। गोभिलस्मृतौ (३, ६७) षोडश-श्राद्धानां विवरणं प्राप्यते, तत्र तु द्वादशमासिकश्राद्धानि (यानि वार्षिके प्रतिमासं भवन्ति) प्रथमाब्दम् (एकादशदिवसश्राद्धम्) षाण्मासिके द्वे श्राद्धे तथा च सपिण्डीकरणम्। गरुडपुराणे (प्रेत० ५, ४९-७, ३५, ३३-३७) षोडशश्राद्धानां पर्याप्तं वर्तते। एकादशदिवसानन्तरम्, पक्षान्तं पक्षात्, षाण्मासानन्तरम्, प्रतिमासान्ते, वर्षान्ते च क्रियमाणानि भवन्ति। स्कन्दपुराणे (प्रेत० ५, ३७) तानि च षोडशश्राद्धानि यानि हि मरणात् चतुर्थे दिवसे, पक्षान्ते, षण्मासानन्तरम्, वर्षान्ते तथा च मृत्युतिथौ प्रतिमासं यानि भवन्ति। श्रीविष्ट-श्राद्ध-पद्धतिविवरणानुसारं षोडश-श्राद्धानन्तरं सपिण्डनं भवति। आपस्तम्बमतानुसारं अष्टाष्टौ षोडशश्राद्धं भवति।

सपिण्डीकरणम्

सपिण्डीकरणं मृतस्य दाहानन्तरं द्वादशे दिवसे पक्षान्ते वर्षान्ते वा भवति। प्रथमोद्दिष्टः सपिण्डानां कृते, द्वितीयः तृतीयश्च

---

१. यस्यैतानि न दीयन्ते प्रेतश्राद्धानि षोडश। पिशाचत्वं स्थिरं तस्य दत्तैः श्राद्धशतैरपि॥ (श्राद्धक्रिया कौमुदी, पृ० ३६२) गरुडपु०प्रेत० ५, ५०-५१, लिखितस्मृति: (१६) लघुशंख: १४ ; पद्मपु०सृ०ख० ७०, ३०२ ; मिता० १, २५४

ते ददाति त्वं प्रेतत्वं सुस्थिरं तस्य।
प्रेतलोके तु वसतिर्नृणां वर्षं प्रकीर्तिता।
क्षुत्तृष्णे प्रत्यहं तत्र भवेतां भृगुनन्दन॥ मिता० (याज्ञ० स्मृ० १, २५३)

अपेक्षां कुरुते । एवं लौकिकविश्वासः प्रचलति यत्सपिण्डीकरणं पश्चात् पापात्मा ततः एव पितृलोकं गच्छति । प्रेतत्वाय विहिताः पिण्डाः प्रदास्यन्ते सपिण्डीकरणेन च पितृलोकं याति । सपिण्डीकरणार्थं निश्चित-नियमः नास्ति । जातकर्मादीनि सम्पाद्य ततः सपिण्डीकरणं कर्तव्यम् । तत्र चत्वारि पात्राणि सम्बन्धः-प्रेतः पूर्णं, तेभ्यः पात्रत्रयं पितृभ्यः तथा च एकं तु प्रेताय । प्रेतस्य पात्रस्थं पितृपात्रेषु न्यसेत् । गृह्यसूत्रेषु सपिण्डीकरणस्य विस्तृतं विधानमुपलभ्यते[1] । गृह्यकारिकायां एतद्विषयकं विस्तृतं वर्णनं मिलति[2] ।

तदन्ते पिण्डदानम्

गृह्यकारिकानुसारं यदि भार्या स्वपत्या सह आत्मार्थं विदधाति, तदा पूर्वं पत्युः क्रिया, तदनन्तरं तासाम् । तदन्ते पत्निका मृतास्तदा ज्येष्ठताक्रमेण ताभ्यः पिण्डदानं कर्तव्यम् ।

---

१. शांखा०गृ०सू० ५.९ ; कौषी०गृ०सू० ४.२ ; बौ०पि०मे०सू० ३.१२.१३; का०श्रा०सू० ५; या०स्मृ० १.२५३-५४ ; वि०पु० ३.१३.२७ ; विष्णु ध० २१.१२-२३ ; भारद्वाज गृ० ३.१७ ; अपरार्क पृ० ५४०; म०पा०रि०पृ० ६३१, पद्म पु० सृष्टि० १०.२२-२३ ; मार्क०पु० २८.१२-१८ ; गरुड०पु० १.२२०; त्रि०स्थ० २.७७ ; निर्णयसिं० ३, पृ० ६१७ ; स्मृ०सा० पृ० ५७-५८; स्मृ० च०श्रा०पृ० ७५-८३.

२. गृह्यकारिका०पृ० सपिण्डी०प्रकरणम्.

भूमिका

आशौचकाल:

आशौचारम्भकालसम्बन्धेन मतत्रयं वर्तते । तथाहि - सूर्योदयात् प्राक्कालपर्यन्तं रात्रौ जन्मनि मरणे दाहे वा पूर्वदिनादारभ्य गणना कार्या, सूर्योदयोत्तरं परदिनादारभ्य इत्येकं मतम् ।

त्रिविभक्ताया रात्रिनिशीथकालपर्यन्तं रात्रौ जन्मनि मरणे दाहे वा पूर्वदिनादारभ्य गणना कार्या निशीथोत्तरं परदिनादारभ्य - इति द्वितीयं मतम् ।

त्रिविभक्ताया रात्रेः प्रथमभागद्वयपर्यन्तं रात्रौ जन्मनि मरणे दाहे वा पूर्वदिनादारभ्य गणना कार्या, तृतीयभागे परदिनादारभ्य - इति तृतीयं मतम् ।

आशौचविवेचना:

प्रधाननिमित्तानुरोधेनाशौचं द्वेधा - जन्माशौचं मरणाशौचं चेति । तयोः क्रमेण सूतकं शावमिति च संज्ञामाहुः । यत्तु मृताशौचेऽपि सूतकशब्दो दक्षादिभिः व्यवहृतो दृश्यते, तद्भ्रमप्रमाणस्थपर्यायप्रयोगेण निमित्तकाल-भेदाभावादौपचारिकं द्रष्टव्यम् । परे त्वाहुः जन्म-मृत्युक्रियादीक्षा आशौचनिमित्तानि, तेन निमित्तभेदादाशौचं चतुर्धा - जन्माशौचं, मरणाशौचम्, उदक-क्रियाशौचम्, दीक्षाशौचं चेति । जातकस्य जन्मनि मातापित्रादिसम्बन्धिनां कियत्कालं शुद्धिर्बाध्यते, तज्जन्माशौचम् । एवं मृतकस्य मरणे मातापित्रादि-सम्बन्धिनां स्वापत्यादिसम्बन्धिनां च कियत्कालमशुद्धिर्बाध्यते तन्मरणाशौचम् । तथा मृतकस्य मरणे ये केचिदौर्ध्वदेहिकं वाहदाहादिकमुदकक्रियादिकं कुर्वन्ति, तेषां तत्कारणनिमित्ता शुद्धिः कियत्कालं बाध्यते, तदुदकक्रियाशौचम् ।

तथा च कस्मिन् कस्मै दीक्षा भक्तिकारणात् तत्सम्बन्धाद् घाकुर्वीत, तद्दीक्षाशौचम् ।

एते च जन्म-मृत्युक्रियादीनाः स्वरूपान्तरे निमित्तानि भवन्ति, जायमाना अपि । तेषां शौचं द्वेधा – स्वरूपकाशौचम्, कालाशौचं चेति । अथाधिष्ठानभेदाच्छौचं त्रेधा – स्पर्शाशौचम्, कर्माशौचम्, भोगाशौचं चेति । यत्र शरीरस्पर्शो निषिध्यते, तत्स्पर्शाशौचम् । यत्र वैदिकानि कर्माणि निषिध्यन्ते, तत्कर्माशौचम् । यत्र तु विवाहोपनयनकन्यादानादीनि मंगल-कर्माणि यथाकृतपूर्तश्राद्धादीनि च निषिध्यन्ते, तद्भोगाशौचम् ।

तत्र संस्कारास्यकालं जायमानानि मृताद्याधिष्ठानानि: शरीरे समवतिष्ठन्त ततः शरीराशौचं भोगाशौचं च कुर्वते । शरीरस्पर्शे जाते यदं परशरीरे संक्रमते, तस्मात्स्पर्शसंक्रान्तिनिषेधकत्वात् स्पर्शाशौचं च कुर्वते ।

अथ द्वितीयं तत्पूर्वं जायमानानि दोषाद्याधिष्ठानानि: शरीरे समवतिष्ठते ततस्तस्माच्छौचं प्राणाशौचं च कुर्वते । तत्र सति स्वाध्यायो दानप्रतिग्रहौ देवकर्माणि प्रेतपिण्डक्रियावर्जं पितृकर्माणि च प्रतिषिध्यन्ते, अतः दोषसंक्रान्तिनिषेधकत्वात् कर्माशौचं च कुर्वते । तत्र सति परशरीरे स्पर्शपर्यायाभावात् । अथ तृतीयमा मृदपिकर्मसंक्रान्तिनिषेधकत्वात् स्वशौच-मन्त्रिमात्र सपिण्डमरणे पुत्रे तत्समानाधिष्ठानसंक्रमकं भवति ततस्तदनुरूपा-शौचं प्रेताशौचं च कुर्वते । सपिण्डीकरणानन्तरं प्रेतत्वं विमुच्यते ।

गर्भस्रावाशौचम्

प्रथमादिषु चतुर्षु मासेषु नष्टस्य गर्भस्य योनितो बहिर्भावो गर्भस्रावं इत्युच्यते । पंचमादिषु चतुर्षु मासेषु नष्टस्य गर्भस्य योनितो

## भूमिका

कठिनीभावो गर्भस्राव उच्यते । पञ्चमादिषु चतुर्षु मासेषु पुष्टस्य गर्भस्य योनितो कठिनीभावो गर्भपात उच्यते । तदित्थं पञ्चमाष्टमौ: मासावधिं भवति । षष्ठमासादूर्ध्वं गर्भस्राव संज्ञा गर्भच्युति संज्ञा च सप्तमासादूर्ध्वं तु प्रसव-इति विवेकः । आदित्य-पुराणवचनादिषु व्यपिसंक्रमणक्रमाद्योऽपि गर्भपातशब्दः प्रयुक्तो दृश्यते तत्तु स्पष्टमिदम् ।

तत्र ब्राह्मण्याः सूतिकायाः प्रथममासे गर्भपाते अहमात्रीयम् । द्वितीयमासे तृतीयमासे वा गर्भपाते त्र्यहम् । चतुर्थमासे चतुरहम् । पंचमासे गर्भपाते पंचाहम् । षष्ठमासे गर्भपाते षडहम् ।

क्षत्रियायाः सूतिकायाः प्रथममासे गर्भपाते त्र्यहम् । द्वितीये चतुरहम् । तृतीये पंचाहम् । चतुर्थे षडहम् । पंचमे तु गर्भपाते सप्ताहम् । षष्ठे मासे तु अष्टाहमात्रीयम् । वैश्यायास्तु प्रथमे मासि गर्भपाते चतुरहम् । द्वितीये पंचाहम् । तृतीये षडहम् । चतुर्थे सप्ताहम् । पंचमे तु गर्भपाते अष्टाहम् । षष्ठे मासि नवाहमात्रीयम् ।

शूद्रायास्तु प्रथममासि भवे सप्ताहम् । द्वितीये अष्टाहम् । तृतीये नवाहम् । चतुर्थे दशाहम् । पंचमे तु पाते एकादशाहम् । षष्ठे मासि द्वादशाह-मात्रीयम् ।

सप्तमे अष्टमे वा मासि दौर्बल्यवशादपक्वगर्भपातेऽपि मातुः सम्पूर्णा-शौचं भवति । सप्तमे अष्टमे नवमे दशमे वा मासि गर्भपाते तु ब्राह्मण्याः, क्षत्रियायाः वैश्यायाश्च सूतिकायाः दशरात्रं सम्पूर्णाशौचम् । कर्माशौचं तु पुत्रीजन्मनि मासम् । पुत्रजन्मनि विंशतिरात्रम्, कन्याजन्मनि मासमिति पैठीनसिवचनम् । अत्र तु देशाचारादपि व्यवस्था कार्या । सच्छूद्राया अप्येवम् । सच्छूद्रत्वं च शूद्र-शूद्रायां स्नानादि पवित्राचरणशीलत्वं विशिष्टगुणयोग्यताशालित्वञ्चेति ।

शिश्वाशौचम्

जन्मतः प्रागेव शिशुमरणे मृतजातस्य तस्य सम्बन्धिनामाशौचं द्वेधा सम्भाव्यते - मृताशौचं जाताशौचं च । तत्र मृताशौचं कथमपि नास्तीति निश्चीयते । जाताशौचं तु मातुर्दशाहं भवत्येव । अन्येषां तु जननाशौचमपि नास्ति ।

नालच्छेदात्प्रागेव शिशुमरणे जातमृतस्य तस्य सम्बन्धिनामाशौचं द्वेधा सम्भाव्यते - जाताशौचं मृताशौचं च । तत्र तावन्मृताशौचं नास्ति । जननाशौचं तु मातुर्दशाहम् । सापत्न्यमातुः पित्रादिसपिण्डानाञ्च त्रिरात्रं भवत्येव । अथवा पितुरेव त्रिरात्रम् । सोदरस्यैकरात्रम् । अन्येषां तु सपिण्डानां जननाशौचमपि नास्तीति ।

नालच्छेदानन्तरं दशाहात्प्राक् शिशुमरणेऽपि मातुः पितुः सपिण्डानाञ्च मृताशौचं नास्ति । जननाशौचं तु अस्पृश्यत्वलक्षणं कर्म-प्रतिषेधलक्षणं च भवत्येव । मातापित्रोर्दशाहं सोदरस्य त्रिरात्रम्, अन्येषां तु सपिण्डानां जननाशौचमपि नास्ति ।

दशाहादूर्ध्वं नामकरणात् प्राक् पुत्रमरणे मातापित्रोस्त्रिरात्रं मृताशौचम् । त्रिरात्रमिति केचित् । सपिण्डानां तु सद्यः शौचम् । सद्यःशौचे सर्वत्र स्नानमात्रेण शुचिः । नामकरणं तु दशम्युदकादेकादशाहे द्वादशाहे वा विहितमतो नामकरणपदं द्वादशाहोपलक्षणम् । तेन यद्यपि मासोत्तरं नाम कुर्यात्, तथापि द्वादशाहादेव प्रागिदमाशौचं बोध्यम् । अथवा - नामकरणं न कालोपलक्षणम् । तेन द्वादशरात्रे वा मासोत्तरं वा यदैव नाम कुर्यात्, तदैव तस्मान्नामकरणात्प्रागिदमाशौचमतो ध्येयमिति ।

नामकरणादूर्ध्वं जन्मनाशात् प्राग्बालकमरणे मातापित्रोरेक-रात्रम्। बान्धवानां तु त्रिरात्रम्। सपिण्डानां तु सद्यः शौचम्।

जन्मनादूर्ध्वं दन्तोत्पत्तेः प्राक् पुत्रमरणे दाहे कृते वा माता-पित्रोस्त्रिरात्रम्। असपिण्डानां तु दाहे एकाहः। कृते तु सद्यः शौचम्। सप्तमे मासि मनुष्याणां दन्तजननं प्रकृत्या सिद्धम्। किन्तु क्वचित् प्रागपि दन्ता जायन्ते पश्चाद्वा। तस्मिन्नु वैकल्पिकेऽपि दन्तजननेऽनुरोधेन प्राग्वन्नियमा भवन्तीति।

दन्तजननादूर्ध्वं चतुर्थे वर्षात्पूर्वं प्राक् चौलकर्मणो त्र्यहमिच्छन्ति। गौतमः। काश्यपस्त्वेकाहमिच्छन्ति दाक्षिणात्याः। तत्र पुनः एक-रात्रं ब्राह्मणकुले, द्विरात्रं क्षत्रियकुले, त्रिरात्रं वैश्यकुले, पंचरात्रं शूद्रकुले शौच-मित्याचार्यो व्याख्याति। वेदाग्निपक्षे तु सर्वेषां ब्राह्मणवदेकरात्रम्। अग्नि-मतामनग्निमतां च सर्वेषां ब्राह्मणवदाशौचमनुमतमित्यपि सर्वं ब्राह्म-णवदिति परे।

चूडाकरणादूर्ध्वं चतुर्थे वर्षात्पूर्वं प्राक् मृतस्य दाहे कृते त्र्यहं ब्राह्मणकुले षडहं क्षत्रियकुले, नवाहं वैश्यकुले, द्वादशाहं शूद्रकुले शौचं भवति। तदसपिण्डादि पित्रोश्च त्रिरात्रम्। असपिण्डानां तु एकाहमिति केचित्। वेदाग्निमतां तु सर्वेषां ब्राह्मणवत् त्रिरात्रम्। दशाहाशौचं व्यवहर्तां तु सर्वेषा-मित्यपि सर्वं ब्राह्मणवत्।

यत्तु केचिदत्र दाहके ब्राह्मणानां त्रिरात्रम्, क्षत्रियाणामेकादश-रात्रम्, वैश्यानां द्वादशरात्रम्, शूद्राणां विंशतिरात्रमाशौचमाहुस्तन्नादेयम्[१]। चूडाकरणं चूडाकारः। किन्तु कुलाचारव्यवस्थया वा तृतीयवर्षमारभ्य

---

१. दृष्टव्यम्, गृ०ना०पु० त्रिवर्णाशौचम्।

व्रतबन्धात्प्राक् कालविकल्पेन येषां चौलकर्माचरन्ति । तेषामाचौल-विधानादशौचे भिन्नापि विकल्पा । तथापि तृतीये वर्षे तावदनाचौलात् प्राक्मरणे मातापित्रोस्त्रिरात्रं षड्रात्रं नवरात्रं द्वादशरात्रं वा वर्णभेदेनाशौच-मादिशेत् । इतरेषां तु सपिण्डानामेकरात्रं, द्विरात्रं त्रिरात्रं पंचरात्रं वा वर्ण-भेदेन स्यात् ।

तृतीयवर्षे चूडकरणस्य मरणे तु त्र्यहं षडहं, नवाहं द्वादशाहं वा वर्णभेदेन सर्वेषां पित्रादिसपिण्डानामाशौचमुक्तम् । दशाहिकं तु सर्वेषां ब्राह्मणवत् ।

अथ तृतीयवर्षादूर्ध्वं व्रतबन्धात् प्राक् कृतचूडस्याकृतचूडस्य वा मरणे तु पित्रादि सपिण्डानां सर्वेषां त्र्यहाशौचं ब्राह्मणकुले, षडहाशौचं क्षत्रियकुले, नवाहाशौचं वैश्यकुले, द्वादशाहाशौचं शूद्रकुले ज्ञेयम्[1] । दशाहिकं तु सर्वेषां ब्राह्मणवत् ।

कन्यादीनामाशौचम्

अथ मातृकाधिकारप्रकरणात् स्वतन्त्रव्रतबन्धकालादूर्ध्वमनुपनीतस्य मरणे उभयं भवति । ये तावत् कर्मप्राधान्यमिच्छन्ति, तेषां त्र्यहं, षडहं, नवाहं, द्वादशाहं वा वर्णभेदेन प्राक्तनाशौचं विधीयते । ये पुनः कालप्राधान्यमिच्छन्ति तेषां तु सम्पूर्णमाशौचं प्रवर्तते[2] ।

दशाहं ब्राह्मणकुले, द्वादशाहं क्षत्रियकुले, पंचदशाहं वैश्यकुले, मासं शूद्रकुले चेति । तथैव कर्मणि कुलाचारात् पारम्पर्याचारतः शिष्टदेशाच्च व्यवस्था प्रवर्तते । दशाहिकं तु सर्वेषामिहापि ब्राह्मणवत् ।

---

१. शुद्धिकारिका कु० निर्णयशौचम् २९-२३.
२. तत्रैव, कन्यादीनां आ० १-५.

## भूमिका

कन्यायास्तु जन्मावधि दन्तोत्पत्त्यन्तं मरणे दाहे कृते वा माता-पित्रोरित्याहुः । त्रिपुरुषसपिण्डानां सोदर-भ्रातुश्च सद्यःशौचम् । अन्येषां स्वाशौचं नास्ति । दन्तोत्पत्त्यूर्ध्वं वर्षत्रयपर्यन्तं कन्यामरणे मातापित्रोरेक-दिनम् । त्रिपुरुषसपिण्डानां तु सद्यः शौचम् । अन्येषां स्वाशौचं नास्ति ।

वर्षत्रयादूर्ध्वं वाग्दानात् प्राक् कन्याया मरणे मातापित्रोस्त्र्यहा-शौचम् । त्रिपुरुषसपिण्डानामेकाहः । अन्येषां स्वाशौचं नास्ति । वाग्दा-नोत्तरं विवाहात् प्राक् कन्यायाः मरणे पितृकुले भर्तृकुले च पित्रादीनां त्र्यहा-मात्रमिति केचित् ।

गौडास्त्वाहुः कन्याया जन्मावधिः त्रिवर्षाभ्यन्तरे मरणे सर्वे-षाणां पित्रादिसपिण्डानां सद्यः शौचम् । त्रिवर्षोपरि वाग्दानात् प्राग् एकाहः । वाग्दानोत्तरं विवाहात् प्राक् कन्यामरणे भर्तृकुले पितृकुले च त्रिरात्रम् । यत्र तु वाग्दानं न जातं तत्र त्रिवर्षानन्तरं विवाहपर्यन्तमेकाहोरात्रम् । दाक्षि-णात्यास्त्वत्रापि त्र्यहाशौचमित्याहुः ।

विवाहोत्तरं तु पतिकुले पितृकुले वा मरणे मातापित्रोः सापत्नमातुः सोदरभ्रातुश्च त्रिरात्रम् । भ्रातुः पक्षिणीति केचित् । एकमातृणां वैमात्र-भ्रातृपितृव्यतत्पुत्रादीनां भ्रात्रादीनामाशौचं नास्ति । पित्रादीनामप्याशौचं नास्तीति केचित् । भर्तृकुले तु स्ववर्णोचितं सम्पूर्णाशौचम् ।

दत्तकन्यायाः पितृगृहे मरणे प्रसवे च पित्रोः संसर्गिणोस्त्रिरात्रम् । सापत्नमातुः सापत्नभ्रातुः सोदरभ्रातुश्च त्रिरात्रम् । इतरेषां तु संसर्गिणां बन्धूनामेकरात्रम् । असंसर्गिणां तु तेषां पूर्णाशौचम् । एतच्च सर्व-वर्णसाधारणम् । बन्धूनां तु एकत्रापन्ना एकाहमथवा भ्रातृमात्रे च पितृव्य-तत्पुत्रादयो भवन्ति[1] ।

---

१. मु०का०पु० कन्यादानामाशौचम् ।

आशौचनियमाः

गृह्यकारिकायां आशौचनियमाः एवमुक्ता वर्णिताः, तदनुसारं विप्रदशाहेन, क्षत्रियस्य द्वादशाहेन, पंचदशाहेन वैश्यस्य, मासेन च शूद्रस्य च शुद्धिर्भवति । यथाहि -

दशाहाच्छुध्यति विप्रो द्वादशाहेन क्षत्रियः ।
वैश्यः पंचदशाहेन शूद्रो मासेन शुध्यति ॥
व्रतस्थानां च शूद्राणां महायज्ञवतामपि ।
क्षत्रि-शुद्धतां तेषां शुद्धिः पंचाहतः ॥
चतुर्थे दशरात्रं स्यादिति पक्षाश्च दूषिताः ।
एकाहाच्छुध्यति विप्र इत्यादि अपवादतः ॥
सर्वं यद्गुणितं चैतान् शूद्रान् कृत्वा दशेत्तुतः ।
आहिताग्नेर्दाहदिनादारभ्याशौचमिष्यते ॥
(गृह्यका०पु० आशौचनियमाः १-४)

देशान्तरमृतानामाशौचम्

देशान्तरस्थे मृते दशरात्रोत्तरं वर्षाभ्यन्तरं श्रवणे त्र्येकरात्रम् । वर्षादूर्ध्वं स्नानमात्रमिति वसिष्ठविष्णू प्राहतुः । देशान्तरस्थे सति-मृते दशाहोत्तरं वर्षाभ्यन्तरं श्रवणे वर्षादूर्ध्वं वा श्रवणे सद्यः शौचमिति मनुयाज्ञवल्क्यगौतमदेवलमरीचिपराशरबृहस्पत्यादयश्च प्राहुः । सपिण्डाः सोदकाः सगोत्राश्च ज्ञातय उच्यन्ते ।

औरसास्तु देशान्तरे मातापित्रोः पतिपत्न्योर्ज्ञातीनां च मरणे वर्षादूर्ध्वं वा वर्षाभ्यन्तरं दशाहाभ्यन्तरमपि वा श्रवणे सर्वत्र

निर्विशेषं यत: शौचमाचितं पैठीनसिगौतमपराशरैस्तु: । पक्षान्तु - अन्तर्दशाहे मरणश्रवणे यावत् शेषाहमाशौचमिति सिद्धान्तः । मनु-याज्ञवल्क्याभ्यां निर्दिष्टे जाति-मरणे यत: शौचविधाना उक्तावसरात् पैठीनसि-गौतम-पराशर-वचनानामपि निर्विशेषामरणविषयकाशौचविधायकत्वात् । अन्यैरिति दशाहे स्वाशौच-श्रवणे तु: स्पष्टं विष्णुबृहस्पतिव्याघ्रपादवचनात् । निर्दिष्टं यत: शौचविधान-मपि मातापितृभिन्नविषयमेव ज्ञेयम् ।

दक्षिणभारतापेक्षया विशेषः । माता-पित्रोः पतिपत्न्योः सपत्न्या अपि समानदेशे देशान्तरे वा मरणे निर्विशेषं दशाहोत्तरं वा श्रवणे पुत्रस्य पत्न्याः पत्युः सपत्न्या वा यथायथं दशाहादिपूर्णाशौचमनुवर्तत न तु तत्र त्र्यहाशौच: । सापत्न्यमातुरोऽप्यपुत्रस्य च समानदेशे देशान्तरे वा मरणे दशाहोत्तरं वर्षोत्तरं वा श्रवणे निर्विशेषं पुत्रस्य मातापित्रोरिव त्रिरात्रम् । न तु स्नानम् । तत्र देशाचारात् व्यवस्था कर्तव्या ।

देशान्तरनिर्णयः (देशान्तरपरिभाषा)

गृह्यकारिकानुसारं देशान्तरत्वं चतुर्विधम् - योजनत:, नद्यन्तर-कालत:, व्यवधानत:, भाषाभिन्नत्वेनेति । विप्रस्य विंशति योजनान्तरं, क्षत्रियस्य चतुर्विंशति योजनान्तरं, वैश्यशूद्रयोः त्रिंशद्योजनान्तरं, निकृष्ट-शूद्रस्य तु षष्टियोजनान्तरमित्येवं योजनान्तरितो देशो देशान्तरं भवति ।

विप्रस्य चतुर्विंशतियोजनान्तरं, क्षत्रियस्य त्रिंशत्, वैश्यशूद्रयोः च-त्वारिंशत्, निकृष्टशूद्रस्य तु षष्टिरिति परे केचित् । षष्टियोजनान्तरित-मेवेत्यन्ये सर्वेषां देशान्तरम् । गिरिनद्यादिव्यवहितो भिन्नभाषो वा प्रदेशे तु योजनान्यवधानत्वात् त्रिंशत् चतुर्विंशतिरिति योजनसंख्याविवेचना-नादरे तत्त्वानां तात्पर्यं ज्ञेयमिति ।

केचिदित्थमाहुः । न भाषाभेदमात्रेण न वा गिरिव्यवधानमात्रेण नापि वा नदीव्यवधानमात्रेण वा देशान्तरत्वं कल्प्यते । किन्तु यत्रैतत् समुच्चितं भवति तत्र षष्टियोजनाभ्यन्तरेऽपि देशान्तरत्वव्यवहारः कार्यः । भाषाभेद-नदी-गिरि-व्यवधानाभावे तु षष्टियोजनात्परेऽपि देशान्तरत्व-व्यवहारः कार्यः । इति । अत एव काश्यां मृतस्य तीरभुक्ति-देशस्थितं प्रति देशान्तरत्वव्यवहारो नास्ति । देशयोः तयोः पंचाशद्योजनमात्रान्तरित-त्वात् । भाषाभेदसत्त्वेऽपि महानदीगिरिव्यवधानाभावाच्च । विविध-नदी-नदानामन्तरालस्थत्वेऽपि तासां महानदीत्वाभावात् । गंगा-यमुनादि-विधानामेव महानदीत्वेन व्यवहारात् ।

अत्र प्रयागमरणे तु तीरभुक्तौ भवत्येव देशान्तरमृतत्वव्यवहारः । देशान्तरमृते श्रवणे वा सद्यः शौचं कर्तव्यमिति व्यवहारः ।

कन्यादीनामाशौचम्

(क) कन्यामरणे

कन्यायास्तु जन्मावधिदन्तोत्पत्त्यन्तं मरणे दाहे कृते वा मातापित्रोरेकाहः । त्रिपुरुषसपिण्डानां सोदरभ्रातृणां च सद्यः शौचम् । अन्येषां आशौचं नास्ति । दन्तोत्पत्त्यूर्ध्वं वर्षत्रयपर्यन्तं कन्यामरणे मातापित्रोस्त्रिदिनम् । त्रिपुरुषसपिण्डानां तु सद्यः शौचम् । अन्येषां आशौचं नास्ति । वर्षत्रयादूर्ध्वं वाग्दानात् प्राक् कन्याया मरणे मातापित्रोस्त्र्यहाशौचम् । त्रिपुरुषसपिण्डानामेकाहः । अन्येषां आशौचं नास्ति ।

वाग्दानोत्तरं विवाहात् प्राक् कन्यायाः मरणे पितृकुले भर्तृकुले च पित्रादीनां वोढ्रादीनां त्रिपुरुषं सपिण्डानामेकाहः इति दाक्षिणात्याः । त्रिरात्रमिति केचित् ।

कन्याया जन्मावधि त्रिवर्षाभ्यन्तरेण मरणे सवर्णानां पित्रादि सपिण्डानां सद्यः शौचम् । त्रिवर्षोपरि वाग्दानात् प्राग् एकाहः । वाग्दानोत्तरं विवाहात् प्राक् कन्यामरणे भर्तृकुले पितृकुले च त्रिरात्रम् । यत्र तु वाग्दानं न जातं तत्र त्रिवर्षानन्तरं विवाहपर्यन्तमेकरात्रम् । दाक्षकृत्यत्रापि शुद्धाशौचमित्याहुः इति गौडाः । अन्यत्र तु देशाचाराद् व्यवस्था ।

विवाहोत्तरं तु पतिकुले स्वजातिकुले वा मरणे मातापित्रोः सापत्नमातुः सोदरभ्रातुश्च त्रिरात्रम् । भ्रातुः पक्षिणीति केचित् । एकग्रामवासिनां वै मातुलभ्रातृपितृव्यतत्पुत्रादीनां एकाहः । पितृभिन्नग्रामवासिनां तु भ्रात्रादीनामाशौचं नास्ति । पित्रादीनामप्याशौचं नास्तीति केचित् । भर्तृकुले तु सवर्णानां सम्पूर्णाशौचम् ।

दत्तकन्यायाः पितृकुले मरणे प्रसवे च पित्रोः संसर्गिण्यपि त्रिरात्रम् । सापत्नमातुः सापत्नभ्रातुः, सोदरभ्रातुश्च त्रिरात्रम् । इतरेषां तु संसर्गिणां बन्धूनामेकरात्रम् । असंसर्गिणां तु सर्वेषां पूर्णाशौचम् । एतत् सर्वं सर्ववर्णसाधारणम् । बन्धवस्तु एकग्रामस्था एकाभ्यस्था भ्रातृमातुलपितृव्यतत्पुत्रादयो भवन्ति ।

(ख) भार्यामरणे

भार्यामरणे पत्युर्दशाहः । परपूर्वायास्तु भार्याया मरणे सर्वेषां वर्णानां त्रिरात्रम् । समानजातीयोत्कृष्टजातीयपुरुषान्तरसंसृष्टभार्यामरणे सर्वेषां त्रिरात्रम् । हीनवर्णसंसृष्टायास्तु मरणे नाशौचम् ।

(ग) परपूर्वाया भार्याया मरणे

विवाहिता स्त्री स्वतन्त्रा भूत्वा यदि पाणिग्राहकादन्यं पुरुषान्तरमाश्रयति तदा यं यमाश्रयति तस्य तस्य पुरुषस्य तस्यां त्रिरात्रमाशौचं भवति ।

किन्तस्य स्वयं ग्राहकपुरुषस्य ये कुल्याः सपिण्डादयस्तेषामाशौचं तत्र च नास्ति । यदि च पाणिग्राहकेण तस्याः संस्कारः कृतस्तदा तस्याः पत्युरन्याश्रयणे ऽपि पाणिग्राहकगोत्रमेव तिष्ठति न स्वयं ग्राहकगोत्रमनुसरति । किन्तु यदि तस्यास्तेन संस्कारो न कृतस्तदा येनान्येन प्रथमं संगता स्यात् तद्गोत्रा सा संपद्यते । एवमपि तस्य स्वयं ग्राहकस्य शुद्धकेन त्र्यहाशौचं न तु सपिण्डवदशौचवृत्तिः ।

अथ पाणिग्रहणे वृत्ते सप्तपदागमनात्पूर्वं स्वभावे यदि कन्यापहृता स्यात् तदा यावद्विवाहो न वृत्तः तावत् पितृगोत्रावतिष्ठते । प्रदानान्तरम् वा पौर्विकयाग्निस्थाने पाणिग्राहकस्य स्वामित्वं गोत्रं भवति न तु वाग्दाने ऽपि चतुर्थीं वा गृह्णाति । तेन तस्या मरणे पत्युः संस्काराशौचं स्यात् ।

शौचाशौचम्(विविधाशौचनिर्णयः)

(क) गुरुशिष्यादीनां परस्पराशौचम्

आचार्य-मरणे तत्संस्कर्तुः शिष्यस्य दशाहम् । यदि संस्कारं न करोति तदा विधस्य शिष्यस्य त्रिरात्रम् । आचार्यपत्नीमरणे आचार्यपुत्रमरणे च गुरुकुलस्थितस्य शिष्यस्य त्रिरात्रम् । समावर्तनोत्तरं स्वगृहस्थस्य शिष्यस्य तयोराचार्यपुत्रपत्न्योर्मरणे एकाहः । गुर्वङ्गनामरणे पक्षिणी अपि मतम् । उपनाय किंचिद्वेदाध्यापके, अनुपनीय सम्पूर्णवेदाध्यापके च गुरौ मृते पक्षिणी । तथाविधगुरुपत्न्यामपि मृतायां पक्षिणी ।

यत्किंचिदध्यापकोपाध्याय मरणे शिष्यस्यैकाहम् । तादृशोपाध्यायपत्न्याश्च मृतायामेकाहम् । तदुपाध्यायपुत्रे च मृते एकं दिनमात्रं रात्रिमात्रं वा । उपनीयाध्यापक आचार्यः, वेदैकदेशाध्यापक उपाध्यायः ।

आचार्यगृहस्थितशिष्यमरणे आचार्यस्य त्रिरात्रम् । उपनाय वेदैक-देशमध्यापितस्य, कृत्स्नांस सम्पूर्णं वेदमध्यापितस्य शिष्यस्य मरणे उपाध्याय-स्यैकरात्रम् ।

वेदे सहाध्यायिनोमरणे पक्षिणी । पञ्चदिनपाठि सहाध्यायि-मरणे स्नानः । समानप्रवरौ एकस्माद् गुरोरध्ययने कृते सहाध्यायैकरात्रम् । समानप्रवरौ भिन्नाद् गुरोरध्ययने सहाध्यायिदिनमात्रं रात्रिमात्रं वा ।

(च) मित्रादि-मरणे

सन्निधिमात्रे मित्रं यद्गृहे म्रियते तद्गृहस्य त्रिरात्रम् । अन्यादृशं मित्रं यद्गृहे म्रियते तस्य पक्षिणी । सपिण्डस्य स्वगृहादन्यत्र मरणे एकरात्रम् । श्रोत्रियो यद्गृहे म्रियते तस्य गृहस्थस्य त्रिरात्रम् । यद्गृहे अविद्वान् म्रियते तस्य गृहस्थस्य त्रिरात्रम् । अन्यत्र मृते एकरात्रम् । महाराजस्य मरणे प्रजानामहो-रात्रम् । अथवा दिनमात्रं रात्रिमात्रं वा ।

प्रासङ्गिकाशौचम्

स्वदेशे राजमरणे दिनान्ताशौचम् । ग्राममध्ये यावत्कालं शव-स्तिष्ठति, तावत्कालपर्यन्तं ग्रामस्याशौचम् । एकग्रामे स्थितानां असपिण्डानामेक-दिनम् । संस्कृतायां भगिन्यां, मित्रे भ्रातरि, दौहित्रे, भागिनेये जामातरि, श्वशुरे, श्यालके च मृते स्नानमात्रेण शुद्धिः । सपिण्डामरणे त्रिरात्रा-शौचम् ।

आशौचापवाद:

जाताशौचस्य मध्ये यदि मृताशौचमापतति पूर्वशेषेण शुद्धिः भवतीति मुनिभिः स्फुटमुक्तम् । किन्तु यदि मात्राशौचस्य मध्ये पित्राशौचं पतितं तदा पित्राशौचेन शुद्धिः भवति । पित्राशौचस्य मध्ये मात्राशौचमापतति पित्राशौचेन शुद्धिः । परन्तु क्वचित् –

पित्राशौचे समाप्येव मात्राशौचे तु पक्षिणी ।
पूर्वशेषेण शुद्धिः स्यात् सपिण्डानामिति स्थितिः ॥

(गृह्यकारिकायां पृ० आशौचापवाद:-७)

जातमृतकापरोर्नियमाशौचम्

पूर्वाशौचं समाप्य रात्रिमध्ये शुद्धिर्भवति, यदि तस्याः रात्रेः चतुर्थ यामे प्रभृति मरणान्तरं न स्यात् । यदि जाताशौचं मृताशौचं वा आपतेत् तदा पूर्वाशौचं व्यतीत्य त्रिरात्राच्छुद्धिः भवति । मृताशौचस्य मध्ये चेज्जाता-शौचमापतेत्तदा मृतस्य प्रथमं दशाहादिकं पिण्डदानादिकं च कार्यम् । तथा च जातकस्य जातकर्मादिकं मृतस्य कर्मानन्तरं सम्पादनीयम् । शौनकस्तु तत्र जात-कर्माणि शान्तिमिच्छति ।

मृते श्रौतस्मार्तकर्मानुष्ठानम्

गृह्यकारिकानुसारं यागमध्ये वा यज्ञादिनियमे तु प्रारब्धे यदा-शौचं स्यात् तदा यागस्य प्रक्रिया अन्ययोगात् ब्राह्मणपूर्वकं सर्वमावृत्य सम्पादयेत् न मन्त्रमुच्चारयेत् । निष्काम-पूजादि नियमे तु प्रारब्धे नाशौचा-नुरोधं कुर्यात् । स्मार्तं कर्म द्विविधम्, साज्यमसाज्यं च । तत्र यत् साज्यं

सदाशौचे प्राप्ते सन्ध्येत् । आशौच निवृत्ते पुनः कुर्यात् । अथ यदन्याज्यं तदा शौचे प्राप्ते तत्सन्निधौ न कारयेत् । पाकदाशौचे स्वयं न कुर्यात् । क्वचित् वा होमादौ कर्मविशेषे कर्मव्यवस्था भिन्ते तत्स्वकृतान्नेन ब्राह्मणादिना, कृताकृतान्नेन तण्डुलादिना वा फलेन वा तत्कर्म कुर्यात् कारयेद्वा अन्यतो तु न कुर्यात् ।

श्रौत स्मार्त नित्यानित्यकर्मणी व्यवस्था । तेन येषां वस्तुचरणानां दशरात्रमशौचे पि नास्ति विच्छेदः कलौ युगारम्भे, तदशौचे प्राप्ते नित्यानि-होमो न कार्यः । आशौचोत्तरं पुनःसंस्कारो होमविधिस्तु पुनराधानापा-र्थत्वात् । अथ त्रिरात्रादानां येषां चतुरात्रमशौचे नित्यौपासनम् सम्पति तेषां होमनित्यानां कृतान्नेन फलादिना वा तत् कर्म कुर्यादिति सिद्धान्तः । समारोपितानी तेऽपि होमो न कार्यः । किन्तु पुनराधानमिष्टं कृत्वा होमादि कुर्यात् ।

पाषण्डादीनामाशौचाभावः

षेणुकादिभिः पाषण्डादीनामाशौचाभावोऽपि पाषण्डादीनां नामानि गणितानि । तेषां विचारतः पाषण्डिनां पतितानां महापातकिनां, आत्मघातिनां, कुष्ठिनां गर्भिणीनां परित्यक्तानां सन्न्यासी नास्तिकानां च, दहनं न कार्यम् । चण्डाल-दहनमपि निषिद्धम् । गृहस्थादिकानुसारं मृतानां दहनादिक्रियाः न भवन्ति । तेषां शवानां काष्ठानि गंगायामन्यस्यां वा नद्यां प्रवाहितव्यानि । तेषां स्थाने स्थले तानि पञ्चगव्यानि शोधिता-न्यानि दद्यात् । एतेषां सर्वेषां श्राद्धादीनि कर्माणि न भवन्ति वत्सरान्ते तेषां ऊर्ध्वं नारायणबलिं समाचरेत् ।

नारायणबलिः

आत्मघातक-शुद्ध्यर्थं नारायणबलिं समाचरेत् । भाद्रमासस्य शुक्लैकादश्यां विष्णुं वैवस्वतं यमं च गन्ध-पुष्पादिः मध्याह्ने नदीतटे सम्पूज्य ततः पूजनं विष्णुरूपे आत्मा तन्नामगोत्रोच्चारणं च कर्तव्यम् । ततः पिण्डोपरि चन्दनादि समर्प्य तिलपूर्वकं पिण्डानां जले प्रक्षेपः कार्यः । तस्मिन्नरात्रौ विषमसंख्यकान् ब्राह्मणान् भोजनार्थं चामन्त्रयेत् । तस्मिन् दिवसे चोपवासं समाचरेत्, द्वितीये दिवसे मध्याह्ने विष्णुं पूजयेत् । मध्याह्ने विप्राणां पाद-प्रक्षालनं विधेयम् । ततः एकोद्दिष्ट विधिना सर्वाणि कर्माणि सम्पादनीयानि । ततः उल्लेखनात् अवनेजनं यावत् कृत्यं कर्तव्यम् । अनन्तरं विष्णु-ब्रह्म-शिव-यमादि-भ्यश्च पिण्डचतुष्टयं प्रदातव्यम् । ततः प्रेतस्य स्मरणं नामगोत्रोच्चारणपूर्वकं कर्तव्यम् । ततः विष्णोर्नाम गृहीत्वा पंचमं पिण्डमुत्सृजेत् । ततः श्रेष्ठ ब्राह्मणे-भ्यो दक्षिणादानम् । अन्ते ब्राह्मण-भोजनं ज्ञाति-भोजनं च विधेयम् ।

नागबलिः

सर्प-दंशेन मृते नागव्रतं (बलिः) कर्तव्यम् । इदं श्रावणमासस्य भाद्रस्य वा शुक्लायां पंचम्यां विधेयम् । तत्र तु चतुष्पमिश्रितं भोजनं कार्यम् । पंचम्यां दारुमयं मृन्मयं वा पंचफणान्वितं नागं विरच्य सितगन्धैः शतपत्रैः करवीरैः तिलैः जातिपुष्पैश्च पूजयेत् । अत्र तावद् विशेषो यथा -

अनन्तं वासुकिं शेषं पद्मकं कम्बलादरात् ।
कर्कोटकं चाश्वतरं धृतराष्ट्रं क्रमेण तु ।।
शंखपालं कालियं च तक्षकं कपिलं तथा ।
प्रतिमासं द्वादशभिः पूजयेत् प्रतिमाभिः ।।

(गृह्यकारिका०पृ० नागबलिः ४-५)

एवं पंचम्यां नान्दीं पूजयित्वा रात्रौ बटु-तर्पणात्मकं मोदके-घृतपायसैः ब्राह्मणान् भोजयति । यज्ञान्ते महाब्राह्मण-भोजनं विधेयम् । तथा च ब्राह्मणाय हेम भाजनं धान्यं धनं गां च प्रयच्छेत् ।

आशौचप्रकरणम्

गुरुव्याधि-पीडितो वृद्धः यदि यागकाले समाप्नुयात् तदा तस्य विधिपूर्वं दहनं कृत्वा दिनत्रयमाशौचं भवति । एतादृशस्य कालस्य विधि-विधानपूर्वं औध्वदैहिकं कर्म कर्तव्यम् ।

अवकीर्णिप्रायश्चित्तम्

यदि ब्रह्मचारी योषितं गतो भवेत् तदा अवकीर्णी सोऽत्र भवति । तस्य प्रायश्चित्तेन शुद्धि भवति[१] । तैत्तिरीयारण्यके (२, १८) अवकीर्णि-प्रायश्चित्तं प्रतिपादितमस्ति । आपस्तम्बधर्मसूत्रानुसारं (१, ९, २६, ८-९) अवकीर्णी गर्दभे-ज्यया शुद्धो भवति । अवकीर्णिना चतुष्पथे निर्ऋतिदेव्यै गर्दभपशुः दातव्यः । जैमिनिना (६, ८, २२) अवकीर्णि-प्रायश्चित्त-होमकर्म लौकिकाग्नौ कर्तव्यमिति प्रतिपादितम् । अवकीर्णी प्रथमं गर्दभपशुं सम्पादयति, तथा च निर्ऋति देवताय मांसाहुतिं प्रयच्छति । गौतमेन लिखितम् - यत् अवकीर्णी: वर्षपर्यन्तं [illegible] पात्रेषु स्वदुष्कृत्यमुच्चरन् भिक्षाटनं कुर्यात् ।

---

१. गौतमः २३, १७-१९ ;
मनुः ११, ११८-२३ ;
बौ०ध०सू० २, १, ३४-३५;
याज्ञ० ३, २८० ;
वसि०ध०सू० २३, १४-१८ ;
पा०गृ०सू० ३, १२, १-१२.

सभाप्रवेशनम्

नृपस्य कार्य-दर्शने सभाप्रवेशनं कर्तव्यम् । यत्र त्रि-पञ्च-सप्तसंख्याकाः लोकवेदधर्मज्ञाः ब्राह्मणास्तिष्ठन्ति सा सभा यज्ञसदृशी भवति । सभाप्रवेशनं विधाय मन्त्रिभिः ब्राह्मणैः सह कर्तव्यम् । तत्र सभा मध्ये स्थापितानां मन्त्रिणां सभापालानामभि-मन्त्रणं कर्तव्यम् । यदा नृपतिः स्वयमपि कार्यदर्शने न कुर्यात्तदा विद्वांसं ब्राह्मणं तत्र कार्यदर्शने नियोजयेत् । ब्राह्मणाभावे क्षत्रियं क्षत्रियाभावे धर्म-शास्त्रज्ञं वैश्यं नियोजयेत् । तत्र शूद्रस्य नियोजनं निषिद्धम् ।

रथारोहणम्

युद्धार्थं क्षत्रियाणां रथारोहणं भवति स्म । रथारोहणं पौरा-णिककालानुसारं वानप्रस्थावस्थायां यात्रायामपि भवितुं अर्हति । यदि विप्रः शास्त्रं वृत्तिमभिलक्ष्य क्षत्रियस्यापि रथारोहणं भवति । तत्र मन्त्रैः रथं तदङ्गोपाङ्गा-न्यभिमन्त्र्य रथारोहणं विधेयम् । इत्थं कृते वाञ्छिताभिलषितानि ऋग्वेदादिवाक्यस्य सम्मतिः ।

हस्त्यादिरोहणम्

हस्त्यादिरोहणप्रसङ्गे अश्व-उष्ट्र-गजस्यादीनां यारोहणं निगदितम् । तत्र हस्त्यारोहणे क्षत्रियाणामेवाधिकारः । तत्र मन्त्राभिमन्त्रणपूर्वकमारोहणं भवति । अश्वारोहणे उष्ट्रारोहणे च ब्राह्मणादित्रिवर्णानामेवाधिकारः । राज्ञः कुत्रापि अधिकारो वर्तते ।

साधारणं कर्म

गृह्यकारिकायां वर्णितं कृते साधारणं कर्म वर्णितम् । इत्थं कर्मसु तत्तन्मन्त्राणां पाठः कार्यो वा भवति । ऋग्वेदादिविहित साधारण-कर्मकर्म-

चातुर्थ्यां फलतन्त्रम्, नावारोहणम्, निम्नारोहणम्, श्मशानदर्शनम्, मेघ-
गर्जनम्, अधःपतनं स्वापनम्, अतिवृष्टिदर्शनम्, इत्यादिकर्मणां गणना कृता
एषु विविधकर्मणां प्रयोगः शुभकामनया, अनिष्टनिवारणेच्छया च
भवति । साधारणकर्मसु कथितानि कर्माणि सम्प्रति नावलोक्यन्ते ।

## उत्तरभागः

### अधिकारि-निरूपणम्

आधान-कर्मणि चाधिकारिनिरूपणं रेणुकेन गृह्यकारिकायां सविस्तरं वर्णितम् । कात्यायनमतानुसारं ब्राह्मणराजन्यवैश्यानां श्रुतेः(का० श्रौ० सू० १, १) इत्यधिकारिणः सन्ति । रथकारस्य आधानमात्रे अधिकारः । अंगहीनाश्रोत्रियषण्ढशूद्राणामाधाने नाधिकारः । भार्या सह मिलित्वाधिकारिण्यः भवन्ति । यथा हि गृह्यकारिकायाम् -

ब्राह्मणाः क्षत्रियविशाः शुद्धं स्त्रिया युक्तमाः ।
अधिकुर्वन्ति गार्हस्थ्ये सह भार्यास्त्रियस्तथा ॥

मूके मूके च न को पि अधिकारः । पतितानां दीनपुत्राणां च नाधिकारस्तत्र । गृह्यकारिकानुसारं व्यभिचारशीला रोगिणी वेश्या च मयीना आधाने परित्याज्या भवति । रेणुकेन यथा - अधिकारि-निरूपणम् -

अपत्नीको ऽपि कृतावसथः पित्रादिभिरलब्धाधिकारः ।
पत्नी वयसो ऽपि आदधीत अग्नीन् स्वकर्माणि करिष्यमाणः ॥

आधान-कर्मणि ज्येष्ठस्य सति विद्यमाने कनिष्ठस्य नाधिकारः, किन्तु देशान्तरं प्रति गते ज्येष्ठे कनिष्ठो ऽधिकारी भवति ।

पात्रलक्षणम्

गृह्यकारिकायां पात्रलक्षणप्रसङ्गे यानि पात्राणि वर्णितानि तेषां प्रथमं संख्या वर्णनम् । प्रसङ्गे ऽस्मिन् यज्ञियानि पात्राणि स्रुवः, स्रुचः, आज्यस्थाली, चरुस्थाली, शूर्पं, उलूखलं, मुसलं, शम्या च इत्यादीनि पात्राणि । एषु हि शमी-पलाश-खदिर-पिप्पलोदुम्बर-विकङ्कतानां च वृक्षाणां प्रयोगः वर्णितः ।

आधानकालः

गृह्यकारिकानुसारं आधानं दायकाले, दायाभावकाले वा कर्तव्यम् । आधानं च वसन्ते ब्राह्मणो ऽग्नीनादधीत, ग्रीष्मे राजन्यो वर्षासु वैश्यः इत्यादिवाक्यैः त्रैवर्णिकान्प्रति तत्कर्णोदितेन कालावस्थायामाग्न्याधेयम् (आप०श्रौ० ५.७.१) इत्यादिना तत्काले विहितं कर्म । तत्र गार्हपत्या-यतनात् दक्षिणाग्निमध्याग्नियुग्मस्थापनम् तत्तत्पदेषु मन्त्रैः तदग्नीनां स्थापनम् । इति आधाने श्रौताग्नीनां विधिः । वात्स्यः कृष्णकेशो ऽग्नीनादधीत इत्यादि श्रुत्या पञ्चविंशत्युपरि पञ्चाशतो वर्षेभ्यः ऊर्ध्वं सपत्नीकेन पुत्रोत्पादनानुष्ठेयम्, ततो यावज्जीवं धारणं च । रेणुदीक्षितेन गृह्यकारिकायामाधानकाल-प्रसङ्गे मुहूर्तविचारः कृतः, तं विचारमत्र दर्शयिष्यामि -

तत्र मास विचारः

माघादिपंचमासेषु श्रावणे चाश्विने तथा ।
कुर्वीन्यूरी भाद्रे वा आधानं बुद्धपक्षतः ॥
(गृह्यकारि० उ०आधानकाल: ३५)

आधाने नक्षत्रविचार: तिथिवारविचारश्च

रेवत्यां चित्रायातु कृत्तिकादित्ये तथा ।
पुनर्वसौ तद्दैवत्यासूत्तरासु च ॥
सौम्यार्कावीज्य शुक्र भार्गवा वाय्ये तथा ।
वन्हि पुत्रे पूर्वाह्ले रिक्ताविष्टिवियति ॥ तत्र २५-३७.

योगविचार:

तिथ्यनु योगे प्रतिपत्तिः,
व्याघातन्दि व्यर्थेषु ।
गंडातिथि च वज्र नाश:,
कुमिषु वर्जेषु विवर्जनीया: ॥ तत्र २८

आश्वलायनमतानुसारं तु - अग्न्याधानं कृत्तिकासु रोहिण्यां मृगशिरसि फाल्गुनीषु विशाखायाम्: प्रोष्ठपदयोरित्येतेषां अन्यतमस्मिन् नक्षत्रे कस्मिन् ब्राह्मण आदधीत ।

आश्वलायनश्रौतसूत्रानुसारं तु - उक्तादाश्वलायनीयारम्भकृत्तिकाद्येषु नक्षत्राधानप्रभृति वा आश्वलायनाधानानन्तरमन्यमपि वा कृत्तिकां रोहिण्या-मृगशीर्षपुनर्वसुपुष्यपूर्वोत्तरा फाल्गुनी हस्तचित्राविशाखानुराधाश्रवणोत्तरेषु प्रोष्ठपदेषु पूर्वपक्षे आदधीत वसन्तादिषु ऋतुषु: तेषु आधानं कार्यं, नैमित्तिकाग्निहोत्रेति कृत्तिकादिनक्षत्रे: (आ०श्रौ०सू० नारायणवृत्ति २ अ० १ क०,पृ० ७०) ।

उक्तान्तरस्था अन्वाधानार्थं कुशकुशं विनिविश्य आधानं कार्यम् । यदि केनचित्कारणेन मध्ये विच्छेदस्तदा पुनराधानविधिना अन्वाधानं कर्तव्यमिति ।

मणिकावधानम्

मणिकावधानं पंचमहायज्ञाय प्रातर्होमाग्निं च आवश्यकं तदिदं स्व गृह्यमिति कथितवन्तः । पारस्करगृह्यसूत्रे आवसथ्याधानानन्तरेण तत् कृत्वा न कृतकरणम् । गृह्यकारिकाकारस्तु वदति शुचिः सभार्यः प्राङ्मुख- उपविश्याचम्य प्राणानायम्य देशकालौ संकीर्त्य उदकविन्द्वर्थं मणिकावधानं करिष्ये । देवस्य त्वा०(शु०य०सं० १, १०) इत्यादिना अभ्यादानम् । उदग्घनम्० (शु०य० ६, १) इत्यनेन उत्तरपूर्वस्यां खननम् । प्राच्यां दिशि पांसूत्करणम् । अवटे कुशास्तरणम्, यवाक्षतादिभिः दूर्वाप्रक्षेपः कुशादीनां च । ततो मणिकं गृहीत्वा समुद्रो वासि वाचया वा यजुर्वायुः मणिकस्य स्थापने विनियोगं कृत्वा समुद्रो सि०(शु०य०सं० १८, ४५) इत्यनेन अवटे मणिकनिधानम्, दृढीकरणम् । आपो रेवती० इत्यूचा (पा०गृ० ३, ५, ३) इत्यनेन मणिके एकेन उदकमासिञ्चेत् । आपो हि ष्ठा० (य०सं० ३६, १४) तिसृणां उदकमासिञ्चेत् ।

अत ऊर्ध्वं श्रौतकर्मप्रयोगात्कस्य मणिकोदकेनैव कार्यः । यदग्नि- धाने तु पुत्रः शिष्यो वा पत्नी वा उदकक्षिं कुर्यात् । ततो ब्राह्मणभोजनम् ।

पंचमहायज्ञाः

गृह्यकारिकायां विस्तारपूर्वकं पंचमहायज्ञानां वर्णनं कृतं । पंच- महायज्ञाः प्रतिदिनमनुष्ठेयाः ।

दिग्भ्यश्च । प्राच्यां दिशि वायवे । पुनः प्राच्यै दिशे, दक्षिणायै, प्रतीच्यै, उदीच्यै, ऊर्ध्वायै, अन्तरिक्षाय, भूम्यै च । उत्तरतः विश्वेभ्यो देवेभ्यः, विश्वेभ्यो भूतेभ्यश्च । पुनः उत्तरतः उषसे, भूतानांपतये च बलिप्रदानं कार्यम् ।

(ग) पितृयज्ञः

भूतयज्ञानन्तरं पितृयज्ञं कर्तव्यम् । तत्र शेषमन्नं पिण्डरूपेण प्राचीनावीती दक्षिणाभिमुखो भूत्वा सव्यं जान्वाच्य बलिस्थानात् दक्षिणतो दद्यात् । ॐ पितृभ्यः स्वधा नमः । इति पितृतीर्थेन दद्यात् । इदं पितृभ्यः स्वधा न मम । ततोदकस्पर्शः ।

(घ) ब्रह्मयज्ञः

ब्रह्मयज्ञेऽपि मतमतान्तराणि सन्ति । ब्रह्मयज्ञस्य प्रारम्भे रेणुदीक्षितेन गृह्यकारिकायां विशिष्टा एव व्यवस्था प्रदत्ता -

बद्धाञ्जलिर्दर्भपाणिः प्राङ्मुखस्तु कुशासनः ।
वामाङ्घ्रिमुपरि कृत्वा दक्षिणं तु यथाक्रमम् ॥
दक्षिणे जानुनि करौ न्यस्याथ तूष्णीमेतात् ॥

कात्यायनमते तु आदौ प्रणवोच्चारणं कार्यम्, ततः व्याहृतयः, अनन्तरं सावित्र्याः पाठपूर्वकं वेदाध्ययनं प्रारभेत् । ब्रह्मयज्ञविधौ गायत्र्युपक्रमेण चतुर्वेदो देवः प्राचितरां याति इति व्यवस्था । एवं त्रिवेदाध्यायी त्रिवेदा चतुर्वेदी आरभ्य समाप्य पुनः पठेत् । अथवा इषे त्वोर्जे त्वा प्रथमा कण्डिका, अन्ते हिरण्मयेन (य०सं० ४०. १७) व्रतमुपैष्यन् (श०ब्रा० १. १. १. १) प्राश्नीपुत्रादासुरिवासिनः (श०ब्रा० १४. ९. ४. ३३) अग्निमीळे पुरोहितम् (ऋवे० १. १. १) अग्न आयाहि वीतये (साम० १. १. १) शन्नो देवीरभिष्टये

(कठे० १, १) अथानुवाकान् वक्ष्यामि (कुमा० सूत्र १) स्वाहा दधिमधितत्स्वं (कात्यौ०सू०-१) अथातो विचारः कल्प्यन्तानि कर्माणि (का०श्रौ० १, १, १-२) अथातो गृह्यस्थालीपाकानां कर्म (पा०गृ० १, १, १) अथ शिक्षां प्रवक्ष्यामि (पा०शि० १, १) पंचसंवत्सरमयं (वे०ज्यो० १) मयरसतजभन(पि०सू० १) गौः ग्मा ज्मा(निघण्टु १, १) वृद्धिरादैच्(पा० १, १, १) समाम्नायः समाम्नातः (निरुक्त १, १) अथातो धर्मजिज्ञासा (पू०मी० १, १, १) अथातो ब्रह्मजिज्ञासा (उ०मी० १, १, १) योगानुशासनं धाराप्रवर्धं(पा०यो० १, १) नारायणं नमस्कृत्य (न्या०भा० १, १, २) ब्राह्मणे नमः इति त्रिरुच्चार्य विरमेत् समर्पयेत् ।

ब्रह्मयज्ञार्थान् कुशानुपरतः प्रतिष्ठापयेत् । ब्रह्मयज्ञस्तु अनध्यायादि-ष्वनध्याये अपि कर्तव्य एव यतः स्वाध्यायब्राह्मणे (शत०ब्रा० ११, ५, ६, ८) निर्देशः । ब्रह्मणि तु हविर्दानाभावो, तस्मा कुशपिंजला एवः, देवातुरिपिंजला एवः । तदानध्याये ब्रह्मयज्ञ ब्रह्मार्थान् मात्रा च कर्तव्यः ।

(ङ) मनुष्ययज्ञ:

मनुष्ययज्ञार्थे श्रोतस्मार्तकर्मनिमित्तमन्नं तत्राप्यवशिष्टं ग्रासं वा ग्रासार्धं मनुष्येभ्यः संकल्पयेत् । कण्ठं कृत्वा सनकादिमनुष्येभ्यो हन्त ते नमः । इदं सनकादिमनुष्येभ्यः । इति पंचमं मनुष्ययज्ञं सम्पाद्य विप्रस्य पुरतो देवेभ्यो नैवेद्यम् । गोग्रासं भिक्षादानादिकं च कार्यम् ।

होमविधि:

श्रौताधानानन्तरं प्रतिदिनं होमकर्मविधेयम् । होमविधिः द्विधः, प्रातर्होमः सायं होमश्चेति । प्रातः होमकर्म सूर्यमुद्दिश्य भवति । सायं होमस्तु अग्निमुद्दिश्य भवति । प्रत्युषे सायन्ते च होमकर्माणि पञ्चानि यान्यानि

देयानि । तानि धान्यानि यव-गोधूम-श्यामाक-तण्डुलानि भवन्ति । आश्वलायन-गृह्यसूत्रटीकायां होमार्थं दशविधानि द्रव्याणि वर्णितानि । रेणुकेन तु पारस्करगृह्ये वर्णितं समाचारम् ।

पर्वादिकर्म

आधानानन्तरं प्रथम प्रतिपदिशुक्लायां कृष्णायां वा प्रातर्होमानन्तरं वरस्थानादग्निविदेशं महानसे स्थाप्य पञ्चोद्देशार्थं पाकं कृत्वा निर्वापणान्तं देवोद्देशं विधाय मातृपूजन-पूर्वकमाभ्युदयिकं कुर्यात् । ततः दर्शपौर्णमास-स्थालीपाकार्थं कर्म कर्तव्यमिति संकल्पपूर्वकं जुहोति-आग्नेये प्रजापतये, विश्वेभ्यो देवेभ्यो द्यावापृथिवीभ्यामिति । ततः विश्वेभ्यो देवेभ्यो बलिहरणं भवति भूतेभ्यः आकाशाय च । ततः वैश्वदेवस्य चान्नेन जुहोति - अग्नये, प्रजापतये, विश्वेभ्यो देवेभ्यः, अग्नये स्विष्टकृते च । ततः चतुर्दिक्षु बाह्यतः निर्ऋत्यै, पूषे, वरुणाय, पुरुषाय, वृषायन्ताय पापिनां पक्षे च । ततः शेषान्नभूमिः प्रक्षाल्य ब्राह्मणभोजनं विधेयम् ।

नवप्राशनम्

कर्मेदं गृहस्थाग्निहोत्रिणः सम्पादनीयं भवति । गो०गृ०(३, ७३) तथा च म०गृ० (१, २७) इदं नवप्राशनं नवयज्ञः इति नवशस्येष्टि नाम्ना च व्यवहृतमस्ति । व्रीहि-यव-श्यामाकानां प्रयोगः नवप्राशनं विना न कर्तव्यमिति व्यवस्था आश्वलायनगृह्ये (२, २, ४) दृश्यते । अत्र त्रिः देवताः, इन्द्राग्नी विश्वेदेवाः, द्यावापृथिवी च । अस्य विस्तृतं वर्णनं आश्वलायनगृह्ये (२, २, १-५) आप०गृ०( १९, ६-७) शांखा०गृ० (३, ८) पा०गृ०( ३, १) गोभि०गृ० (३, ८, ९-२४) खा०गृ० (३, ३, ६-१५) वैखा०गृ०(४, २) मान०गृ०( २, ३, ९-१४) च मिलति । गृह्यकारिकानुसारं नवप्राशनम् शरदि वसन्ते वा विधेयम् ।

श्रवणाकर्म

गृह्यकारिकानुसारं[1] श्रावण्यां पूर्णिमायां श्रवणाकर्म विधेयम् । तदिदं मातृकापूर्वकं चारम्भणीयम् । कर्मण विधिस्तु:[2] चरुं श्रपयित्वानन्तरं धानकर्पं तत एकं कपालं तथा तण्डुलानन्तरं यवान् सक्तुतण्डुलपिष्टान्यासादयेत् । प्रोक्षण काले यथा सादितं प्रोक्षेत् उपकल्पयति च दृषदुपले, शूर्पं, अपाञ्जनार्थं, कंकतम्, अञ्जनम्, अनुलेपनम्, सुमनसेति । एक कपाले पुरोडाशं श्रपयित्वा चरुं च निर्माय यथा शास्त्रं जुहोति । विष्णवे, श्रवणाय, श्रावण्यै, पौर्णमास्यै, वर्षाभ्यश्च जुहुयात् धानावन्तं तु धानानां चाहुतिं जुहुयात् । ततः घृताक्ता-न्सक्तून् सर्पेभ्यो जुहोति । तत्र भौमादिभ्यो न्याहुतिं पुरोडाशस्य प्रयच्छति । ततः अञ्जनम् । ततः कंकताञ्जनानुलेपनं सुमनश्च प्रयच्छति । एवं प्रयोगः सर्पाणां चाक्रमणनिरोधाय कर्त्तव्यः ।

इन्द्रयज्ञः

गृह्यकारिकानुसारं भाद्रपदस्य पूर्णिमायामिन्द्रयज्ञसंज्ञकं कर्म भवति । अस्य पूर्णं वर्णनं पारस्करगृह्ये[3] मिलति । अत्र इन्द्राय पायसं पुरोडाशं च श्रपयित्वा अग्नेः चतुर्दिक्षु पुरोडाशानं तथा चाज्यभागौ हुत्वा पायसं दान-मत्र इन्द्राय देयं भवति आज्याहुतिस्तु क्रमाद् इन्द्राय, इन्द्राण्यै, अजाय, एक-पादाय आहिर्बुध्न्याय प्रोष्ठपदाभ्यश्च प्रदेयः । ततः मरुद्भ्यो बलिहरणम् ।

---

१. गृह्यकारिकायां उक्त श्रवणाकर्म - १-२.
२. पा०गृ०सू० २, १४.
३. तत्रैव, २, १५ ; च
गृह्य० उक्त इन्द्र० १-४.

यतो हि मरुतः कृतं भवति[1] । मरुद्भ्यो बलिदानं चात्रत्येषु भवति, यतो हि ते वत्सस्य पूर्वो निवसन्ति[2] ।

अत्र मन्त्र[3]-ब्राह्मणयोः[4] पाठः व्यवहृतः । पश्चे ब्राह्मण भोजनम् । कौशिके[5] राज्ञां कृते इन्द्रस्य अभिषेकाय उत्सवविशेषस्य चर्चा कृता । उत्सवो यं भाद्रपदस्य आश्विनमासस्य वा शुक्लाष्टम्यां भवति । अत्र श्रवणनक्षत्रे ध्वजारोहणं भवति । पाञ्चरात्रसंहितायाम्[6] उत्सवस्यास्य चर्चा दृश्यते । कृत्यरत्नाकरे[7] पि इन्द्रपूजाविधानं वर्णितं । महाभारताद्[8] ज्ञायते यदुत्सवस्यास्य सम्प्रवर्तनमपि उपरिचरवसुना कृतम् ।

अद्यापि भारते नेपालस्य प्रमुख दिवसे यत्र तत्र ध्वजा रोहणस्य प्रथा दृश्यते ।

पृषातककर्म

गृह्यकारिकानुसारं पृषातककर्म कर्म आश्वयुज्यां पौर्णमास्यां कर्तव्यम् । यथा हि -

---

१. शतपथ ब्रा० २. ५. २. १६
२. तैत्ति, ४. ३. ३. ६
३. गृ०प०सं० ७. ८०-८६
४. शत०ब्रा० ६. ३. १. २६
५. कौ०गृ०सू० १४०.
६. पां०सं० १. १४०.
७. कृत्यरत्नाकरः पृ० ३८२-९३.
८. म०भा० आदिपर्व ६३. १-२९ ; बृहत्संहिता अ० ४३.

पृषातकाख्यं यत्कर्म तदिदानीमथोच्यते ।
तत्राश्वयुजमासस्य पौर्णमास्यां कृतो विधिः ॥
(गृह्यसं० पृषातककर्म १)

तत्र प्रथमतोऽग्नि मातृकापूजापूर्वकमाभ्युदयिकं आवसथ्याग्नौ कृतोपविशनादि । प्राकाग्नौ विधिना: पदार्थ: पृषातका: पृषदाज्यं, दधिमधुना चौपकल्पयेत् । पृषातका: दारिण पायसं श्रपयेत् । ततः उपयमनकुशादानादयाज्यं पायसे दधि-मधुघृतानि क्षिपेत् । ततः आज्यभागानन्तरं दधिमधुघृतमिश्रेण पायसेन इन्द्राय, इन्द्राण्यै, अश्विभ्यां, आश्वयुज्यै, पौर्णमास्यै, शरदे च स्वं पंचाहुतीर्हुत्वा तत एव पायसात् स्विष्टकृतं हुत्वा महाव्याहृत्यादि दक्षिणादानान्ते स्थाल्यां दधि आनीय पृषदाज्यं कृत्वा अञ्जलिना दाय ऊनं मे पूर्यतां पूर्णं मे मा व्यगात् स्वाहेति मन्त्रेणाहुतिं जुहोति इत्यन्ये ।

ततः दधिमधुघृतमिश्रं हुतशेषं पायसम् अमात्याः पुत्रादयः आघा-स्थित हस्तयुग्मेन पुष्पाञ्जलिभिः ग्रहणं हस्तेनैव ओदनम् । ततः कर्मान्ते ब्राह्मणभोजनं भवति । आश्वयुजी रात्रिं गोवत्सान् धेनुभिः सह सम्भेदयेत् । तस्यां रात्रौ वत्सान् न वत्साप्यात् । पृषातककर्मणः वर्णनं गौतमेन[1] ४० संस्कारेषु कृतम् ।

आश्वलायन गृह्य[2] अस्य कर्मणः नाम आश्वयुजी कर्म । शांखायनी[3] यि आश्वलायनस्य समर्थयति पारस्करगृह्य[4], गोभिल-खादिर-वैखानसगृह्येषु च म अस्य नाम पृषातका: अथवा पृषातक स्थालीपाक ।

---

1. गौ०धसू० ८, १९.
2. आश्व०गृ०सू० २, २, १-३.
3. शां०गृ०सू० ४, १६.
4. पा०गृ०सू० २, १६ ; गो०गृ०सू० ३, ८, ९; खा०गृ०सू० ३, ३, १-५ ; वैखा०गृ०सू० ४, ९.

आग्रयणम्

आग्रयणकर्म । तच्च मार्गशीर्ष्यां पौर्णमास्यामाग्रयणकर्म भवति । तत्र प्रथम प्रयोगे निर्णीतान्तं वैश्वदेवं कृत्वा प्राणानायम्य देशकालौ संकीर्त्य आग्रयणकर्म निमित्तं गणपतिपूजनादि भूतादिकान्तं कृत्वा निम्नलिखित प्राणानायम्य आग्रयणकर्म निमित्तं संकल्पयुज्यात् ।

ततो वैकल्पिकं कुर्यात् । स्थालीपाकम् । तत्र अथ शतायुधे स्थाविष्ठौ: प्रजापतिस्त्रिष्टुप्छन्दा देवता छन्दसां, पर्जन्या: प्रतिच्छन्दश्च संवत्सरस्य प्रतिमे इत्यस्याथर्वण ऋ० रात्रिर्देवता संवत्सराय परिवत्सराय ग्रीष्मो हेमन्त: इत्यनयोराथर्वण ऋषिस्त्रिष्टुप् संवत्सरादयो ग्रीष्मादयश्च पंच पंच क्रमाद्देवता चतुर्णां होमे विनियोग: । आग्नेयपाण्डुरा इति मन्त्राणां परमेष्ठी प्रजापति: (ऋ०) त्रिष्टुप्छन्दा देवता छन्दांसि होमाच्छादनादिषु मन्त्री सर्पेभ्य इति त्रयाणां प्रजापति: ऋ० सर्पा उपस्थाने विनियोग: । आपो हि ष्ठेति तिसृणां सिन्धुद्वीप० गायत्री० आपो देवता मार्जने विनियोग: ।

अथ देवताभिध्यानम् । तत्र प्रजापतिमिन्द्राग्नी सोमं शतायुधं शतं वर्षं रात्रिं संवत्सरं परिवत्सरं इदावत्सरं इद्वत्सरं वत्सरं ग्रीष्मं हेमन्तं वसन्तं वर्षा: उद्दिष्टा देवता आज्येन, सोमं प्रजापतिं मार्गशीर्ष्यां पौर्णमासीं हेमन्तं स्थालीपाकेन अग्निं स्विष्टकृतं चरुशेषेण, आग्नेयपाण्डुपार्थिवानां सर्पाणामधिपतिं श्वेतवायवान्तरिक्षाणां सर्पाणामधिपतिं अभिभू: सौर्य-दिव्यानां सर्पाणामधिपतिं एता: सक्तुबलिभि:, भूरादीनां पूर्ववत्, एता अङ्गप्रधानार्था देवता अस्मिन् कर्मणि ।

अत्र तावद् प्रणीताज्यभागान्ते विशेष: । उपकल्पनीयानि शूर्पम्, उदपात्रम्, दर्भा:, कंकतानि, अंजनम्, अनुलेपनम्, स्रज:, उत्तरार्धं काष्ठम्,

उपकाधायकः, मांसौदनपाकम् । अत्र तु धानानां चरुश्रपणानन्तरमाज्यभागान्तं कृत्वा ॐ अवलेवकाय० इत्यादिना जुहुयात्, न वै अस्तव्या० इत्यनेन सीताय देवत्यापि चातुर्थः पृथक् ।

ततो यां जनाः स्वत्र आज्याहुतयः । यां जनाः प्रतिनन्दन्ति इत्यादिना राज्यै । संवत्सरस्य प्रतिमा या० इत्यनेन राज्यै० । संवत्सराय परिवत्सराय० इत्यादिना संवत्सराय परिवत्सरायेदावत्सरायेद्वत्सराय वत्सराय च । ततः ग्रीष्मो हेमन्त० इत्यनेन ग्रीष्माय, हेमन्ताय, वसन्ताय, वर्षाभ्यः इति च ।

तदनन्तरं स्थालीपाकं अभिधार्य अत्र आहुतिचतुष्टयम् - सोमाय, मृगशिरसे, मार्गशीर्ष्यै, पौर्णमास्यै, हेमन्ताय, अग्नये स्विष्टकृते च यथा दैवतं त्यागः । अन्यत्कर्माणि श्रवणाकर्मवच्चरेत् ।

अस्य कर्मणः विषये गृह्यसूत्रेषु ऐक्यं नास्ति[1] खादिर, गोभिल-मानव-भारद्वाज-आपस्तम्ब-बौधायनगृह्यसूत्रेषु अस्य कर्मणो वर्णनं न भवति । तत्र तु प्रत्यवरोहणं नामकं कृत्यं वर्णितमस्ति यस्य सम्पादनं अग्रहायणे भवति । सम्प्रति अस्य कर्मणः प्रायो लुप्तं वर्तते । पारस्करगृह्ये[2] गोभिलगृह्ये च अस्य वर्णनं विस्तृतं वर्तते । अस्मिन् दिवसे गृहशुद्धिः गोमयेन भवति स्म । गृहवास्तिकायां

---

१. वा०गृ०सू० ३.३.१-३५ ; गोभि०गृ०सू० ३.८ ;
मा०गृ०सू० २.७.१-५ ; भारद्वाज गृ० २.२ ;
आ०गृ०सू० २.१७.१९; बौ०गृ०सू० २.१० ;
आप०गृ०सू० १९.१-५ तथा ८-१२ ;
आ०गृ०सू० ४.१५.२२.

२. पा०गृ०सू० ३.२ ;
गो०गृ०सू० ३.९.१-२३;
अथ० १.२२.१५

रेणुदीक्षितेन अस्य विस्तृतो प्रयोगात्मकं वर्णनं कृतम् । अस्य कालविषयि तिथिं च -

आग्रहायणी कर्म मार्गकल्पप्रशस्ततः ।
मार्गशीर्षस्य मासस्य पौर्णमास्यां तदिष्यते ॥
न गौणकालस्तस्मिन् परिसंख्याविधानतः ।
कृत्वा ग्रहायणी कर्माण्यपि मार्गशीर्षकम् ॥
(गृह्यकारिका० आग्रहायणम् १-२)

प्रत्यवरोहणम्

गृह्यकारिकानुसारं प्रत्यवरोहणं मार्गशीर्ष्याः पौर्णमास्या ऊर्ध्वमागामिन्या अष्टम्या अर्वाक् कस्मिंश्चिदुचितदिने कर्तव्यम् । यथोक्तम् -

प्रत्यवरोहणं कुर्याद् पौर्णमास्या अनन्तरम् ।
अर्वाक् च पुनवारे अष्टकायाः पुरैव तु ॥ (गृह्यकारिका० १)

तत्र तल्पं गृहस्थस्य सम्पादिताः स्युः । यदि तावता प्रत्यवरोहणावकाशो न विद्येत तदा देशान्तरे चतुर्थं विधाय तत्राग्निं संस्थाप्य होमकर्म कर्तव्यम् । तत्र प्रथमं यजमानः नित्यस्नानं दैनिकं कृत्वा प्राणानायम्य देशकालौ संकीर्त्य प्रत्यवरोहणनिमित्तं गणपतिपूजनादि नान्दीश्राद्धान्तं कृत्वा अग्नि-मर्पेण यजमानः पत्नी च पुत्रादयो गृहस्थ यथाज्येष्ठकनिष्ठं संस्थाः प्राङ्मुखा उपविशेयुः । ततो यजमानः प्राणायामादिकं कृत्वा परमेश्वर प्रीत्यै प्रत्यवरोहणमहं करिष्ये ।

ततः ऋष्यादि स्मरणम् । अयमग्निर्वीरतम इत्यस्य प्रजापतिरनुष्टुप् अग्निर्देवता जपे विनियोगः । देवाग्नावपि इत्यस्य प्रजापतिः गायत्री अग्निः (अदितिः) पुनातु इत्यस्य सरस्वती गायत्री अश्विनौ देवते (अश्विनावृणा-

गायत्रीछन्दः गौः गौर्वा देवता। आ नो मित्रावरुणा इत्यस्य सरस्वती
(विश्वामित्रः) गायत्री मित्रावरुणौ देवते अञ्जिकरणे विनियोगः। आयुः
कीर्तिः इत्यस्य गौतमः (आयुरा) गायत्री अग्निः प्रस्तरारोहणे विनियोगः।
युञ्जन्ति इत्यस्य आश्वलायनः पंक्तिः त्रिष्टुप् छन्दः लिङ्गोक्ता देवता पंक्तिदेवताके
विनियोगः। स्योना पृथिवि इत्यस्य दध्यङ्ङाथर्वणः गायत्री पृथिवी देवता
शयने विनियोगः। उदायुषा इत्यस्य गौतमः गायत्री अग्निर्देवता उत्थाने
विनियोगः।

इति कृत्वा ग्रन्थिविमोचनादिकं … कन्यायाश्च
प्रस्तरं कृत्वा यजमानो …: पश्चात् प्रागग्रं प्रस्तरमास्तीर्य तस्योपरिष्टात् बल-
पुरन्दरमास्तीर्य प्रस्तरणं कृत्वा, अग्नेरुत्तरत उपपात्रे समाज्य पात्रासोष्ठ-
मध्याने चीदर्भांश्च निधाय प्रस्तरमणिोपरि … यजमानः
अयमग्निर्वीरतमो यं (शु०य०सं० २१. ६-८) इत्यादिभिः त्रिभिर्मन्त्रैरधीनाभि
प्राप्तमञ्जलिं कृत्वा … प्रस्तरारोहामि इति ब्राह्मणमामन्त्र्य प्रस्तरारोहामि इति
ब्राह्मणानुज्ञातो यजमानः पत्नी पुत्रादयो गृह्याश्च यथा ज्येष्ठं प्राक्शिरसाः
पादेन आयुष्यामि … इति मन्त्रं जपन्तः सर्वे क्रमेण प्रस्त-
रमारोहेयुः। … । तेषां मध्ये …
…। शिवा नो वर्षाः सन्तु शरदः
सन्तु नः शिवा इति मंत्रं जपेयुः।

समारूढास्ते सर्वे स्योना पृथिवी (शु०य०सं० ३५. २१) इति मन्त्रेणा-
रोहणक्रमेण प्राक्शिरसो दक्षिणपार्श्वैः शयीरन्। ततः उदायुषा स्वायु-
षोत्तिष्ठ … पृथिव्याः … इति मन्त्रेण सर्वे क्रमादुत्ति-
ष्ठेयुः। एवं प्रस्तरारोहणप्रत्युत्थानान्ते त्रिवारं कर्म कुर्युः। तत आरभ्य
मासचतुष्टयं यावत् सर्वे अधः शयीरन् यथेष्टं वा। अत्र … ।
गृह्यकारिकानुसारं तु … अनुमतानां … न …।

प्रथमाष्टका

गृह्यकारिकाकारैः ऊर्ध्वमाग्रहायण्या मार्गशीर्षपौष-माघानां कृष्णाष्टमीषु ऐन्द्री वैश्वदेवी, प्राजापत्या: क्रमेण पित्र्येति तिस्रो-ष्टका कर्माणि स्युः ।

एतासु तावत्प्रथमा ऐन्द्रीसंज्ञाष्टकोच्यते । तत्र प्रथमप्रातर्वृद्धि-श्राद्धं विधायाग्नेः पश्चादुपविश्य प्राणानायम्य देशकालौ संकीर्त्य श्रीपरमेश्वर-प्रीत्यर्थं अष्टका कर्माहं करिष्ये ।

ब्रह्मादिवरणम् । त्रिं० शत्स्वसार इत्यादिमंत्रस्य याज्ञ-वल्क्य (प्रजापतिः) ऋषिः त्रिष्टुप् षष्ठ्या अनुष्टुप् लिङ्गोक्ता आज्यहोमे विनियोगः ।

देवताभिधानम् । तत्र प्रजापतिमिन्द्रमग्निं, सोमं ऋतू:, रात्रिं अष्टकां, रात्री:, रात्री:, रात्री:, रात्रिं, रात्रिं, रात्रिं एता आज्येन - पृथिवीं, अन्तरिक्षं, दिवं, दिश:, प्रदिश:, आदिश:, अहोरात्रि, मा:, मरीचीः, धातारं, वसुं, पूषणं, विश्वानादित्यान्, वायुन्देवान्, ऋतून्, ग्रीष्मान्, मरुत:, प्रजापतिं, परमेष्ठिनं, अष्टकां चरुणा- इन्द्रमग्नि - अग्निं स्विष्टकृतं स्थालीपाकापूपशेषेण - भूरादीनां प्राजापत्यम् । एता बहुप्रधानाधिदेवता अस्मिन् कर्मण्यहं यक्ष्ये ।

ततो ब्रह्मणाज्यभागान्तो विधिः । तदनन्तरं स्थालीपाका-पूपस्थासादनम् । प्रोक्षणकाले प्रोक्षणम् । तत आज्यभागान्ते आज्येनैव त्रिं ॐ शत्स्वसार इत्यादिभिराहुतीर्जुहुयात् । ततः स्थालीपाकमभिधार्य तेन

चतस्र आहुतीः द्यावापृथिवी सर्वाष्टकान्ता जुहुयात् ।

अथापूपमिश्रायं तैजाहुतिः । इन्द्राय स्वाहा । इदमिन्द्राय, न मम । ततः स्थालीपाकावशिष्टेन स्विष्टकृत् । ततो पुरादिङ्गणानादिमो-कान्तं कुर्यात् ।

अन्वष्टका

अष्टकाया उत्तेद्युः पिण्डपितृयज्ञवदन्वष्टकाकर्म कुर्यात् । तच्च मातृ-पितृविधानार्थं भवति । तदुक्तं गृह्यकारिकायाम् -

मातॄर्विधानार्थमन्वष्टक्यमिदं भवेत् ।
पितॄर्विधाने च दर्शितस्तु पितुः क्रतुः ।। उ०अन्वष्टका ४४.

पुरा चाष्टकासु मांसप्रयोगः भवति स्म, एतस्य उल्लेखोऽपि रेणुकेन कृतः -

स्यादष्टकाद्वितीया गोयज्ञाय निरूप्यते ।
गोवधस्य निषेधत्वाच्छागेन कौष्ठी ।।
केचित् वदन्ति न स्यादि पंक्त्याकर्णक्रिया ।।
प्राप्ते कलियुगे तत्र पापिष्ठैरिति केचन ।।
वरुणात्यापत्तीः कर्मादिवै नैव तत्कुर्ये ।
किन्तु प्रथमा स्वकायास्तु इति कस्य सम्मतिः ।।उ०अन्वा० ४५-४७.

---

१ कुम्भाप० पा०गृ०सू० ३. ३. १-४; गो०गृ० ३. १०. १८; बौ०गृ०सू० २. ११. १-४; आप०गृ०सू० २. ४२ ; हिरण्य०गृ० २. १४. २. १५ ; भा०गृ० २. १५; वैखा०स्मा०सू० ४. ८; गौतम० ८. १९; आश्व०गृ० ९. ४. २. १०, १. २. २. २३; जैमि०गृ० १. ३. २ ; अथर्व० ३. १०. २ ; शां०गृ० ३. १२. १ ; खादिर गृ० ३. २. ३० ; कौषी० ३. १५. १

अतएवात्र गवालम्भमजालम्भं वा प्रकल्प्य तस्य प्राधान्यं वदति, ततः कलौ गवालम्भ-निषेधात् पायसव्यवस्था एव अष्टकासु कृता ।

तत्र अन्वष्टका तु निर्णीताभ्यां वैश्वदेवं कृत्वा आहुतिं प्राचीनावीता नापावन्ध्यम् । अग्नेः पश्चिमे वस्त्रादियुते उदग्गते पश्चिमे दक्षिणापुरम् कर्म कर्तव्यं भवति । अत्र हि प्राणायामादि संकल्पश्च । ततः अग्न्यादिस्थापनं, देवताभिध्यानं च कर्तव्यम् । ततः पात्रासादनम् । ततः मांसेन पायसेन चरुणा वा पितृपितामहप्रपितामहानां सपत्नीकानां कृते पिण्डदानम् ।

अन्वष्टका कर्मणि सुरा प्रयोगोऽपि भवति तत्र यथा हि - रेणुकारिकायाम् -

केचित्तोक्यमादत्र प्रसादान्नावयेत् सुराम् ।
किन्तु तत्कृते पूर्वं गुडवारीचिर्क्षं भवेत् ।।
(गृह्य० उत्त० अन्व० २२)

ततः पूर्ववत् अभ्यो देवताभ्यः अन्नादि प्रदानम् । प्रत्यवनेजनम् । पुनरोक्षणम् । अनुप्राशनम्, ततः विसर्जनं कार्यम् ।

द्वितीयाष्टका

अथ पौषस्य वैश्वदेवी अष्टका गोपशुश्चानोपयागमपि भवति । तस्य च दैवकाल विकल्पत्वात् पायसेन चरुणा वा स्यात् । तत्र प्रथमप्रयोगे मातृकापूर्वकं वृद्धिश्राद्धं कृत्वा प्राणायामादि देशकालौ संकीर्त्य द्वितीयाष्टका-कर्माहं करिष्ये इति संकल्प्य प्रथमाष्टकावत् सर्वं कुर्यात् ।

विशिष्टं तु अष्टकान्तरं विश्वान् देवान् चरुणा यभिध्यानम् । अष्टकायुक्तमन्त्रं चरुमभिधार्य विश्वेभ्यो देवेभ्यः स्वाहा: इदं विश्वेभ्यो, न मम । इति हुत्वा उत्तरभागेण स्विष्टकृत् । अन्यत् सर्वं पूर्ववत् ।

तृतीयाष्टका

एवमेव माघस्य प्राजापत्याष्टका तिथौ शाकाष्टकेन चरुणा । तदुक्तं गृह्यकारिकायाम् -

शाकार्थं चरुं सिद्धं स्थालीपाकस्य साधयेत् ।
(गृ०का० तृतीयाष्टका -२)

तत्राष्टकान्तरं प्राजापत्यं शाकाष्टकेन स्वयमभिधानम् । महाव्याहृती कुशाण्डिकोपपुरस्य शाकार्थं चरुं पक्त्वा तण्डुलानन्तरमाज्यभागादय प्रोक्षयेत् । अष्टकाहुतयो प्राजापत्ये स्वाहा । इदं प्रजापतये, न मम । इति शाकाहुतिः । उपहोमान्तं स्विष्टकृत । अन्यत्सर्वं समानम् ।

तुर्याष्टका

एवमेव चतुर्थी भाद्रपदस्य पित्र्याष्टका । अष्टकान्ते पितृन् प्राचीनावीतिनाकेन स्वयमभिधानम् । तण्डुलानन्तरं शाकमासाद्य प्रोक्ष्य चरुस्थाल्यां चरुनिर्वापः । द्वितीयस्यां वीडकायां श्राद्धं प्रदद्यात् ।

एवं चरुसिद्धि श्राद्धं पक्वाष्टकाश्राद्धानन्तरं पितृभ्यः स्वाहा इदं पितृभ्यो, न मम । इति शाकाहुतिः । एतस्य शाकचरोरवदानादिहोमान्तं प्राचीनावीतिना कर्तव्यम् । एतदनन्तरं यज्ञोपवीती अस्पृश्यो वा निदध्यात् । स्विष्टकृदादिपूर्ववत् ।

पूर्णीलगः

पूर्णीलगास्यं[१] कर्म केचित् गृह्यकृत्स्वुपलभ्यते । गृह्यकारिकानुसारं तु कार्तिके माघे फाल्गुने वा पूर्णिमायां चानुष्ठेयम् । यथा हि -

---

१. द्र० पा०गृ०सू० ३.९.१-३; शां०गृ०सू० ३.३; गो०गृ० ३.३.१.९; खा०गृ०सू० ५८.९; हिर०गृ०सू० ८९.१-३०.

कार्त्तिक्यामाश्वयुज्यां वा संक्रान्त्यामाश्विनस्य तु ।
आश्वयुज्यां पूर्णिमायां वैशाख्यां च पूर्णिमासु ।
ईशानं प्रथमं बुद्धौ चार्तुर्थ्यामथवा शिवम् ॥
नामापि गौणकालो हि विशेषवचनात्ततः ॥
(गृह्यप० अनुक्र० १-३)

स च गर्भाधानादिवत् संस्कारार्थमिव नित्यवृद्धि-प्रदानादि-पापक्षया-र्थिना परमेश्वर-प्रीतिकामेन कार्त्तिक्यादौ कर्तव्यः । तत्र गोष्ठियां मध्ये प्रशा-न्ते देशे निवाते वसति विशाखायां वा पुरो रथ्ये मण्डपे वा प्रागुदक्प्रवणे देशे आवसथ्याग्निं संस्थाप्य मत्स्यपुराणानुसारेण तत्स्थानपर्यन्ता नीलं शूलगवं वर्षीयस्तरूणं नातिक्रान्तवर्णं वा यजमानो संवत्सराधिकं तथाविधाभिः शिष्टाभिः कालुष्यविवर्जिताभिर्गोभिः सह वासयित्वा तत्स्थान-मिव शुभ्रं स्थापयेत् ।

ततः देवताभिः संगतं संस्थापयेत् । तदुपरि गणपतिपूजनादि-पूर्वकमाचम्य कृत्वा स्वस्त्यादिवाचनं कुर्यात् । पश्चात्संकल्पं कृत्वा गन्धोदक-पूरितं पञ्चपल्लवपञ्चरत्नसंयुक्तं कुम्भं धान्यपुञ्जोपरि विन्यस्य तत्र शिव-भावयुक्त अभ्यर्च्य प्रागुदक्प्रक्रान्तवेदिकायां वृषं च स्थापयेत् ।

देवताभिध्यानम् । प्रदक्षिणमग्निं ततः प्रजापतिमिन्द्रमग्निं सोम-माज्येन - अग्निं, रुद्रं, शर्वं, पशुपतिं, उग्रं, अशनिं, भवं, महादेवं, ईशानं, पायसेन-चरुणा पिष्टमयेन हविषा-अग्निं स्विष्टकृतं पाकयज्ञविधानेन-प्रेक्षमाणोऽर्चयेदिति ।

ततः 'यः रुद्रः' (८.५९) इत्यादिना जपानुवाकेनेति, ततो ग्रा-म्यवायव्यादिनाज्यभागौ । पायसमभिघार्य जलमार्जनं होमः । ततः संस्र-प्राशनादिपूर्णाहुतिविमोचनं कृत्वा कुम्भे रुद्रं जपित्वा पायसशेषेण दिक्षु

तोऽङ्कयित्वा दत्वा वृषस्य वामे स्फिचि चक्रं दक्षिणे त्रिशूलं कुर्यात् तु विपरीते कृत्वा दुग्धादिभिः कुंकुमादिभिः चर्चितं वृषभं वत्सतरीभिः निरूपयेत् (आश्व० १, ३३, ९-७) इति चतसृभि रापो हिष्ठे ति तिसृभिः कनिक्रददित्यष्टाभिर्मन्त्रैः कुम्भैः स्नापयित्वा अग्नि समीपमानीय ततः पावकं वत्सतरीमध्ये स्थितं गन्धपुष्पधूपदीपवस्त्रैः किंकिणीघण्टादिना घण्टाकण्ठं शृङ्गपुच्छमलंकृत्य रुद्रान् जपत्सु कृते पुष्पादिभिरलंकृत्य विवाहवत्-वादित्रघोषेण वेदमन्त्रान् वृषभस्य दक्षिणे वामे वा कर्णे जपेत् - वत्सतरीं ब्रह्मयः पतिं वो वत्सिं कुरुत । ददामि तेन पत्नीः क्रीडध्वं पुष्यमाणाः । इति वत्सतरा कर्णे जपेत् ।

वृषो यं भगवान् धर्मश्चतुष्पादः प्रकीर्तितः ।
वृणोमि तमहं भक्त्या स मां रक्षतु सर्वतः ॥
इति वृषभं अभिमन्त्रयेत ।

एतं युवानं वृषभं ददामि गवां पतिं पुष्पवतिं सदर्पम् ।
अनेन सार्द्धं चरत प्रकामं कामं यथा प्राप्नुत वत्सतर्यः ॥
इति वत्सतरीं भिमन्त्रयेत ।

ततो तावान् समन्तात् प्रदक्षिणं वृषभस्य वत्सतरीणां च पुच्छेगृहीत्य धृत्वा वृषभस्यैव वा सपुष्पधूपदीपाक्षतहिरण्योदकपूर्णाञ्जलिना -

एतं युवानं पतिं वो ददामि तेन क्रीडन्तीश्चरथ प्रियेण ।
मानः साप्तजनुषा सुभगा रायस्पोषेण समिषा मदेम ॥

अथ पितृप्रीत्यर्थं वत्सयोनिं वृषमुत्सृजेत् । पितृमुक्तिहेतवे मयी पुत्रेण० इत्यनुवाकेन तिलाभिमन्त्रितपुष्पं तिलोदकपूर्णं ताम्रपात्रं निधाय - स्वधा पितृभ्यो० इत्यादिनाञ्जलिना दक्षिणाभिमुखः पितृंश्च संतर्प्य वृषभं दक्षिणां परिक्रम्य नमस्कुर्यात्, प्रार्थयेच्च ।

भूमिका

ततो निःशङ्कपूर्वं वर्णं प्रशस्तलक्षितं वीरवत्सं कृष्णं ताम्रवर्ण-
ञ्चरणानपि बहूत् वस्त्रमात्रं चाताय दत्त्वा दक्षिणां च ब्राह्मणान् भोजयेत् ।
गृह्यकारिकायां विशेषो गोवृषलक्षणम् -

श्वेतः खुरविषाणाभ्यां स नीलो वृष उच्यते ।
वृषोत्सर्गादृते किञ्चिन्नान्यत्पुण्यं प्रशस्यते ॥
गयाश्राद्धाश्वमेधाभ्यां फले च विशेषकम् ।
स्वर्गादि कामनार्थेन गृह्यकारो भेददम् ॥
(गृह्यका० वृषो० ५८,७)

पायसश्राद्धम्

वृषोत्सर्गानन्तरं मार्गशीर्षे कार्त्तिके वा कृष्णे पक्षे कृष्णदिने कु-
गवत्सपुः कर्त्तव्यः । अयं पायसचरुरेव । यथा हि गृह्यकारिकायाम् -

अनन्तरं वृषोत्सर्गात् कृष्णपक्षे प्रदेशितम् ।
कार्त्तिके मार्गशीर्षे वा कृष्णे त्रिकादिके वा ॥
पञ्चम्यां कृष्णपक्षे कर्त्तव्यः पायसो चरुः ॥
(गृह्य०का० पा०श्रा० २-३)

तत्राभ्युदयिकं कृत्वा प्राणानायम्य देशकालौ संकीर्त्य श्रीमत्परमेश्वर-
प्रीत्यै पायसेन प्रायश्चित्ताख्यकर्माहं करिष्ये । यावन्त्यो गृहे गावो विद्यन्ते
तावतां पायसेन बहूनामपि एकस्यापि गोः पायसेन तृप्यति । अपि वा महिष्या
वा चालनीय महान्तादुद्धृताग्निना चरुं पक्त्वा महत्यां पात्र्यां सर्पिः पायसं
स्थापयित्वा तेन त्रिःप्रभृतान् ब्राह्मणान् भोजयित्वा तच्छेषं गवार्थं नयेत ।

पित्रुद्दिष्टवृषोत्सर्गे पायसश्राद्धे च प्रायश्चित्ताख्ये अग्निहोत्रादि
प्रथमे मासि न कुर्वन्ति । असम्पत्तौ विवाहादावृतौ वा अमावास्यायां वृषोत्सर्गे
क्रियमाणे वृषोत्सर्गानन्तरं कर्त्तव्यम् ।

प्रवासविधिः[1]

गृह्यकारिकायां प्रवासविधिः सविस्तरं वर्णितः । प्रवास शब्दार्थं प्रकटयन् रेणुकादीक्षितो लिखति -

यदि ग्राममतिक्रम्य रात्रौ तत्र वसत्यपि ।
अहस्य प्रमाणं यत् प्रवासः प्रोच्यते बुधैः ॥
(गृह्य०का० प्रवासवि० १)

तत्र तु प्रवसन् यजमानः स्वगृहं प्रविशति, पुत्रं दृष्ट्वा जपति -

अङ्गादङ्गात् सम्भवसि हृदयादधिजायसे ।
आत्मा वै पुत्र नामासि स जीव शरदः शतम् ॥

ततः स पुत्रस्य मूर्धानमवजिघ्रति प्रजापतेष्ट्वा० इत्यनेन मन्त्रेण त्र्यहम् । जिघ्रणात् । पुनः गवां त्वा हिंकारेण० इति मन्त्रेण त्र्यहं जिघ्रणान्तं चावघ्राणं त्रिशः । ततः दक्षिणे कर्णे जपति अस्मे प्रयन्धि इति । ततः सव्ये कर्णे तु इन्द्र श्रेष्ठानि० इत्यादिना जपः । यदि कन्या स्यात्तदा केवलं तूष्णीं तस्याः मूर्धानमवजिघ्रति । वस्तुतः प्रवास-विधिरिणः साग्निकस्य जनस्य कृते चासीत् ।

---

१. पा०गृ०सू० १.१८.

## गूढकारिकायाः सम्पादनकर्मणि गृहीतानि हस्तलिखितानि पुस्तकानि

गूढकारिकायाः सम्पादनकर्मणि निम्नलिखितान्यादर्शपुस्तकानि संगृहीतानि -

१. क. अयं हस्तलेखो स्माभिः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य परिसरे सरस्वतीभवनपुस्तकालये दृष्टः, पू० गुरुचरणानां कृपया लब्धः । अस्य विवरणम् -

| | | |
|---|---|---|
| पुस्तकसंख्या | : | ४५६९१ |
| पुस्तकनाम | : | कातन्त्रगूढकारिका. |
| पत्रसंख्या | : | १-११३, १-७ यावत्. |
| आकारः | : | ५ × ११ इंच मितः. |
| पङ्क्तयः | : | प्रतिपृष्ठं नवसंख्यामिताः. |
| अक्षराणि | : | प्रतिपङ्क्ति सप्तत्रिंशदक्षराणि प्रायेण. |
| लिपिः | : | प्राचीना देवनागरी. |
| प्रतिलिपिकालः | : | १९५७ तमो वैक्रमाब्दः. |
| अन्त्यपाठः | : | पूर्वार्धस्यान्ते इत्थं पाठ उपलभ्यते -<br>इति तत्त्वार्थे सम्पूर्णा [illegible] पञ्चना ।<br>कातन्त्रसूत्रवृत्तिप्रयोगविवृतिः कृता ।। ९८<br>इति गूढकारिकायां द्वितीयं काण्डं समाप्तम्,<br>पूर्वार्द्धं पूर्णम् ।। |
| | : | उत्तरार्धस्यान्ते त्वित्थं पठ्यते -<br>[illegible] लक्षणावलम्बेन च ।<br>पञ्चना [illegible] कृतेयं कृतेयं गूढकारिका ।। |

इति श्रीकालीकुलगुह्यकालिकायां रेणुकाग्नि-

होत्रविरचितायां प्रेतविधिः समाप्तः ।

इति कालिकायां तृतीयं काण्डं समाप्तम्

शुभमस्तु ।

२. ब. अयमपि हस्तलेखः सरस्वतीभवनपुस्तकालये समुपलब्धः । हस्तलेखो ऽयं त्रुटितः वर्तते । पूर्वभागो ऽपि पूर्णो नास्ति, तथापि प्राचीनतमो ऽयं लेखः, कालनिर्णयप्रसंगे परमोपयोगी जातः ।

| | | |
|---|---|---|
| पुस्तकसंख्या | : | १८८३. |
| पुस्तकनाम | : | गृह्यकालिका. |
| पत्र-संख्या | : | २-७६, ७८-९८, १०२-१८४, १८७-१९९. |
| आकारः | : | ७.५ ४.१ मितः |
| पङ्क्तयः | : | प्रतिपृष्ठं अष्टौ(८). |
| अक्षराणि | : | प्रतिपंक्ति पंचविंशत्यक्षराणि. |
| लिपिः | : | प्राचीना देवनागरी. |
| प्रतिलिपिकालः | : | १६३५ तमो वैक्रमाब्दः. |
| अन्त्यपाठः | : | अन्ते इत्थं पाठ उपलभ्यते - |

अब्दे दायादो महातन्त्राणि,

शाकिन्यास्यां शशांकिताङ्के ।

ग्रन्थः कृतो ऽयं कमलाज्ञया हि,

हरीन्द्रजामोदितमानसेनाम् ॥१॥

यच्चाशुद्धाक्षरं वा यत्रोक्तमसंगतम् ।

तत्र निपुणैः सर्वैर्विशोधनीयं समञ्जसा ॥२॥

इति गृह्यकालिका समाप्ता

यादृशं पुस्तकं दृष्टं तादृशं लिखितं मया ।

यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥१॥

पुस्तिका पठिता याता परहस्तगता गता: ।
कश्चित्कुमारयाता धृष्टा भ्रष्टा च मर्दिता ॥ २ ॥
तैलाद्रक्षेत् जलाद्रक्षेत् द्रक्षेत् शिथिलबन्धनात् ।
परहस्तगतां रक्षेत् एवं वदति पुस्तिका ॥ ३ ॥

श्री संवत् १८३५ वर्षे श्रावणशुद्ध प्रतिपदायां
पाठक रामचन्द्रेणायं लिखितम् ।

१. ग. अयमपि हस्तलेख: पूर्वस्मादेव ग्रन्थागारादुपलब्ध: अत्रापि पुस्तकस्य उत्तरार्धभागमात्र: -

| | | |
|---|---|---|
| पुस्तकसंख्या | : | १८८६ |
| पत्रसंख्या | : | १-७३ यावत्. |
| पुस्तकनाम | : | गृह्यकारिका. |
| आकार: | : | ७.५ ४.९. |
| पङ्क्तय: | : | प्रतिपृष्ठं षट्संख्यामिता:. |
| अक्षराणि | : | प्रतिपंक्ति चतुर्विंशत्यक्षराणि. |
| लिपि: | : | देवनागरी. |
| प्रतिलिपिकाल: | : | १८५१ तमो वैक्रमाब्द:. |
| अन्त्यपाठ: | : | अन्ते इत्थं पाठ उपलभ्यते - |

इति कात्यायनगृह्यसूत्रकारिकायां रेणुकाग्नि-
होत्रिविरचितायां प्रवासविधि: ॥समाप्त:॥
इति उत्तरार्द्धं समाप्त: ।
संवत् १८५१ वर्षे कार्तिकमासे शुक्लपक्षे ४ चतुर्थी
पुष्य तिथौ सोमवासरे ॥ शुभं भवतु ॥
यादृशं पुस्तकं दृष्टं तादृशं लिखितं मया ।
यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥
लेखक पाठकयो कल्याणमस्तु ॥ श्री ॥

४. घ. इयमपि हस्तप्रति: सरस्वतीभवने एव समुपलब्धा । प्राय: ग घयो: पुस्तकयो: भेदो नास्ति -

पुस्तकसंख्या : १००५

पुस्तकनाम : वातायगुह्यकालिका.

पत्र-संख्या : १-४० यावत्

आकार: : ७ ४ मित:.

पङ्क्तय: : प्रतिपृष्ठं दशसंख्यामिता:.

अक्षराणि : प्रतिपंक्ति त्रयस्त्रिंशदक्षराणि.

लिपि: : देवनागरी.

प्रतिलिपिकाल: : १८११ तमो वैक्रमाब्द:.

अन्यपाठ: : ग पुस्तकवत्.

५. परिशिष्टं प्रथमम् : इयमपि वाराणसीस्थ सरस्वतीभवनपुस्तकालये प्राप्तम् -

पुस्तकसंख्या : १८३५

पुस्तकनाम : गुह्यकालिका.

पत्रसंख्या : १-३५ यावत्.

आकार: : ७.५ ३.९ मित:.

पंक्तय: : प्रतिपृष्ठं ८ संख्यामिता:

अक्षराणि : प्रतिपंक्ति अष्टाविंशत्यक्षराणि.

लिपि: : देवनागरी.

प्रतिलिपिकाल: : अज्ञात:.

६. परिशिष्टं द्वितीयम् - एषा हस्तप्रति: चास्माभि: जोधपुरस्थ राजस्थानप्राच्यविद्याप्रतिष्ठानत: प्राप्ता: । अस्य पुस्तकसंख्या १७५२ अस्ति । ग्रन्थस्य नाम पारायण-गुह्यकालिका वर्तते । पुस्तकमिदं फाल्गुनकृष्णत्रयो-दश्यां गुरुवारे १८१२ तमे वैक्रमाब्दे लालाधरदेवेन लेखकेन लिखितम् । अत्र १२ पत्राणि सन्ति ।

मूलकारिकाः

पूर्वभागः

## अथ गर्भाधानम्

### (मङ्गलाचरणम्)

गणादिकर्मविघ्नान् क्षुद्रविघ्नांश्च हेति ।
नमस्तस्मै गणेशाय-गज-चन्द्रमरीचये ॥ १॥
श्रुतिस्मृति-भक्तिस्मृति-युक्तिज्ञा यथादिशौनितज्ञमानीश ।
प्रणम्य संस्कार-विधिं विविच्याद् ग्रन्थं प्रणम्यात्र पार्श्वमृद्गताम् ॥

### संस्कार भेदौ

संस्कारो द्विविध प्रोक्तो ब्राह्मो दैवो मनीषिभिः ।
गर्भाधानादिको ब्राह्मः पाकयज्ञस्तु दैविकः[1] ॥ २॥

### गर्भाधान प्रशंसा

[2]गर्भाधानमतो कार्यं पुत्रोत्पत्ति हेतवे ।
नाऽपुत्रस्य लोको वा च तथा च निश्चितं[3] ॥ ३॥
गर्भाधानादपुत्रत्वात् प्राणिभ्यापते ।
स्वर्गकाया निर्माणगमा गमादिकम् ॥ ४॥

---

१. द्विविध एव संस्कारो भवति ब्राह्मो दैवश्च । गर्भाधानादिस्मार्तो ब्राह्मः । पाकयज्ञ-हविर्यज्ञ-सोमसंस्था दैविक दैवः । स्मृतिचन्द्रिका संस्कारकाण्ड पृ० ३३, हारीतवचनम् ।

२. गर्भः संधार्यते येन कर्मणा तद् गर्भाधानमित्यनुगतार्थं कर्मनामधेयम् । पूर्वमीमांसा अ० १, पाद ४, अधि० २, वीरमित्रोदय संस्कारप्रकाशे उद्धृतम् ।
निषिक्तो यत्प्रयोगेण गर्भः संधार्यते स्त्रिया ।
तद् गर्भालम्भनं नाम कर्म प्रोक्तं मनीषिभिः ॥ शौनक

३. लोको यं नैव तस्य च निश्चिता ।

वात:

मृदुः स्वाभाविकं स्त्रोणां रागः पीतः स्मृतः ।
चतुर्भिरेतै ताम्रतीभिः कथितैः[1] ॥ ६॥
मानादृशीं चाऽऽकलु पश्चिमे स्थानिकम् ।
न तु वायुरिति मे वद संस्थान् ॥७॥

नवात्मकम्

[2]इत्याधमुखा यामस्थिर्त्या चेतवत्स ।
दीर्घमुखामध्यां च कृशाया मुग्धिका ॥८॥
दीर्घिका धनुमुखा शीघ्रा सुतनाङ्गिका ।
बाहुवा[3] चलमतिर्भिता च मेखला ॥९॥
परिवृता पुत्रवती: मुग्धिक्यायका[4] ।
पूर्णोऽपि भवति स्म स्वराङ्गन्या वाक्ये ॥ १०॥

---

१. द्रष्टव्यम् - मनुस्मृति, ३.४९
२. कुमारः संख्यासापेक्ष - नवात्मकस्याप गौः -

मुखाक्षि दुःशीलावस्थायुक्तामप्यिता ।
